अस्माकम् अतीतः - 2

सामाजिकविज्ञानम्

अस्माकम् अतीतः – 2

सप्तमकक्ष्यायै इतिहासस्य पाठ्यपुस्तकम्

राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्

NATIONAL COUNCIL OF EDUCATION RESEARCH AND TRAINING

दिसम्बरमासः 2015 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

अनुवादकः - रूपलालशर्मा

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां यत् विद्यालयीयं जीवनम् अस्ति तद् विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम् । अयं सिद्धान्तः पुस्तकस्थस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिः विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती । नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति । एतस्मिन् प्रयासे प्रत्येकं विषयं एकया दृढतरया भित्त्या आवरणस्य अथ च सूचनायाः संस्मारणस्य च प्रवृत्तेः विरोधः अपि सम्मिलितः अस्ति । आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति ।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकान् कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले च स्वस्य अनुभवैः चिन्तनस्य च अवसारान् कल्पयन्ति । अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभ्यां युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति । शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति । सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति मन्यामहे अपि च तान् सहभागिनः कुर्याम च, ते बालकाः ज्ञानस्य निर्धारितस्य मात्रायाः ग्राहकाः सन्ति इति मन्तव्यं त्यजन्तु ।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां कुर्वन्ति । दैनन्दिन्यां समय-सारण्यां स्थितिस्थापकत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरुकता, यतः शिक्षणस्य कृते नियतानां दिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात् । शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारीकरिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति । भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः । एषः प्रयासः इतोऽपि गभीरतया स्यात् एतस्मिन् प्रयत्ने इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते आश्चर्यस्य लघुषु समूहेषु वार्तालापस्य कृते तथा च चर्चायाः कृते हस्ताभ्यां क्रियामाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति । परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च एतस्य पाठ्यपुस्तकस्य समितेः मुख्यः परामर्शदातुः

नीलाद्रिभट्टाचार्यस्य विशेषरूपेण आभारीणी अस्ति। एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम्। एतं योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि आभारिणः स्मः। वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायां निरीक्षण-समितेः सदस्यानां कृते ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः। व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नाविन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति। यतः भाविसंशोधनेषु स्वीकर्तुं शक्यं स्यात्।

निदेशकः

राष्ट्रिय-शैक्षिकानुसन्धानम् एवञ्च

प्रशिक्षण-परिषद् नवदेहली, *२० नबम्बरः २००६*

पाठ्यपुस्तक-निर्मातृ-समितिः

अध्यक्षः,सामाजिक-विज्ञान-पाठ्यपुस्तक-परामर्शदातृ-समितिः

हरिवासुदेवनः,प्रोफेसरः इतिहास-विभागः, कलकत्ता-विश्वविद्यालयः, कोलकाता।

मुख्य-परामर्शदाता

नीलाद्रिभट्टाचार्यः, प्रोफेसर इति पदासीनः, इतिहास-अध्ययन-केन्द्रम, समाजविज्ञान-संस्थानम्, जवाहरलालनेहरू-विश्वविद्यालयः,नवदेहली।

परामर्शदातारः

कुणालचक्रवर्ती, प्रोफेसर इति, इतिहास-अध्ययन-केन्द्रम, समाजविज्ञान-संस्थानम्, जवाहरलालनेहरू-विश्वविद्यालयः,नवदेहली।

सुनीलकुमारः,रीडर इति , इतिहास-विभागः, दिल्लीविश्वविद्यालयः, दिल्ली।

सदस्याः

अनिलसेठी,पूर्वप्रोफेसर इति, सा.वि.शि.वि., रा.शै.अ.प्र.प.,नवदेहली।

कुमकुमरॉयः, एसोसिएटप्रोफेसर इति(सहायकाचार्या), इतिहास-अध्ययन-केन्द्रम, समाजविज्ञान-संस्थानम्, जवाहर-लालनेहरू-विश्वविद्यालयः,नवदेहली।

केशवनवेलूथटः, प्रोफेसर इति, इतिहास-विभागः, मंगलोर-विश्वविद्यालयः, मंगलौरः, कर्णाटकम्।

चेतनसिंहः, प्रोफेसर इति, इतिहासविभागः, हिमाचलप्रदेशविश्वविद्यालयः,शिमला, हिमाचलप्रदेशः।

नैनादासगुप्ता,प्रवक्त्री ,इतिहासविभागः,लेडीश्रीरामकॉलेज इति,दिल्लीविश्वविद्यालयः, दिल्ली।

फरहतहसनः,रीडर इति, इतिहासविभागः,अलीगढ-मुस्लिम-विश्वविद्यालयः,अलीगढम्, उत्तरप्रदेशः।

भैरवी-प्रसाद-साहू, प्रवक्त्री विभागाध्यक्षा च,इतिहासविभागः, दिल्लीविश्वविद्यालयः, दिल्ली।

मिलीरायः,वरिष्ठप्रवक्त्री, सा.वि.शि.वि., रा.शै.अ.प्र.प., नवदिल्ली।

रजतदत्ता,प्रोफेसर इति,इतिहास-विभागः,महात्मगान्धि-विश्वविद्यालयः,कोट्टामः,केरलम्।

विजयारामास्वामी,प्रोफेसरः,इतिहास-अध्ययन-केन्द्रम, समाजविज्ञान-संस्थानम्, जवाहरलालनेहरू विश्वविद्यालयः,नवदेहली।

शुचिबजाजः,पी.जी.टी., इतिहासः,स्प्रिंगडेल्सस्कूल इति, पूसारोड इति, नवदेहली।

सरीलामित्रा,पी.जी.टी., इतिहास,वसंत-वैली-स्कूल इति,वसंतकुंज इति, नवदेहली।

सी.एन.सुब्रहमणियमः,निदेशकः,एकलव्यः, कोठी-बाजार इति, होशंगाबादम्, मध्यप्रदेशः।

हिन्द्यनुवादः

अनिलसेठी, रा.शै.अ.प्र.प.,

कुसुम-बाँठिया, भूतपूर्वरीडर इति, देशबन्धुकॉलेज , दिल्लीविश्वविद्यालयः,दिल्ली।

परशुरामः, भूतपूर्वनिदेशकः (राजभाषा) भारतसर्वकारः।

रीतुसिंहः, रा.शै.अ.प्र.प.,

संजीवकुमारः, वरिष्ठप्रवक्ता, देशबन्धुकॉलेज इति , दिल्लीविश्वविद्यालयः,दिल्ली।

सीमाएस.ओझा, प्रवक्ता, सा.वि.शि.वि., रा.शै.अ.प्र.प., नवदिल्ली।

सदस्य-समन्वयकः

रीतूसिंहः, प्रवक्त्री, सा.वि.शि.वि., रा.शै.अ.प्र.प., नवदिल्ली।

कृतज्ञता-ज्ञापनम्

इदं पुस्तकं वर्षं यावत् जायमानस्य चिन्तनस्य चर्चायाः विमर्शस्य पुनर्लेखनस्य च परिणामरूपम् अस्ति, तत्र चापि पाठ्यपुस्तक-निर्मातृ-समितेः सदस्यानां योग्यतायाः समर्पणस्य च प्रतिफलम् अस्ति । पुस्तकस्य रचनाकाले अस्माभिः अन्योऽन्येभ्यः बहुकिमपि अवगतम् अस्ति । आशास्महे यत् प्रकाशितपुस्तकं चर्चायाः लेखनस्य पुनर्लेखनस्य च दीर्घावधियुक्तम् उत्साहं प्रसन्नतां च प्रतिबिम्बयति । पुस्तकसमितेः प्रत्येकम् अपि सदस्यः निजपरिवारजनेभ्यः संस्थाभ्यः च अतीव सहयोगं प्रोत्साहनं च प्राप्नोत् । एतस्मिन् अवसरे तेषां सर्वेषां सम्बद्धजनानां कृते धन्यवादं विज्ञापयामः ।

रा.शै.अ.प्र.प., इत्यस्य समीक्षणसमितेः सदस्यः, प्रवक्ता, जे.एस.ग्रेवालः शिकागो-विश्वविद्यालयस्य च प्रवक्ता मुजफ्फर-आलमः नैकान् अध्यायान् उद्दिश्य टिप्पणीः कृतवन्तौ तथा च अस्माकं प्रत्येकम् अपि समस्यायाः समाधानम् उदारतापूर्वकं कृतवन्तौ । वियनाविश्वविद्यालयस्य प्रवक्त्री एबाकोचः निजानां नैकचित्राणाम् उपयोगाय अनुमतिम् अददात् । दिल्लीविश्वविद्यालयस्य पी.जी.डी.ए.वी.कालेज इत्यस्य डॉ.मीराखरे केषाञ्चित् प्रश्नानाम् उत्तरदाने अतीव तत्परतां दर्शितवती तथा च नैकसूचनाः चित्राणि च प्रदाय अस्माकं साहाय्यं कृतवती । वयम् एतान् सर्वान् प्रति कृतज्ञतां विज्ञापयामः ।

आर्ट-क्रिएशन्स इत्यस्य ऋतुटोपाद्वारा पुस्तकाय कृतसंरचनार्थं सज्जार्थं च तस्यै धन्यवादं विज्ञापयामः । एतस्य पुस्तकस्य मानचित्राणि सतीशमौर्यः अरचयत् । वयं तस्य सहिष्णुतायाः तत्परतायाः कार्यकुशलतायाः च कृते तं प्रति कृतज्ञाः स्मः ।

एतस्य पुस्तकस्य विकासस्य विभिन्नचरणेषु सहयोगाय वयं डी.टी.पी.आपरेटर इत्यस्य, गुरिन्दरसिंहरायस्य, अनिलशर्मणः, ईश्वरसिंहस्य विजयकौशलस्य कॉपीएडिटर अंजनाबख्शी इत्यस्याः, प्रूफरीडर, अचलकुमारस्य शशिदेव्याः तथा च सङ्गणकप्रभारिणः दिनेशकुमारस्य चापि धन्यवादं कुर्मः कृतज्ञाः च स्मः इति । एतैः सर्वैः अपि मित्रैः सहयोगिभिः च स्वीयानि कार्याणि तत्परतया कुशलतया च पूर्तिं प्रति नीतानि ।

चित्राणां मानचित्राणां च कृते कृतज्ञता-ज्ञापनम्

वयं निम्नलिखितजनानां कृते कृतज्ञतां विज्ञापयामः –

चित्राणां कृते कृतज्ञता-ज्ञापनम् –

दिल्ली, आगरा, जयपुरम् – द-गोल्डन-ट्रायंगल इति (अध्यायः 4, चित्रम् - 1) आर्चर, मिल्डरेड, अर्ली व्यू आफ इण्डिया,द पिक्चर्सक्यू जर्नीज आफ थामस एंड विलियम डेनियल, 1786 – 1794,

(अध्यायः 5,चित्रं 4) ,

आर्कियोलाजिकल सर्वे आफ इण्डिया,कुत्ब मीनार एंड एडजाइनिंग मोनुमेंट्स ,

(अध्यायः 3,चित्रं 2,अध्यायः 5, चित्रं 2 क,2 ख,5क,5ख),

अशर,कैथेरीन एंड सिंथिया टालबोट, इण्डिया बिफोर यूरोप,

अटिल,इसिन,द ब्रश आफ दी मास्टर्स – ड्राइंग्स फ्रांम ईरान एंड इण्डिया

(गतावरणम्, अध्यायः 3,चित्रं 1),

बंद्योपाध्यायः, अमियकुमारः,बंकुरारमन्दिरः,

(अध्यायः 10,चित्रं 2,4),

बीच,मिलो सी.एण्ड एबा कोच.किंग आफ दी वर्ल्ड, द पादशाहनामा

(अध्यायः 4,चित्रं 3,4,5,6)

ब्रांड, माइकेल एंड गलेन डी.लारी (संपा) फतेहपुरसीकरी

(अध्यायः 5,चित्रं 4,5),

सेंटर फार कल्चरल रीसोर्स एंड ट्रेनिंग, नवदेहली

(अध्यायः 2,चित्रं 4,अध्यायः 3,चित्रं 3,अध्यायः 5,चित्रं 1, अध्यायः 9,चित्रं 3,5),

दासः, अनन्तः, जाट-वैष्णव-कथा

(अध्यायः 8,चित्रं 7),

देसाई,देवांगना,खजुराहो-मोनुमेंट्स लीगेसी

(अध्यायः 5,चित्रं 3ख),

इटॉन,रीचर्ड, सूफीस आफ बीजापुरम्

(अध्यायः 8,चित्रं 6)

इडवरडेस, माइकेल, इण्डियन टेम्पल्स एंड पैलेसेस इति

(अध्यायः 2,चित्रं 1,अध्यायः 5,चित्रं 3 क),

इहर्लस, इकारट एंड थॉमस रॉफ्ट, शाहजहांनाबादम्/ पुरातननवदेहली , ट्रेडिसन एंड कोलोनियल चेंज इति,

(अध्यायः 5,चित्रं 15),

इवेसन, नारमैन, द इण्डियन मैट्रोपालिस

(अध्यायः 6,चित्रं 2,8),

गैसकॉगानी, बामबर, द ग्रेट मुगल्स

(अध्यायः,4 चित्रं 7,9),

गोस्वामी, बी.एन.द वर्ड इज सेक्रेट,सेक्रेड इज द वर्ड

(अध्यायः 2,चित्रं 2,अध्यायः 8,चित्रं 1,अध्यायः 9,चित्रं 2),

हूजा, रीमा.ए हिस्ट्री आफ राजस्थानम्

(अध्यायः 10,चित्रं 5),

आइओनस, वेरोनिका, इण्डियन माइथोलाजी

(अध्यायः 6,चित्रं 1),

कोच,एबा शाहजहाँ एंड आरफेंस

(अध्यायः 5,चित्रं 12),

कोच, एबा.द कम्पलीट ताजमहल

(अध्यायः 4,चित्रं 2,अध्यायः 5, चित्रं 6,9,10,11,13,14),

कोच,एबा.मुगल आर्किटेक्चर

(अध्यायः 5, चित्रं 16),

कोठारी, सुनील.कत्थक – इण्डियन क्लासिकल डांस आर्ट

(अध्यायः 10,चित्रं 6,7),

मोसेलास, जिम, जेकी मेंजेस, प्रतापादित्या पालः, डासिंग टू दी फ्लूट – म्यूजिक एंड डांस इन इंडियन आर्ट

माइकल, जार्ज एंड वसुंधरा फिलीओजेट, स्पलेंडरस आफ दी विजयनगर इम्पायर -हम्पी

माइकल, जार्ज आर्किटेक्चर एंड आर्ट आफ सदर्न इण्डिया

(अध्यायः 8,चित्रं 2),

पालः प्रतापादित्या,कोर्ट पेंटिंग्स आफ इण्डिया

(अध्यायः 7,चित्रं 2,अध्यायः 8,चित्रं 3,अध्यायः 9,चित्रं 4,7,8),

सफादी, वाई.एच,इस्लामिक-कैलीग्राफी

(अध्यायः 1,चित्रं 2),

सिंहः, रूपेंदरः, गुरु नानक –हिज लाइफ एंड टीचिंग्स

(अध्यायः 8,चित्रं 11),

स्ट्रांग, सूसान.द आर्ट्स आफ दी सिख किंग्डम्स

(अध्यायः 6,चित्रं 4,5, अध्यायः 8,चित्रं 10,पृष्टं Xii)

सुब्रामणियमः,संजयः,द केरियर एंड लिजेंड आफ वास्को डी गामा

(अध्यायः 6,चित्रं 9),

थैक्सटन, व्हीलर एम.(ट्रांसलेटेड, एडीडिड एंड एनोटेड), जहांगीरनामा, मेमोरीज आफ जहांगीर,

एम्परर आफ इण्डिया

(अध्यायः 4,चित्रं 8),

वेल्च, स्टूअर्ट कैरी, इण्डिया, आर्ट एंड कल्चर – 1300-1900

(अध्यायः 7,चित्रं 4,6,7,अध्यायः 8,चित्रं 5),

वेल्च, स्टूअर्ट कैरी.इम्पीरियल मुगल पेंटिग इति

(अध्यायः 1, चित्रं 1),

मानचित्राय कृतज्ञताज्ञापनम्

श्वाट्जबर्गः, जे.ई.ए हिस्टोरिकल एटलस आफ साउथ एशिया

(अध्यायः 1, मानचित्रं 1,2),

विभिन्न-पुस्तकानां मानचित्राणां च कृते सम्पादितानि प्रयुक्तानि च मानचित्राणि –

अशर, केथराइन एण्ड सिंथिया टालबोट.इण्डिया बिफोर यूरोप

(अध्यायः 3,मानचित्रं 3,अध्यायः 4, मानचित्रं 1)

बेले, सी.ए,इण्डियन सोसाइटी एंड दी मेकिंग आफ दी ब्रिटिश एम्पायर

(अध्यायः 10, मानचित्रं 1,2),

फरकेनबर्ग, आर.ई.(संपा.)देहली थ्रू द एजिस

(अध्यायः 3,मानचित्रं 1)

हबीब, इरफानः, एन एटलस आफ दी मुगल एम्पायर इति,

(अध्यायः 3,मानचित्रं 2),

कुमारः, सुनीलः, इमरजेंस आफ दी देहली सल्तनत

(अध्यायः 3,मानचित्रं 2),

श्वाट्जबर्गः,जे.ई.ए हिस्टोरिकल एटलस आफ साउथ एशिया

(अध्यायः 1,मानचित्रं 3)

अनुवादकः - रूपलालशर्मा

विषय-सूची

आमुखः *iii*

अध्यायः १ सहस्रं वर्षावधौ जातस्य परिवर्तनस्य निरीक्षणम् 1

अध्यायः २ नूतनाः राजानः तेषां राज्यानि च 16

अध्यायः ३ देहल्याः शासकाः 30

अध्यायः ४ मुगल-साम्राज्यम् 45

अध्यायः ५ शासकाः भवनानि च 60

अध्यायः ६ नगराणि व्यापारिणः शिल्पिजनाः च 75

अध्यायः ७ जनजातयः यायावरः एकस्मिन् स्थाने निवसित-समुदायाः च 91

अध्यायः ८ ईश्वरे अनुरागः 104

अध्यायः ९ क्षेत्रीय-संस्कृतीनां निर्माणम् 122

अध्यायः १० अष्टादश-शताब्द्यां नूतनाः राजनैतिक-गठनम् 138

एतस्य पुस्तकस्य विषये ध्यातव्याः बिन्दवः

प्रत्येकम् अध्यायः बहुषु भागेषु विभक्तः अस्ति। एतान् भागान् पठित्वा एतस्मिन् विषये वार्त्तालापं कृत्वा अभिप्रायं च ज्ञात्वा तदनन्तरम् एव अग्रिमस्य अध्यायस्य प्रारम्भं कुर्वन्तु। प्रत्येकम् अध्याये निम्नलिखितांशानां विषये जानन्तु।

1

परिभाषा

केषुचित् अध्यायेषु
परिभाषाः प्रदत्ताः सन्ति ।

2.
अतिरिक्तं ज्ञानम्
बहुषु अध्यायेषु रोचक-सूचना-युक्ताः मञ्जूषाः प्रदत्ताः सन्ति।

3.स्रोतोमञ्जूषा
बहुषु अध्यायेषु स्रोतसः एकः अंशः प्रदत्तः अस्ति। एतेषाम् आधारेण इतिहासकारा इतिहासं लिखन्ति। एतान् ध्यानेन पठित्वा एतेषु प्रदत्तानां प्रश्नानाम् उपरि चर्चां कुर्वन्तु। अस्माकं बहूनि स्रोतांसि चित्र-रूपेण सन्ति। प्रत्येकं चित्रस्य स्वस्याः एका कथा वर्तते।

4

भवन्तः केषुचित् अध्यायेषु चित्राणि अपि प्राप्स्यन्ति।
एतानि सावधानं दृष्ट्वा स्वस्य अध्याये बोधितस्थानानि अन्विष्यन्तु।

5 प्रत्येकं अध्याये केचन अन्तर्निहिताः प्रश्नाः तथा च क्रियाकलापाः प्रदत्ताः सन्ति, ये विशेषरूपेण दर्शिताः सन्ति। एतेषाम् उपरि विचार-विमर्शाय किञ्चित् कालं यच्छन्तु।

6. अन्यत्र

प्रत्येकम् अध्यायस्य अन्ते एकः 'अन्यत्र' नामकः खण्डः प्रदत्तः अस्ति । भवन्तः स्वस्य अध्याये याः घटनाः पठन्ति, तेषु दिनेषु संसारस्य अन्येषु भागेषु काः काः घटनाः भवन्ति स्म, तस्य एकं दृश्यं दर्शयितुं प्रदत्तम् अस्ति ।

7.

कल्पनां कुर्वन्तु

एकः लघुतरः खण्डः अस्ति "कल्पनां कुर्वन्तु" अधुना भवतः क्रमः अस्ति अतीतं गत्वा तस्मिन् समये जीवनस्य निरीक्षणस्य ।

8.

बीजशब्दः

प्रत्येकम् अध्यायस्य अन्ते भवन्तः बीजशब्दानाम् एकां सूचीं प्राप्स्यन्ति । एते भवन्तम् अध्याये आगतानां महत्त्वपूर्णानां विचाराणां विषयाणां पुनः स्मरणं कारयिष्यन्ति ।

9.

प्रत्येकम् अध्यायस्य अन्ते विभिन्न-प्रकाराः क्रियाकलापाः प्रदत्ताः सन्ति – पुनः स्मरणं कुर्वन्तु, आगच्छन्तु जानीमः, आगच्छन्तु विचारं कुर्वन्तु तथा च आगच्छन्तु कृत्वा पश्यामः ।

अनेन प्रकारेण एतस्मिन् पुस्तके भवतां कृते पठितुं लेखितुं चिन्तयितुं कर्तुं च बहुकिमपि अस्ति । वयम् आशास्महे यत् एतस्मिन् पुस्तके भवन्तः हर्षस्य अनुभवं करिष्यति ।

1 सहस्रं वर्षावधौ जातपरिवर्तनानां निरीक्षणम्



मानचित्रम् 1

द्वादश-शताब्द्याः भूगोलवेत्रा अल-इद्रासी-महोदयेन निर्मितं विश्वस्य मानचित्रस्य कश्चन भागः, यस्मिन् भारतीयम् उपमहाद्वीपं दर्शितम् अस्ति।

मानचित्रकारः

यः जनः मानचित्राणि रचयति।

प्रथमे मानचित्रे द्वितीये च दृष्टिपातं कुर्वन्तु। प्रथमं मानचित्रम् अरबस्य भूगोलवेत्ता अल-इद्रासी 1154 तमे वर्षे निर्मितवान्। अत्र यत् मानचित्रं निर्मितम् अस्ति तत् तेन रचितस्य विश्वस्य बृहत्तमस्य मानचित्रस्य एकः भागः अस्ति एतत् मानचित्रं भारतीयम् उपमहाद्वीपं दर्शयति। द्वितीयं मानचित्रम् एकः फ्रांसदेशस्य **मानचित्रकारः 1720** तमे वर्षे निर्मितवान् आसीत्। द्वे अपि मानचित्रे एकस्य एव क्षेत्रस्य स्तः परन्तु तयोः मध्ये महत् अन्तरम् अस्ति। अल-इद्रासी-महोदयस्य चित्रे दक्षिणभारतं तस्मिन् स्थाने अस्ति यत्र वयम् अद्य उत्तरभारतम् अन्वेक्ष्यामः अपि च श्रीलंकायाः द्वीपम् उपरिभागे वर्तते। स्थानानां नामानि अरबी-भाषया प्रदत्तानि सन्ति।

मानचित्रम् - 2

अष्टादश-शताब्द्याः आरम्भे ग्विलॉम द लिस्ले-महोदयस्य एटलस-नूवो इत्यस्य अनुसारम् इदम् उपमहाद्वीपम् ।

तेषु च केचन परिचितानि नामानि अपि सन्ति, यथा उत्तरप्रदेशस्य कन्नौज । द्वितीयं मानचित्रं प्रथमस्य मानचित्रस्य निर्माणानन्तरं प्रायशः 600 वर्षाणाम् अनन्तरं रचितम् अस्ति । एतस्मिन् कालावधौ उपमहाद्वीपस्य विषये सूचनाः परिवर्तिताः आसन् । इदं मानचित्रं वयम् अधिकं परिचितम् इति अनुभविष्यामः । तस्मिन् विशेषरूपेण तटीय-क्षेत्राणां सूक्ष्मतमाः सूचनाः दृष्ट्वा आश्चर्यं भवति । यूरोपस्य नाविकाः व्यापारिणः च स्वस्य समुद्रस्य यात्रायाः कृते एतस्य मानचित्रस्य प्रयोगं कुर्वन्ति स्म । (पश्यन्तु षष्टमे अध्याये) ।

?

परन्तु अधुना अन्तःस्थेषु क्षेत्रेषु दृष्टिपातं कुर्वन्तु । किम् एतेषु अपि तावत्यः एव सूचनाः सन्ति यावत्यः समुद्रतटयुक्तस्य भागे सन्ति ? गङ्गायाः मार्गं पश्यन्तु । एषः कथं दर्शितः अस्ति ? एतस्मिन् मानचित्रे तटीय-क्षेत्राणाम् अन्तःस्थानां क्षेत्राणां च मध्ये सूचनानां सौक्ष्मस्य च यत् अन्तरम् अस्ति, भवतां दृष्टौ तस्य किं कारणं भवितुं शक्नोति ?

एतावती एव महत्त्वपूर्णा एका इतोऽपि वार्ता इयम् अस्ति यत् द्वितीयं युगं यावत् मानचित्राङ्कनस्य विज्ञानम् अपि बहुपरिवर्तितम् आसीत् । इतिहासकाराः अधुना अतीतानाम् अभिलेखानां लेखानां च अध्ययनं कुर्वन्ति तर्हि तेषां कृते तासां सूचनानां सन्दर्भाणां तासां विभिन्नानाम् ऐतिहासिकीनां पृष्ठभूमीनाम् अवधानम् अपि आवश्यकम् अस्ति।

नूतना पुरातनी च शब्दावली

यदि समयस्य अनुसारं सूचनानां सन्दर्भाः परिवर्तिताः भवन्ति, तर्हि भाषया अर्थैः च साकं किं भवति ? ऐतिहासिकाः अभिलेखाः विविधासु भाषासु उपलभ्यन्ते अपि च एताः भाषाः अपि समयेन साकं बहु-परिवर्तिताः सन्ति । उदाहरणार्थं मध्ययुगस्य फारसी आधुनिकस्य युगस्य फारसीभाषातः भिन्ना अस्ति । एषा भिन्नता व्याकरणे शब्दभण्डारे च एव न आगता अस्ति समयस्य अनुसारं शब्दानाम् अर्थाः अपि परिवर्तिताः भवन्ति।

उदाहरणार्थं हिन्दुस्तान इति शब्दं स्वीकुर्मः । अद्यत्वे वयम् एतम् आधुनिक-राष्ट्र–राज्यं भारतम् इति अस्मिन् अर्थे स्वीकुर्मः । त्रयोदश-शताब्द्यां यदा फारसीदेशस्य इतिहासकारः मिन्हाज-ए-सिराजमहोदयः हिन्दुस्तानशब्दस्य प्रयोगं कृतवान् आसीत् तदा तस्य अभिप्रायः पञ्जाब-हरियाणा-गङ्गा-यमुनाः च अन्तरा स्थितेभ्यः क्षेत्रेभ्यः आसीत् । तेन अस्य शब्दस्य राजनैतिके अर्थे तेषां क्षेत्राणां कृते प्रयोगः कृतः यानि देहल्याः शासकस्य अधिकार-क्षेत्रे आगच्छन्ति स्म । साम्राज्यस्य प्रसारेण सार्धम् एतस्य शब्दस्य अन्तर्गते आगतक्षेत्राणि अपि वर्धितानि, परन्तु हिन्दुस्तानशब्दे दक्षिणभारतस्य समावेशः कदापि न जातः । एतद् अतिरिच्य षोडशशताब्द्याः आरम्भे बाबर-महोदयेन हिन्दुस्तानशब्दस्य प्रयोगः एतस्य उपमहाद्वीपस्य भूगोलस्य पशु-पक्षिणाम् अत्रत्य-निवासिनां संस्कृतेः वर्णनार्थं कृतम् अस्ति । अयं प्रयोगः चतुर्दशशताब्द्याः कविना अमीर-खुसरो-महोदयेन प्रयुक्त-शब्दस्य "हिन्द" इत्यस्य एव किञ्चित् समानः आसीत् । परन्तु यत्र भारतं एकस्मिन् भौगोलिके सांस्कृतिक-सत्त्वस्य रूपे परिचीयते स्म तत्र हिन्दुस्तानशब्देन ते राजनैतिकाः राष्ट्रियाः अर्थाः च सम्बद्धाः न आसन् यान् वयम् अद्य योजयामः ।

कस्यापि शब्दस्य प्रयोगे इतिहासकारैः बहुसावधानैः भाव्यं यतोहि अतीते तेषां शब्दानां केचन भिन्नाः एव अर्थाः आसन् । उदाहरणार्थं "विदेशीसदृशं सरलं शब्दं स्वीकुर्मः । अस्माकं कृते अद्य एतस्य अर्थः भवति, एतादृशः जनः यः भारतीयः न स्यात्।

मध्ययुगे यथा कञ्चित् ग्रामम् आगन्ता कोऽपि अपरिचित-जनः यः तस्य समाजस्य संस्कृतेः च अङ्गभूतः न भवेत् "विदेशी" इति उच्यते स्म । एतादृशं जनं हिन्द्या परदेशी

?

किं भवन्तः एतादृशान् काञ्चन् अन्यान् शब्दान् स्मरन्ति येषाम् अर्थाः विभिन्नेषु

इति फारसीभाषया च 'अजनबी' इति उच्यते । अतः कस्यचित् नगरवासिनः कृते वनवासी "विदेशी" भवति स्म किन्तु एकस्मिन् एव ग्रामे निवसन्तौ द्वौ कृषकौ विभिन्नाभिः धार्मिकाभिः जातीयैः च परम्पराभिः सम्बद्धौ अपि अन्योऽन्येषां कृते विदेशिनौ न भवतः स्म ।

इतिहासकाराः तेषां स्रोतांसि च

इतिहासकाराः कस्य युगस्य अध्ययनं कुर्वन्ति तेषाम् अन्वेषणस्य प्रकृतिः च कीदृशी अस्ति एतत् सर्वं मनसि निधाय च विभिन्नानां स्रोतसाम् आश्रयं स्वीकुर्वन्ति । उदाहरणार्थं गतवर्षे भवन्तः गुप्तवंशस्य शासकानां हर्षवर्धनस्य च विषये पठितवन्तः । एतस्मिन् पुस्तके वयं स्थूलरूपेण 700 तः 1700 ख्रिस्ताब्दं यावत् प्रायः सहस्रं वर्षाणां विषये पठिष्यन्ति । एतस्य कालस्य अध्ययनस्य कृते इतिहासकारः येषां स्रोतसां प्रयोगं कुर्वन्ति, तस्मिन् भवन्तः बहून् एतादृशान् विषयान् प्राप्स्यन्ति ये विषयाः गतयुगादारभ्य एवमेव प्रचलन्तः सन्ति । इतिहासकाराः एतस्य कालस्य विषये सूचनाः एकत्रीकर्तुम् अधुना अपि नाणकानां शिलालेखानां स्थापत्य-कलानां लिखितसामग्र्याः च उपरि निर्भराः सन्ति । परन्तु केचन विषयाः पूर्वापेक्षया बहुभिन्नाः अपि सन्ति । एतस्मिन् युगे प्रामाणिक्याः लिखितसामग्र्याः सङ्ख्या विविधता च आश्चर्यजनकरूपेण वर्धिता अस्ति । एतस्य अग्रे इतिहासकाराः सूचनानाम् अपरेषां स्रोतसां प्रयोगं शनैः शनैः न्यूनातिन्यूनं कर्तुम् आरब्धवन्तः ।

कर्गदस्य मूल्यम्

एतयोः द्वयोः प्रसङ्गयोः तोलनं कुर्वन्तु :

(1) त्रयोदशशताब्द्याः मध्ये एकं विद्वान् एकस्य पुस्तकस्य प्रतिलिपेः आवश्यकताम् अनुभूतवान् । तस्य पार्श्वे तावत् कर्गदं न आसीत् अतः तेन एका एतादृशी पाण्डुलिपिः प्रक्षालिता यस्याः सः आवश्यकतां न अनुभूतवान् आसीत् अपि च तस्य तस्याः कर्गदस्य शोषणं कृत्वा तस्याः प्रयोगं कृतवान् ।

(2) एकस्याः शताब्द्याः अनन्तरं यदि भवन्तः विपणितः किञ्चित् खाद्यपदार्थं क्रीणन्ति तर्हि भवितुं शक्नोति यत् भवतां भाग्यं सम्यक् स्यात् अपि च आपणिकः तत् वस्तु कर्गदे वेष्टयित्वा दद्यात् ।

? तर्हि कर्गदं कदा महार्घम् आसीत् कदा सरलतया उपलब्धं च आसीत् – त्रयोदश्यां शताब्द्याम् अथवा चर्तुदश्यां शताब्द्याम् ?

एतस्मिन् समयावधौ कर्गदं क्रमशः अल्पमूल्यवत् जातं बृहन्मात्रायां च उपलब्धं जायमानम् आसीत् । जनाः धर्मग्रन्थानां लेखनस्य कृते शासकानां वृत्तान्तानि लेखितुं सतां लेखनानि उपदेशान् च लेखितुं प्रार्थनापत्राणि न्यायालयानाम् अभिलेखान् लेखितुम् आयव्ययविवरणं कराणां विवरणम् आदीनां लेखने एतस्य उपयोगम् आरब्धवन्तः । धनाढ्याः शासकाः जनाः मठाः देवालयाः च पाण्डुलिपीः एकत्रीकुर्वन्ति स्म । एताः पाण्डुलिपीः पुस्तकालयेषु तथा च अभिलेखागारेषु स्थाप्यन्ते । एताभिः पाण्डुलिपिभिः अभिलेखैः च इतिहासकाराः महतीं विस्तृतां सूचनां प्राप्नुवन्ति परन्तु सार्धम् एव एतासाम् उपयोगः कठिनः अस्ति ।

तेषु दिनेषु मुद्रणालयाः तु न आसन्, अतः लिपिकाः अथवा अनुकर्तारः हस्ताभ्याम् एव पाण्डुलिपीनां प्रतिकृतिं रचयन्ति स्म । यदि भवन्तः कदाचित् कस्यचित् मित्रस्य गृहकार्यस्य अनुकरणं कृतवन्तः स्युः तदा भवन्तः जानीयुः यत् एतत् कार्यं सरलं न भवति । कदाचित् कदाचित् भवान् स्वस्य मित्रस्य लेखनशैलीं न जानीयात् अपि च भवन्तः बाध्याः भूत्वा अनुभवः एव करणीयः स्यात् यत् किं लिखितम् आसीत् । फलस्वरूपं भवतां लेखे मित्रस्य लिखितपत्रात् केचन लघवः स्थूलाः च परन्तु महत्त्वपूर्णाः भेदाः आगताः स्युः ।

अभिलेखागारः

एतादृशं स्थानं यत्र अभिलेखाः पाण्डुलिपयः च सङ्गृह्यन्ते । अद्य सर्वेषां राष्ट्रियानां राज्यसर्वकाराणां च अभिलेखागाराः भवन्ति यत्र ते स्वस्य सर्वेषां पुरातनानां सर्वकरीयाभिलेखानां आयव्ययस्य च विवरणं स्थापयन्ति ।

चित्रम् – 1

इयम् एका लघुचित्रस्य प्रतिकृतिः अस्ति यस्याम् एकः लिपिकः कस्याश्चित् पाण्डोलिपेः अनुकरणं कुर्वन् अस्ति । एतस्य चित्रस्य आकारः केवलं **10.5** सें.मी.**x 7.1** से.मी. अस्ति । एतस्य लघ्वाकारस्य कारणेन एतं लघुचित्रम् अथवा मिनियेचर इति कथयन्ति । कदाचित् एतेषां लघुचित्राणां प्रयोगः लेखे आगतानां पाण्डुलिपीनां स्पष्टतार्थं क्रियते स्म । एते एतावन्ति सुन्दराणि भवन्ति स्म यत् कालक्रमेण सङ्ग्रहकर्तारः प्रायः एतानि चित्राणि पाण्डुलिपिभ्यः पृथक्-कृत्वा विक्रेतुम् आरब्धवन्तः आसन् ।



चित्रम् – 2 लेखनस्य विभिन्न-प्रकाराणां शैलीनां कारणतः फारसी-भाषां अरबी-भाषां च पठितुं काठिन्यं भवितुं शक्नोति । नस्तलिक-लिपौ वामतः वर्णान् योजयित्वा धाराप्रवाहरूपेण लिख्यन्ते । फारसी-भाषायाः अरबी-भाषायः च ज्ञातृणां कृते एतस्याः लिपेः पठनं सरलं भवति । शिक्स्त-लिपिः दक्षिणतः अधिकाः सघना संक्षिप्ता कठिना च अस्ति ।

पाण्डुलिपेः प्रतिकृतिनिर्माणे अपि किञ्चित् इत्थम् एव भवति । प्रतिलिपीनां निर्माणकाले लिपिकाः कानिचन परिवर्तनानि कुर्वन्ति स्म, कुत्रचित् कश्चित् शब्दः कुत्रचित् किञ्चित् वाक्यम् । प्रत्येकं शताब्द्यां प्रतिलिपीनाम् अपि प्रतिलिपयः निर्मिताः जाताः अन्ततः एकस्य एव मूलग्रन्थस्य विभिन्नाः प्रतिलिपयः परस्परं बहुधा पृथक् – जाताः । एतस्मात् अतिगभीराः समस्याः उत्पन्नाः जाताः यतोहि अद्य वयं लेखकानां मूलपाण्डुलिपयः प्रायः एव कुत्रचित् लभ्येमहि । वयं पश्चात् जातैः लिपिकारैः निर्मितासु प्रतिलिपिषु एव पूर्णतया निर्भराः भवामः । अतः एतस्य वार्तायाः अनुभवार्थं यत् मूलतः लेखकः किं लिखितवान् आसीत्, इतिहासकाराः एकस्य एव ग्रन्थस्य विभिन्नानां प्रतिलिपीनाम् अध्ययनं कर्तुं बाध्याः सन्ति ।

बहुधा लेखकाः स्वयम् अपि समयानुसारं स्वस्य मूलवृत्तान्तेषु संशोधनं कुर्वन्ति स्म । चतुर्दशशताब्द्याः इतिहासकारः जियाउद्दीनबरनी-महोदयः स्वस्य वृन्तान्तं प्रथमतया 1356 तमे वर्षे अपि च द्वितीयवारम् एतस्य वर्षद्वयानन्तरं लिखितम् आसीत् । द्वयोः मध्ये अन्तरम् अस्ति परन्तु 1971 तमं वर्षं यावत् इतिहासकारैः प्रथमवारं यत् वृत्तान्तं रचितम् आसीत् तस्य विषये ज्ञानमेव न आसीत् । इदं पुस्तकालयानां विशालेषु सङ्ग्रहेषु कुत्रचित् गुप्तरूपेण आसीत् ।

नूतनाः सामाजिकाः राजनैतिकसमूहाः च

700 तमस्य ख्रिस्ताब्दस्य 1750 तमस्य ख्रिस्ताब्दस्य च मध्ये जातस्य सहस्रस्य वर्षाणाम् अध्ययनम् इतिहासकाराणां पुरतः महत् आह्वानं स्थापयति, अतः मुख्यरूपेण एतस्मिन् सम्पूर्णे काले बाहुल्येन विविधानि परिवर्तनानि जातानि । एतस्मिन् काले भिन्ने भिन्ने काले नूतनायाः प्रौद्योगिक्याः दर्शनं भवति, यथा सेचने चक्रं वयने तान्तवचक्रं युद्धे आग्नेयास्त्राणां प्रयोगः च । एतस्मिन् उपमहाद्वीपे नूतनप्रकारकाणां खाद्यवस्तूनाम् अपि आगमनम् अभूत् यथा आलूकं कणीशं मरीचिका चायं कॉफी इति च । इदं ध्यातव्यं यत् एतानि सम्पूर्णानि परिवर्तनानि नूतनाः प्रौद्योगिक्यः सस्यानि च तैः जनैः सह आगतानि ये जनाः नूतनां विचारान् आनीय आगतवन्तः आसन् । परिणामतः अयं कालः आर्थिक-राजनैतिक-सामाजिक-सांस्कृतिकानां परिवर्तनानां च अपि कालः आसीत् । पञ्चमे षष्ठे सप्तमे अध्याये च भवन्तः एतेषु केषाञ्चित् विषये ज्ञास्यन्ति ।

एतस्मिन् युगे जनानां गतिशीलता एकस्मात् स्थानात् अपरं स्थानं प्रति वर्धिता आसीत् । अवसरस्य अन्वेषणे जनानां समूहाः सुदूरदेशानां यात्रां प्रारब्धवन्तः आसन् । एतस्मिन् उपमहाद्वीपे बहुलाः सम्पदः अपि च स्वस्य भाग्यस्य निर्माणार्थम् अनन्ताः सम्भावनाः विद्यमानाः आसन् ।

चित्रम् – 3
कूपचक्रम्



पर्यावासः

एतस्य तात्पर्यम् इदम् अस्ति यत् कस्यापि क्षेत्रस्य पर्यावरणं तत्रत्यानां वासिनां सामाजिक-आर्थिक-जीवनशैलीतः अस्ति ।

?

अस्मिन् अनुभागे यानि प्रौद्योगिकीयकानि आर्थिकानि सामाजिकानि सांस्कृतिकानि च परिवर्तनानि वर्णितानि सन्ति, तेषु कानि कानि परिवर्तनानि भवतां दृष्टौ भवतां नगरे ग्रामे वा सर्वाधिकानि महत्त्वपूर्णानि सन्ति ?

एतस्मिन् काले येषां समुदायानां महत्त्वं वर्धितं तेषु एकः समुदायः आसीत् राजपूतः इति यस्य नाम राजपुत्र अर्थात् राज्ञः पुत्रः इत्यस्मात् निर्गतः अस्ति । अष्टमशताब्द्योः आरभ्य चतुर्दशशताब्द्योः मध्ये इदं नाम सामान्यरूपेण योद्धॄणां तस्य समूहस्य कृते प्रयुज्यते स्म यः क्षत्रिय-वर्णः अस्मि इति उद्घोषयति स्म । राजपूत-शब्दस्य अन्तर्गतं केवलं राजानः सामन्तवर्गः एव न आसीत् अपितु ते सेनापतयः सैनिकाः अपि आगच्छन्ति स्म ये सम्पूर्णे उपमहाद्वीपे विभिन्नानां शासकानां सेनासु सेवारताः आसन् । कवयः चारणाः च राजपुत्राणां आचारसंहितायाः प्रबलपराक्रमस्य स्वामिभक्तेः च गुणगानं कुर्वन्ति स्म। एतस्मिन् युगे राजनैतिकदृष्ट्या महत्त्वस्य प्राप्तेः अवसराणां लाभः मराठासमूहैः सिक्खैः जाट-समूहैः अहोम-जनैः कायस्थैः अर्थात् ये जनाः प्रायः लिपिकानां कार्यं कुर्वन्ति एतैः उपर्युक्तैः समूहैः लाभः स्वीकृतः ।

एतस्यां कालावधौ क्रमशः वनानां कर्तनं जायमानम् आसीत् कृषिक्षेत्रं वर्धमानम् आसीत् । केषुचित् क्षेत्रेषु इदं परिवर्तनम् अन्येषां क्षेत्राणाम् अपेक्षया अधिकगत्या सम्पूर्णेन रूपेण च जातम् । पर्यावासे परिवर्तनस्य कारणतः बहवः आदिवासिनः स्वकीयं स्थानं त्यक्तुं बाध्याः जाताः । केचन अन्ये वनवासिनः भूमेः कर्षणम् आरब्धवन्तः कृषकाः च जाताः । कृषकाणाम् एते नूतनाः समूहाः क्षेत्रीयेभ्यः विपणिभ्यः प्रमुखेभ्यः अर्चकेभ्यः मठेभ्यः मन्दिरेभ्यः च प्रभाविताः जाताः । ते महतां समाजस्य अङ्गभूताः जाताः । तैः करस्य प्रदानं करणीयं भवति स्म स्थानीयस्य स्वामिवर्गस्य आदेशानां पालनं च करणीयं भवति स्म । परिणामतः कृषकाणां मध्ये आर्थिकाः सामाजिकाः च अन्तराणि उदयपथं गन्तुम् आरब्धानि । केषाञ्चित् पार्श्वे उर्वरा भूमिः आसीत् केचन जनाः पशूनां पालनम् अपि कुर्वन्ति स्म केचन जनाः च कृषिकार्यात् अवशिष्टे काले चित्रकलायाः कार्यं कुर्वन्ति स्म । यथा यथा समाजे अन्तरं वर्धितम्, जनाः जातिषु उपजातिषु च विभक्ताः जाताः तेषां पृष्ठभूमीनां व्यवसायानां च आधारेण ते समाजे निम्नोच्चस्तरेण चिह्निताः जाताः । एतानि पदानि स्थायीरूपेण न आसन् । कस्याश्चित् जातिविशिष्टायाः सदस्यानां हस्तेषु कियत्याः सत्तायाः प्रभावस्य संसाधनानां च नियन्त्रणम् अस्ति एतदाधारेण तेषां पदानां परिवर्तनं भवति स्म । एकस्याः एव जातेः कस्मिंश्चित् क्षेत्रविशेषे पदं भवितुं शक्नोति स्म, अन्यस्मिन् कस्मिंश्चित् क्षेत्रविशेषे कञ्चित् अन्यत् पदं च अपि भवितुं शक्नोति स्म ।

स्वस्य सदस्यानां व्यवहारस्य नियन्त्रणं कर्तुं जातयः स्वयं स्वस्य नियमान् कल्पयन्ति स्म । एतेषां नियमानां पालनं जातेः वरिष्ठानां वृद्धानां च एका सभा कारयति स्म या केषुचित् क्षेत्रेषु जातिपंचायत इति उच्यते स्म । परन्तु जातिभिः

स्वस्य निवासस्य ग्रामाणां संस्कृतीनां पालनम् अपि करणीयं भवति स्म । एतत् अतिरिक्तं केषुचित् ग्रामेषु प्रमुखाणां शासनं भवति स्म । मिलित्वा ते कस्यचित् राज्यस्य एकः लघुः एकाङ्कः भवति स्म ।

क्षेत्राणि साम्राज्यानि च

चोल-विषयकः द्वितीयः अध्यायः तुगलक-विषयकः तृतीयः अध्यायः मुगलविषयकः चतुर्थः अध्यायः च वर्तते एतानि चोलदीनि महत्-राज्याणि सन्ति एतेषां महतां राज्याणाम् अन्तर्गतानि बहूनि क्षेत्राणि आगच्छन्ति स्म । देहल्याः शासकः गयासुद्दीन-बलबनस्य **(1266-1287)** प्रशंसायाम् एकस्याः संस्कृतस्य प्रशस्तेः उदाहरणार्थं द्वितीयम् अध्यायं पश्यन्तु एतस्यां प्रशस्त्यां सः एकस्य विशालस्य साम्राज्यस्य शासकः इति उक्तः आसीत् यः पूर्वस्यां दिशि बङ्गप्रान्तात् आरभ्यः पश्चिमदिशि अफगानिस्तानस्य गजनीं यावत् प्रथितम् आसीत् । यस्मिन् च सम्पूर्णं दक्षिणभारतम् अपि सम्मिलितम् आसीत् । गौडक्षेत्रस्य आन्ध्रस्य केरलस्य कर्नाटकस्य महाराष्ट्रस्य गुर्जरादीनां विभिन्नानां प्रान्तानां जनाः तस्य सेनायाः पुरतः पलायनं कुर्वन्ति स्म ।



मानचित्रम् – 3

मिश्रस्य शिहाबुद्दीन-उमरीद्वारा रचितं मसालिक-अल-अबसर-फि-ममालिक-अल-अमसरस्य अनुसारं मुहम्मद-तुगलकस्य राज्यकाले देहली-शासनस्य अन्तर्गत-परिगणिताः प्रान्ताः ।

i सिविस्तानः *ii उच्छः* *iii मुल्तानः* *iv कलानौरः* *v लाहौरः* *vi समाना*

vii सरसुती *viii कुहरामः* *ix हॉसी* *x दिल्ली* *xi बदायू* *xii कन्नौजः*

xiii कडाः *xiv अवधः* *xv बिहारः* *xvi लखनौती* *xvii जाजनगरः* *xviii मालवा*

xix गुर्जर-प्रान्तः *xx देवगिरी* *xxi तेलङ्गाना* *xxii तैलंगः* *xxiii द्वारसमुद्रः* *xxiv मालाबारः*

?

किं भवन्तः जानन्ति, शासकाः एतादृशीः घोषणाः किमर्थं कुर्वन्ति स्म ?

इतिहासकाराः विजयाभियानस्य एतादृशीः घोषणाः अतिशयोक्तिपूर्णाः मन्यन्ते । एतेन सार्धम् एव ते इदं ज्ञातुं प्रयत्नं कुर्वन्ति यत् शासकाः एतस्य उपमहाद्वीपस्य विभिन्नेषु भागेषु स्वस्य अधिकारस्य उल्लेखं किमर्थं नैरन्तर्येण कुर्वन्ति ।

भाषा क्षेत्रं च

1318 तमे वर्षे कविः अमीरखुसरो-महोदयः एतस्मिन् विषये अवधानं कृतवान् आसीत् यत् अस्य देशस्य प्रत्येकं क्षेत्रस्य एका पृथक् भाषा अस्ति : सिन्धी-लाहौरी-काश्मीरी इत्येताः भाषाः अथ च दक्षिणकर्णाटके द्वारसमुद्री, आन्ध्र–प्रदेशे गुर्जरे गुजरी तमिलनाडौ म-अ बारी बङ्गप्रान्ते गौडी पूर्वि-उत्तर-प्रदशे अवधी देहल्याम् अथ च देहल्याः पार्श्वेषु क्षेत्रेषु हिन्दवी इत्येताः भाषाः भाषन्ते स्म । अमीर खुसरो-महोदयः अग्रे उक्तवान् अस्ति यत् एतासां भाषाणां विपरीता एका भाषा संस्कृतम् अपि अस्ति या कस्यचित् विशेषक्षेत्रस्य भाषा नास्ति । इयम् एका प्राचीना भाषा अस्ति "यां केवलं ब्राह्मणाः जानन्ति सामान्या जनता न जानाति" । अमीर-खुसरोद्वारा उल्लिखितानां भाषाणाम् एकां सूचीं निर्मान्तु । एकां सूचीं तासां भाषाणां नाम्ना कुर्वन्तु याः तेषां द्वारा उल्लिखितेषु क्षेत्रेषु अद्य उच्यते : यानि नामानि सदृशानि सन्ति ताः रेखाङ्कितानि कुर्वन्तु अथ च यानि नामानि भिन्नानि सन्ति ताः परितः एकं चक्रं कर्षयन्तु ।

? किं भवन्तः अवधानं दत्तवन्तः यत् समयानुसारं भाषाणां नामानि परिवर्तितानि सन्ति ?

700 ख्रिस्ताब्दं यावत् केषाञ्चित् क्षेत्राणां स्वस्य भौगोलिकाः आयामाः निश्चिताः आसन् तेषां स्वस्य भाषाः सांस्कृतिक्यः विशेषताः स्पष्टाः जाताः आसन् । नवमे अध्याये भवन्तः एतस्मिन् विषये इतोऽपि आधिक्येन सूचनाः प्राप्स्यन्ति । एतानि क्षेत्राणि विशिष्टैः शासक-राजवंशैः सम्बद्धाः आसन् । एतेषां राज्यानां मध्ये महान् द्वन्द्वः अपि चलति स्म । कदाचित् कदाचित् चोल-खलजी-तुगलक-मुगल-सदृशाः राजवंशाः अनेकेषु क्षेत्रेषु प्रथितम् एकं विशालं साम्राज्यम् अपि स्थापयन्ति स्म । एतानि सर्वाणि साम्राज्यानि समानरूपेण स्थैर्यं साफल्यं च न प्राप्नुवन्ति स्म । उदाहरणार्थं तृतीयस्य अध्यायस्य चतुर्थस्य अध्यायस्य च प्रथमायाः तालिकायाः तोलनां कुर्वन्तु । खलजी-वंशस्य मुगलवंशस्य शासनं कियतीम् अवधिं यावत् अचलत् ?

अष्टादश्यां शताब्द्यां मुगलवंशः पतनस्य पथि अग्रेसरः आसीत् । परिणामतः क्षेत्रीयाणि राज्यानि उदयपथम् आरूढानि जातानि । (अध्यायः -10) | परन्तु बहुभ्यः वर्षेभ्यः यत् सर्वक्षेत्रीय-साम्राज्याणां शासनं चलति स्म तेन क्षेत्राणां प्रकृतिः परिवर्तिता आसीत् । तेषु

केषाञ्चित् लघूनां महतां वा राज्यानां शासनं चलति स्म अथ च तेषां राज्यानां अधिकतराः विषयाः एतस्य उपमहाद्वीपस्य अधिकतरेषु भागेषु प्रथितानाम् एतेषां क्षेत्राणां कृते न्यासरूपेण प्राप्ताः आसन्। एतस्य तथ्यस्य ज्ञानं वयं ताभिः परम्पराभिः प्राप्तवन्तः याः एतेभ्यः क्षेत्रेभ्यः उदिताः आसन्। एतासु पराम्परासु परस्परं किञ्चित् वैभिन्न्यं किञ्चित् च सामान्यं वर्तते। एतादृश्यः परम्पराः अस्माभिः प्रशासनस्य सन्दर्भे अर्थव्यवस्थायाः प्रबन्धने उच्चसंस्कृतेः सन्दर्भे भाषायाः च सन्दर्भे लभ्यन्ते। 700 ख्रिस्ताब्दाद् आरभ्यः 1750 ख्रिस्ताब्दस्य मध्यभूतानां सहस्रं वर्षेषु एतेषां विभिन्नानां क्षेत्राणां प्रकृतिः परस्परं पृथक्-भूत्वा पृथक्त्वेन विकासं न गता आसीत्। यद्यपि तेषां चरित्रस्य स्वस्य विशिष्टताः यथावत् आसन्, परन्तु समन्वयस्य सर्वक्षेत्रीयां शक्तीनां प्रभावः अपि तासु जातः आसीत्।

?

जानन्तु यत् किं भवतां राज्यं कदाचित् एतेषां सर्वक्षेत्रीयाणां साम्राज्यानां भागः आसीत् ? यदि आसीत्, तर्हि कियन्तं कालं यावत् इति ?

पुरातनाः नूतनाः धर्माः च

इतिहासस्य येषां सहस्रस्य वर्षाणां निरीक्षणं वयं कुर्वन्तः स्मः एतस्मिन् कालावधौ धार्मिकीषु परम्परासु बहूनि महान्ति परिवर्तनानि आगतानि। दैविकेषु तत्त्वेषु जनानाम् आस्था कदाचित् समूलरूपेण वैयक्तिकस्तरे भवति स्म परन्तु सामान्यरूपेण अस्याः आस्थायाः स्वरूपं सामूहिकं भवति स्म। कस्मिंश्चित् दैविके तत्त्वे सामूहिकी आस्था अर्थात् धर्मः प्रायः स्थानीयानां समुदायानां सामाजिकेन आर्थिकेन च सङ्घटनेन सम्बन्धिता भवति स्म। यथा यथा एतेषां समुदायानां सामाजिकः संसारः परिवर्तितः जातः तथैव एतेषाम् आस्थासु अपि परिवर्तनं नैरन्तर्येण आगतम्।

?

किं भवन्तः संस्कृतज्ञानं एवञ्च ब्राह्मणानां विषये अमीर-खुसरो-महोदयस्य टिप्पणीः स्मरन्ति ?

अद्य वयं यं हिन्दूधर्मं कथयामः तस्मिन् अपि एतस्मिन् एव युगे महत्त्वपूर्णानि परिवर्तनानि आगतानि। एतेषु परिवर्तनेषु कानिचन परिवर्तनानि आसन् नूतनानां देवीनां देवानां च पूजनम् राजभिः मन्दिराणां निर्माणं समाजे च पुरोहितानां रूपे ब्राह्मणानां वर्धितवर्चस्वं अथ च तेषां वर्धन्ती सत्तायाः अवलोकनं भवति।

संस्कृतग्रन्थानां ज्ञानस्य कारणतः समाजे ब्राह्मणानां महान् आदरः भवति स्म। एतेषां संरक्षकाः आसन् नूतनाः शासकाः ये स्वयं स्वस्य प्रतिष्ठां वाञ्छन्ति स्म। एतेषां संरक्षकाणां समर्थनस्य कारणतः समाजे एतेषां प्रभावः इतोऽपि वर्धितम् आसीत्।

संरक्षकः

कश्चित् प्रभावशाली धनी जनः यः कस्यचित् कलाकारस्य शिल्पकारस्य विदुषः अभिजातस्य इव कस्यचित् अन्यस्य जनस्य वा साहाय्यं करोति अथवा तस्य कृते आश्रयं ददाति सः संरक्षकः इति उच्यते ।

अस्मिन् युगे एकं महत्वपूर्णं परिवर्तनं भक्तेः अवधारणायाः रूपे आगतम् । एतस्मिन् ईश्वरस्य कल्पना एकस्मिन् एतादृशस्य प्रेमलस्य ईष्टस्य देवीदेवतायाः रूपेण कृता आसीत् यत्र अर्चकानां विशदं कर्मकाण्डं विना एव भक्तः स्वयं प्राप्तुं शक्नुयात् । एतस्मिन् विषये सार्धम् एव च अन्यासां परम्पराणां विषये भवन्तः अष्टमे अध्याये ज्ञास्यन्ति ।

एषः एव एतादृशः युगः आसीत् यस्मिन् अस्मिन् उपमहाद्वीपे नूतनानां धर्माणाम् अपि आगमनम् अभवत् । कुरान-शरीफस्य सन्देशः भारते सर्वप्रथमं सप्तम्यां शताब्द्यां व्यापारिणाम् आप्रवासिनां च माध्यमेन प्राप्तः । मुस्लिमजनाः कुरानशरीफं स्वकीयं धर्मग्रन्थं मन्यन्ते, केवलम् एकस्य ईश्वर-अल्लाहः इत्यस्य सत्तां स्वीकुर्वन्ति यस्य प्रेम करुणा उदारता च स्वस्मिन् आस्थाधारकं प्रत्येकं जनम् आश्लिष्यति, तस्य जनस्य सामाजिकी पृष्ठभूमिः कीदृशी अपि भवतु नाम ।

केचन शासकाः इस्लाम-धर्माय एतेषां विदुषां कृते धर्मशास्त्रिणां न्यायशास्त्रिणां कृते धर्मावलम्बिनां च कृते संरक्षणं यच्छन्ति स्म । हिन्दुधर्मस्य इव मुस्लिमधर्मस्य अनुयायिनः अपि स्वस्य धर्मस्य भिन्नेन भिन्नेन प्रकारेण व्याख्यां कुर्वन्ति स्म । मुस्लिमेषु केचन शियाः इति आसन् ये पैगम्बरमहाभागस्य जामातारम् अली-महोदयं मुस्लिमजनानां विधिसम्मतं नेतारं मन्यन्ते स्म । अथ च सुन्नी इति आसन् ये खलीफा-जनानां प्रभुत्वं स्वीकुर्वन्ति स्म । इस्लामस्य प्रारम्भिके काले एतस्य धर्मस्य नेतृत्वस्य कर्तारः खलीफा इति उच्यन्ते स्म अथ च अग्रे अपि एषा परम्परा अचलत् । इस्लामीन्यायसिद्धान्तः विशेषतया भारते एव हनफी शफी च एतादृशाः सिद्धान्ताः सन्ति एतासु विभिन्नासु परम्परासु अपि केचन महत्त्वपूर्णाः भेदाः आसन् । एतादृशान् एव धर्मसिद्धन्तान् तथा च रहस्यवादिविचारान् स्वीकृत्य विभिन्नताः दृष्टिपथम् आयान्ति ।

समये इतिहासस्य कालखण्डेषु विचारः

इतिहासकाराः समयं केवलं घट्याः अथवा कालदिग्दिर्शिकायाः इव न पश्यन्ति अर्थात् समयस्य यापनं केवलं घण्टारूपेण एषा घण्टा यापिता अथवा दिनानि व्यतीतानि वर्षाणि वा व्यतीतानि इति रूपेण न पश्यन्ति । तेषां दृष्टिकोणः अयम् अस्ति यत् समयः सामाजिकसङ्घटने आर्थिके सङ्घटने च जायमानानि परिवर्तनानि दर्शयति । अयं दर्शयति यत् विचारेषु विश्वासेसु च कियत् स्थायित्वम् आसीत् । अपि च कियत् परिवर्तनं आगतम् आसीत् । यदि अतीतं समानविशेषतायाः स्थापकेषु महत्सु भागेषु युगेषु अथवा कालेषु विभक्तं कुर्मः तदा समयस्य अध्ययनं किञ्चित् सरलं भवति ।

एकोनविंशत्याः शताब्द्याः मध्ये आङ्गलैः इतिहासकारैः भारतस्य इतिहासः त्रिषु भागेषु विभक्तः आसीत् हिन्दुः मुस्लिमः ब्रिटिशरूपेण च इति । इदं विभाजनं विचारेषु आधारितम् आसीत् यत् शासकानां धर्मः एव एकमात्रं महत्त्वपूर्णम् ऐतिहासिकं परिवर्तनं

भवति अर्थव्यवस्थायां समाजे संस्कृतौ किञ्चित् अपि महत्त्वपूर्णं परिवर्तनं न भवति। एतस्मिन् दृष्टिकोणे एतस्य उपमहाद्वीपस्य अपारायाः विविधतायाः अपि उपेक्षा भवति स्म।

एतं कालविभाजनम् अद्य अल्पतराः इतिहासकाराः एव स्वीकुर्वन्ति । अधिकतराः इतिहासकाराः आर्थिकानां सामाजिकानां च कारकाणाम् आधारेण एव अतीतस्य विभिन्नानां कालखण्डानां विशेषताः निश्चयीकुर्वन्ति । गतवर्षे भवद्भिः ये इतिहासाः पठिताः आसन् तेषु प्राचीनानां समाजानां बहुप्रकारकाणां समावेशाः आसन् यथा आखेटकसंग्राहकाणां प्रारम्भिकस्य समयस्य कृषिकर्मिणां नगराणां ग्रामाणां निवासिनां प्रारम्भिकस्य कालस्य विषये राज्यस्य साम्राज्यस्य च विषये । अस्मिन् वर्षे यं इतिहासं भवन्तः पठिष्यन्ति सः प्रायः मध्यकालीनः इतिहासः उच्यते । एतस्मिन् भवन्तः कृषकसमाजानां विस्तारस्य विषये क्षेत्रीयाणां साम्राज्यिकानां राज्यानाम् उदयस्य विषये कदाचित् कदाचित् तु ग्रामवासिनां वनवासिनां मूल्ये प्रधानधर्माणां रूपे हिन्दुधर्मस्य इस्लामधर्मस्य विकासस्य विषये यूरोपतः व्यापारिसमूहानाम् आगमनस्य विषये इतोऽपि विस्तरेण ज्ञास्यन्ति।

भारतीयेतिहासस्य एतानि सहस्रं वर्षाणि अनेकेषां परिवर्तनानां साक्ष्याणि सन्ति । अन्ततः षोडशशताब्दी अष्टादशशताब्दी च अष्टमशताब्द्याः एकादशशताब्द्याः च बहुभिन्ने आस्ताम् । अतः एतं सम्पूर्णं कालम् एकस्य ऐतिहासिकस्य एकाङ्कस्य रूपेण दर्शनं समस्याभिः रिक्तः नास्ति। पुनः मध्यकालस्य तुलना प्रायः आधुनिकेन कालेन क्रियते । आधुनिकतया सार्धं भौतिक्याः उन्नतेः बौद्धिकप्रगतेः भावः युक्तः अस्ति। एतस्मात् अयम् आशयः निर्गच्छति यत् मध्यकालः रूढिवादी आसीत् तस्मिन् अवधौ किञ्चित् परिवर्तनम् एव न जातम्। परन्तु वयं जानीमः यत् इत्थं न आसीत्।

एतेषां सहस्रस्य वर्षाणाम् अवधौ एतस्य उपमहाद्वीपस्य समाजेषु प्रायः परिवर्तनानि आगतानि केषाञ्चित् क्षेत्राणाम् अर्थव्यवस्था तु एतावती समृद्धा जाता आसीत् यत् सा यूरोपस्य व्यापारिसमूहान् अपि आकर्षितं कर्तुम् आरब्धवती । एतस्य पुस्तकस्य अध्ययनकाले भवन्तः परिवर्तनस्य चिह्नेषु अत्र सक्रियासु ऐतिहासिकीसु प्रक्रियासु अवधानं नैरन्तर्येण कुर्वन्तु । यत्र अपि सम्भवं स्यात् एतस्मिन् पुस्तके भवन्तः यत् पठन्तः सन्ति तस्य तुलनां भवन्तः गतवर्षे पठितैः विषयैः सह कर्तुं प्रयासं कुर्वन्तु । यत्र सम्भवं स्यात् इदं पश्यन्तु यत् कुत्र परिवर्तनानि जातानि सन्ति अपि च कुत्र न जातानि सन्ति अद्य च स्वस्य परिवेशे स्थितस्य संसारस्य उपरि दृष्टिपातं कृत्वा इदम् अपि पश्यन्तु यत् इतोऽपि किञ्चित् परिवर्तितम् अस्ति अथवा पूर्ववत् एव सर्वं विद्यते।

बीज-शब्दः

पाण्डुलिपिः, जातिः,

क्षेत्रम्,

कालविभाजनम्

कल्पनां कुर्वन्तु

भवान् एकः इतिहासकारः अस्ति । अस्मिन् अध्याये उल्लिखितम् एकं विषयम् आर्थिकं सामाजिकं राजनैतिकम् इतिहास-विषयं वा चिन्वन्तु बोधयन्तु च यत् भवतां विचारे तस्य विषयस्य ज्ञानकरणं किमर्थं रुचिकरं भविष्यति ।

पुनः स्मरन्तु

1 अतीतकाले वैदेशिकः कः मन्यते स्म ?

2 अधोलिखितानि तथ्यानि उचितानि सन्ति अथवा अनुचितानि ?

क. 700 शताब्द्याः अनन्तरं यः कालः आसीत् तत्कालेन सम्बद्धाः अभिलेखाः न उपलभ्यन्ते ।

ख. अस्य कालस्य अवधौ मराठाजनैः स्वस्य राजनैतिकस्य महत्त्वस्य स्थापना कृता ।

ग. कृषि-केन्द्रितानां कुटीराणां विस्तारेण सार्धं कदाचित् कदाचित् वनवासिनः स्वस्य भूमितः निष्काश्य बहिः क्रियन्ते स्म ।

घ. शासकः गयासुद्दीनबलबनः असमस्य मणिपुरस्य तथा च काश्मीरस्य शासकः आसीत् ।

3. रिक्तस्थानानि पूरयन्तु –

क. अभिलेखागारेषु ..... स्थाप्यन्ते ।

ख . ..... चतुर्दश्याः शताब्द्याः एकः इतिहासकारः आसीत् ।

ग. .... च ..... एतस्मिन् उपमहाद्वीपे अस्मिन् कालावधौ आनीतानि कानिचन सस्यानि सन्ति ।

4. अस्मिन् काले जातानां केषाञ्चित् प्रौद्यौगिकीयानां परिवर्तनानां तालिकां यच्छन्तु ।

5. एतस्मिन् कालावधौ जातानां केषाञ्चित् धार्मिकानां परिवर्तनानां सूचनां यच्छन्तु ।

आगच्छन्तु जानीमः

6. गतासु बह्वीषु शताब्दीषु "हिन्दुस्तान" शब्दस्य अर्थः कथं परिवर्तितः अस्ति ?

7. जातीनां विषयाः कथं नियन्त्र्यन्ते स्म ?

8. सर्वक्षेत्रीयसाम्राज्यात् भवन्तः किम् अवगच्छन्ति ?

आगच्छन्तु विचारं कुर्वन्तु

9. पाण्डुलिपीनाम् उपयोगे इतिहासकाराणां पुरतः काः काः समस्याः आयान्ति ?

10. इतिहासकाराः अतीतं कालेषु युगेषु च कथं विभागं कुर्वन्ति ? किम् एतस्मिन् कार्ये तेषां पुरतः किमपि काठिन्यम् आगच्छति ?

आगच्छन्तु कृत्वा पश्यामः

11. अध्याये प्रदत्तस्य प्रथमस्य मानचित्रस्य अथवा द्वितीयस्य मानचित्रस्य तुलनाम् उपमहाद्वीपस्य अद्यतनस्य मानचित्रेण सह कुर्वन्तु । तुलनां कुर्वन्तः उभयोः मध्ये यावत्यः समानताः अपि च असमानताः लभ्यन्ते तासां सूचीं कुर्वन्तु ।

12. जानन्तु यत् भवतां ग्रामे नगरे वा अभिलेखाः (रिकार्ड) कुत्र स्थाप्यन्ते । एतान् अभिलेखान् कः सज्जीकरोति ? किं भवतां परिवेशे कश्चित् अभिलेखागारः अस्ति ? तस्य संरक्षणं कः करोति ? तत्र कीदृशाः अभिलेखाः सङ्गृहीताः सन्ति ? तेषाम् उपयोगं के जनाः कुर्वन्ति ?

2 नूतनाः राजानः तेषां राज्यानि च

सप्तम्याः शताब्द्याः अनन्तरं बहूनां राजवंशानाम् उदयः अभवत् । १ मानचित्रे उपमहाद्वीपस्य विभिन्नेषु भागेषु सप्तम्याः शताब्द्याः आरभ्य द्वाद्वशशताब्द्याः मध्ये शासनकर्तारः प्रमुखाः राजवंशाः दर्शिताः सन्ति ।

(१ **मानचित्रम्**) सप्तमशताब्द्याः आरभ्य द्वादशशताब्द्याः प्रमुखाणि राज्यानि ।



? मानचित्रे गुर्जर-प्रतिहार-राष्ट्रकूट-पाल-चोल-चहमानानां (चौहानों) स्थानानां निर्धारणं कुर्वन्तु । किं भवन्तः तेषाम् अद्यतनस्य राज्याणां चयनं कर्तुं शक्नुवन्ति येषां राज्याणाम् उपरि तेषां नियन्त्रणम् आसीत् ?

नूतनानां राजवंशानाम् उदयः

सप्तमशताब्द्याः आगमनात् पूर्वम् उपमहाद्वीपस्य विभिन्नेषु भागेषु महान्तः भूस्वामिनः योद्धृनायकाः अस्तित्वं प्राप्तवन्तः आसन् । राजानः प्रायः एतेभ्यः स्वाधीनरूपेण क्षेत्रपतिरूपेण च मान्यतां यच्छन्ति स्म । तेभ्यः आशा क्रियते स्म यत् ते राज्ञः कृते स्वामिनः च कृते उपहारवस्तूनि आनयेयुः । तेषां राजसभायाम् उपस्थितिः स्यात् तेभ्यः राजभ्यः सैन्यसाहाय्यं च दद्युः । अधिकायां सत्तायां प्राप्तायां सत्यां क्षेत्रस्वामिनः आत्मानं महाक्षेत्रस्वामिनः महामण्डलेश्वराः इति यः सम्पूर्णस्य मण्डलस्य महान् स्वामी भवति तथा च आत्मानं घोषयन्ति स्म । कदाचित् कदाचित् ते स्वस्य स्वामिनः आधिपत्यात् स्वतन्त्राः वयम् इति उद्घोषयन्ति स्म ।

१ चित्रम्
एलोरायाः गुहा 15 इत्यस्य भित्तिचित्रम्, यस्मिन् विष्णुः नरसिंहरूपेण अर्थात् पुरुषसिंहरूपेण दर्शितः अस्ति । इयं राष्ट्रकूटकालस्य कृतिः अस्ति ।

एवंविधं किञ्चन उदाहरणं दक्कने राष्ट्रकूटानाम् आसीत् । प्रारम्भे ते कर्णाटकस्य चालुक्यनृपाणाम् अधीनस्थाः आसन् । अष्टमशताब्द्याः मध्यकाले एकः राष्ट्रकूटः प्रधानदन्तीदुर्गः स्वस्य चालुक्यस्वामिनः अधीनतां अनङ्गीकृतवान् । तं सः पराजितवान् अपि च हिरण्यगर्भनामकं किञ्चन अनुष्ठानं कृतवान् हिरण्यगर्भस्य शाब्दिकः अर्थः स्वर्णस्य गर्भः इति भवति । यदा एतत् अनुष्ठानं ब्राह्मणानां साहाय्येन सम्पन्नं क्रियते स्म तदा एतत् मन्यते स्म यत् एतेन याजकः जन्मना क्षत्रियः नास्ति चेत् अपि अनेन पुनः क्षत्रियत्वं प्राप्स्यति ।

केषुचित् अन्येषु उदाहरणेषु उद्यमि- कुटुम्बानां पुरुषाः स्वस्य राजतन्त्रस्य स्थिरीकरणाय सैन्य-कौशलस्य प्रयोगं कृतवन्तः । उदाहरणार्थं कदम्बः मयूरशर्मणः गुर्जर-प्रतिहारः हरिचन्द्रः च ब्राह्मणाः आसन्, ये स्वस्य परम्परागतां वृत्तिं परित्यज्य शस्त्रम् अङ्गीकृतवन्तः क्रमशः च कर्णाटके राजस्थाने च स्वस्य राज्यानि सफलतापूर्वकं स्थापितवन्तः ।

? किं भवतां विचारे तस्मिन् कालावधौ शासकः भवितुं क्षत्रियस्य रूपेण जन्म महत्त्वपूर्णम् आसीत् ?

राज्यानां प्रशासनव्यवस्था

एतेषु नूतनेषु राजसु कैश्चित् महाराजाधिराजः अर्थात् राज्ञां राजानः त्रिभुवन-चक्रवर्तिनः अर्थात् त्रयाणां भुवनानां स्वामिनः एतादृशाः च अन्ये महान्तः उपाधयः प्राप्ताः । परन्तु एतादृशीनाम् उद्घोषणानाम् अनन्तरं ते स्वस्य क्षेत्राधिपतिभिः सह कृषकाणां व्यापारिणां ब्राह्मणानां च सङ्गठनैः सह च स्वस्य सत्तायाः सहभागितां कुर्वन्ति स्म ।

एतेषु सर्वेषु राज्येषु उत्पादकेभ्यः अर्थात् कृषकेभ्यः पशुपालकेभ्यः शिल्पकारेभ्यः संसाधनानि एकत्रीक्रियन्ते स्म। एते सर्वे प्रायः स्वस्य उत्पादानाम् एकं भागं दातुं त्यक्तुं च बाध्याः क्रियन्ते स्म। कदाचित् एषः भागः कररूपेण स्वीक्रियते स्म यतोहि प्राप्तकर्ता अहं भूस्वामी अस्मि इति उद्घोषयति स्म। राजस्वं व्यापारिभ्यः अपि स्वीक्रियते स्म।

चतुश्शतं कराः !

तमिलनाडुराज्ये शासनकर्तुः चोलवंशस्य अभिलेखेषु विभिन्नप्रकाराणां कराणां कृते 400 तः अधिकाः सूचकशब्दाः मिलन्ति। सर्वाधिकाः उल्लिखिताः कराः सन्ति वेट्टी इति, यः मुद्राधनं परित्यज्य बलात् श्रमस्य रूपेण गृह्यते स्म अर्थात् बलात् श्रमः भूराजस्वं च आस्ताम्। भवने आच्छादिते सति देयः करः, ताडवृक्षं खर्जूर-वृक्षम् आरोढुं सोपानस्य प्रयोगे कृते दीयमानः करः, पारिवारिक-सम्पत्तेः उत्तराधिकारं प्राप्तुं देयः करः इत्यादीनाम् अपि उल्लेखः लभ्यते।

? किं एतेषु कश्चित् करः अद्य स्वीक्रियते।

? प्रशासनस्य इदं रूपम् अद्यतन्याः व्यवस्थायाः केषु सन्दर्भेषु भिन्नः आसीत्।

एतानि संसाधनानि नृपस्य व्यवस्थायाः वित्तीयाः आधाराः भवन्ति स्म, सहैव मन्दिराणां दुर्गाणां च निर्माणे अपि प्रयुक्ताः भवन्ति स्म। संसाधनानि तान् युद्धान् योद्धुम् अपि प्रयुक्ताः भवन्ति स्म, येभ्यः अपहरणरूपेण धनप्राप्तेः भूमेः प्रयोगेण धनप्राप्तेः व्यापारिकमार्गाणां प्रयोगस्य सम्भावनाः भवन्ति स्म।

करादानस्य कृते पदाधिकारिणां नियुक्तिः सामान्यतः प्रभावशालिनां कुटुम्बानां मध्यस्थात् एव क्रियते स्म वंशानुक्रमेण च सा नियुक्तिः भवति स्म। सेनायाम् अपि तथैव भवति स्म। कदाचित् नृपस्य समीपस्थाः सम्बन्धिनः एव एतेषु पदेषु भवन्ति स्म।

प्रशस्तयः भूमेः अनुदानं च

प्रशस्तीषु एतादृश्यः सूचनाः भवन्ति याः शब्दशः सत्याः न अपि भवितुं शक्नुवन्ति। परन्तु एताः प्रशस्तयः अस्मान् बोधयन्ति यत् शासकाः आत्मनः कीदृशान् दर्शयितुम् इच्छन्ति स्म। उदाहरणार्थं बलशालियोध्द्रूरूपेण विजययोध्दृरूपेण च। एताः विद्वद्भिः ब्राह्मणैः रचिताः आसन्, ये प्रायः प्रशासने सहायतां कुर्वन्ति स्म।

नागभट्टस्य उपलब्धयः

केचन शासकाः प्रशस्तिषु स्वस्य उपलब्धीनाम् उल्लेखं कृतवन्तः । भवन्तः गतवर्षे गुप्तशासकस्य समुद्रगुप्तस्य प्रशस्तीनां विषये पठितवन्तः । संस्कृतेन लिखिता मध्यप्रदेशस्य ग्वालियरे प्राप्तायाम् एकस्यां प्रशस्त्यां प्रतिहारनरेशः नागभट्टस्य कर्मणां वर्णनम् अनेन प्रकारेण कृतवान् : । आन्ध्रस्य सैन्धवस्य विदर्भस्य यः महाराष्ट्रस्य एकः भागः अस्ति कलिङ्गस्य राजानः तेषां पुरतः तदा एव पराजिताः जाताः यदा ते राजकुमाराः आसन् ..

ते कन्नौजस्य शासकं चक्रयुद्धं विजितवन्तः ....

ते बङ्गस्य (यः बङ्गालस्य भागः आसीत्) अनर्तस्य (यः गुर्जरस्य भागः आसीत्), मालवाक्षेत्रस्य (यः मध्यप्रदेशस्य भागः आसीत्) किरातस्य (वनवासी) तुरुष्कस्य (तुर्कस्य) वत्सस्य, मत्स्यस्य (एतौ द्वौ उत्तरभारतस्य राज्ये आस्ताम्) एतेषां राज्यानां राज्ञः पराजितवन्तः ।

राजानः प्रायः ब्राह्मणान् भूमेः अनुदानेन पुरस्कृतान् कुर्वन्ति स्म । एते ताम्रपत्रेषु अभिलिखिताः भवन्ति स्म, एते भूमेः प्राप्तिकर्तृणां कृते दीयन्ते स्म ।

?

अस्मिन् अभिलेखे उल्लिखितेषु क्षेत्रेषु कानिचन प्रथमे मानचित्रे अन्वेषणस्य प्रयासं कुर्वन्तु । अन्यैः राजभिः अपि एतादृशीः उद्घोषणाः कृताः आसन् । भवतां मतेः अनुसारं तैः एतादृश्यः उद्घोषणाः किमर्थं कृताः स्युः ?

चित्रम् -2 अयं किञ्चित् संस्कृतेन तमिलेन च लिखितः ताम्रपत्राणाम् एकः सङ्ग्रहः अस्ति , यस्मिन् नवम्यां शताब्द्याम् एकेन शासकेन प्रदत्तस्य भूमेः अनुदानस्य उल्लेखः अस्ति । याभिः शृङ्खलाभिः एतानि सबद्धानि सन्ति तासु राजानां मुद्रा अङ्किता अस्ति या इदं ज्ञापयितुम् अस्ति यत् अयम् एकः प्रामाणिकः अभिलेखः अस्ति ।

भूमेः सार्धं किं किं दीयते स्म ?

अयं चोलैः प्रदत्तस्य एकस्य भूमेः अनुदानस्य तमिलभागस्य एकः अंशः अस्ति । अस्माभिः मृदायाः क्षेत्रसीमां निर्माय सार्धम् एव कण्टकिलान् स्तम्बान् योजयित्वा भूमेः सीमाः चिह्निताः कृताः । एतस्यां भूमौ एतानि वस्तूनि सन्ति, फलिनः वृक्षाः जलं भूमिः उद्यानानि फलोद्यानानि वृक्षाः कूपाः रिक्तस्थानं गौचारणस्थलम् एकः ग्रामः वापी मञ्चाः कुल्यः परिखाः नद्यः क्लिना भूमिः जलाशयः अन्नागारः मत्स्यानां तडागाः मधुमक्षिकाणां छत्राणि गभीराः जलाशयाः च ।

यः इमां भूमिं लभते सः एतया भूम्या करसङ्ग्रहणं कर्तुं शक्नोति । सः न्यायाधिकारिभिः दण्डस्य रूपेण योजितान् करान् स्वीकर्तुं शक्नोति, ताम्बूलपत्रेषु निर्धारितः करः वयेषु वस्त्रेषु निर्धारितः करः, सार्धम् एव वाहनप्रयोक्तृणां कृते निर्धारितं करं स्वीकर्तुं शक्नोति । सः पक्वेष्टकैः राजस्वम् आधारीकृत्य महतः प्रकोष्ठान् रचयितुं शक्नोति लघूनां दीर्घाणां च कूपानां च निर्माणं कर्तुं शक्नोति वृक्षाणां कण्टकिलानां स्तम्बानां च आरोपणं कर्तुं शक्नोति । यदि आवश्यकतायां सत्यां सः सेचनार्थं कूल्यानां निर्माणं कर्तुं शक्नोति । तेन इदं सुनिश्चेतव्यं यत् जलस्य दुरूपयोगः न स्यात् तथा च तटबन्धानां निर्माणं भवेत् । लेखे सेचनस्य यावतां सम्भावितानां स्रोतसाम् उल्लेखः अस्ति तेषां सूचीं कुर्वन्तु विचारविमर्शं च कुर्वन्तु यत् एतेषां साधनानां प्रयोगः कथं भविष्यति ।

द्वादश्यां शताब्द्याम् एकं बृहत्संस्कृतस्य काव्यम् अपि रचितं, यस्मिन् काश्मीरेषु शासनकर्तृणां राज्ञाम् इतिहासः वर्णितः अस्ति । एतम् इतिहासं कल्हण नामकः कश्चन रचनाकारः रचितवान् । कल्हणः स्वस्य वृन्तान्तं लेखितुं शिलालेखानाम् अभिलेखानां प्रत्यक्षदर्शिनां वर्णनानां प्राक्तनीयैः इतिहासैः सह विविधानां स्रोतसां प्रयोगं कृतवान् । प्रशस्तिनां लेखकेभ्यः भिन्नः सः प्रायः शासकानां तेषां नीतीनां विषये च आलोचनात्मिकीं दृष्टिकोणं दर्शयति, अतः द्वादश्याः शताब्द्याः कृते अयम् एकः असाधारणः ग्रन्थः आसीत् ।

धनाय युद्धम्

भवन्तः इदम् अनुभूतवन्तः स्युः यत् एतेषु प्रत्येकं शासकस्य राजवंशस्य आधारः कश्चित् क्षेत्रविशेषः आसीत् । ते अन्येषु क्षेत्रेषु अपि नियन्त्रणं कर्तुं प्रयासं कुर्वन्ति स्म ।

एकः विशेषरूपेण वाञ्छनीयं क्षेत्रम् आसीत् – गङ्गायाः उपत्यकायां कन्नौजनगरम् । गुर्जर-प्रतिहारस्य राष्ट्रकूटस्य पालवंशानां च शासकाः शताब्दान् यावत् कन्नौजस्य उपरि नियन्त्रणं कर्तुं परस्परं युद्धं कृतवन्तः । यतोहि एतस्य दीर्घतरस्य युद्धस्य त्रयः पक्षाः आसन्, अतः इतिहासकाराः प्रायः एतस्य चर्चां त्रिपक्षीयसङ्घर्षस्य रूपेण कृतवन्तः ।

यथा वयं 62 तः 66 तमं पृष्ठं यावत् द्रक्ष्यामः शासकाः दीर्घाणां मन्दिराणां निर्माणं कारयित्वा स्वस्य सत्तायाः तथा च संसाधनानां प्रदर्शनस्य च प्रयासं कृतवन्तः । अतः यदा ते अन्याऽन्येषु राज्येषु आक्रमणं कुर्वन्ति स्म, तदा मन्दिराणि अपि नष्टीकुर्वन्ति स्म, ये कदाचित् कदाचित् बहुसम्पन्नाः भवन्ति स्म । भवन्तः पञ्चमे अध्याये एतेषां विषये अधिकं पठिष्यन्ति ।

अफगानिस्तानस्य गजनी इत्यस्य शासकः महमुदः एतादृशेषु शासकेषु सर्वाधिकः प्रसिद्धः अस्ति। सः 997 तमाद् शताब्दाद् 1030 तमं शताब्दं यावत् शासनं कृतवान्। सः स्वस्य नियन्त्रणस्य विस्तारं मध्यैशियायाः भागान् यावत् अथ च ईरानस्य उपमहाद्वीपस्य च उत्तर-पश्चिमीभागान् यावत् विस्तृतम् आसीत्। सः प्रायः प्रत्येकस्मिन् वर्षे उपमहाद्वीपानाम् उपरि आक्रमणं करोति स्म । तस्य लक्ष्यं सम्पन्नानि मन्दिराणि आसन् येषु गुर्जरप्रान्तस्य सोमनाथस्य मन्दिरम् अपि सम्मिलितम् आसीत्। महमूदः यद् धनं परिहृत्य नीतवान्, तस्य एकः विशालः भागः गजनीमध्ये एकस्य वैभवशालिन्याः राजधान्याः निर्माणे व्ययः जातः।

शासकः महमूदः स्वात्मना जीतानां जनानां विषये अपि बहूनि तथ्यानि जानाति स्म सः अल-बेरूनी नामकम् एकं विद्वांसम् एतस्य उपमहाद्वीपस्य विवरणस्य लेखनस्य कार्यम् अर्पितवान् । अरबीभाषायां लिखिता तस्य कृतिः 'किताब-उल-हिन्द' अद्य अपि इतिहासकाराणां कृते एकं महत्त्वपूर्णं स्रोतः अस्ति । अल-बेरूनी-महोदयः एतस्य रचनार्थं संस्कृतस्य विद्वद्भ्यः परामर्शं स्वीकृतवान्।

योद्धृषु अन्येषु राजसु चाहमानः अपि आसीत् यः अनन्तरं चौहानस्य रूपेण विख्यातः। सः देहल्याः अजमेरस्य च पार्श्वेषु क्षेत्रेषु शासनं करोति स्म। सः पश्चिमं पूर्वं च यावत् स्वस्य नियन्त्रणक्षेत्रस्य विस्तारं कर्तुम् इष्टवान्, यत्र सः गुर्जरस्य चालुक्यैः पश्चिमी-उत्तर-प्रदेशस्य गहडवालैः सः युद्धं कर्तुं बाध्यः जातः। चाहमानानां सर्वप्रसिद्धः शासकः पृथ्वीराज-तृतीयः आसीत् यस्य कालः 1168 तः आरभ्यः 1192 इति यावत् आसीत्, यः मुहम्मदगोरी नामकम् अफगानशासकं 1191 तमे वर्षे पराजितवान्, परन्तु अपरस्मिन् एव वर्षे 1192 तमे वर्षे तस्मात् पराजितः अभूत्।

?

1. मानचित्रं पश्यन्तु तानि च कारणानि ज्ञापयन्तु, येषां कारणतः एते शासकाः कन्नौजस्य गङ्गायाः उपत्यकायाः उपरि नियन्त्रणम् इच्छन्ति स्म।

सुल्तान इति

अरबीभाषायाः शब्दः अस्ति, यस्य अर्थः अस्ति शासकः।

?

1 मानचित्रं पुनः पश्यन्तु अथ च विचार-विमर्शं कुर्वन्तु यत् चाहमानाः स्वस्य क्षेत्रस्य विस्तारं किमर्थम् इष्टवन्तः स्युः ?

चोलराज्यं – समीपात् एकः दृष्टिपातः



२ मानचित्रं चोलराज्यं तस्य प्रतिवेशिनः च

उरैयूरतः तंजावूरं यावत्

चोलवंशः सत्तायां कथम् आगतः ? कावेर्याः नदीमुखपुलीने मुट्टरियारनाम्नः प्रसिद्धः एकस्य लघुतमस्य प्रमुखस्य कुटुम्बस्य सत्ता आसीत् ते कांचीपुरम् इत्यस्य पल्लवस्य राज्ञाम् अधीनाः आसन्। उरइयारस्य चोलवंशीयस्य प्राचीनस्य प्रमुखपरिवारस्य विजयालयः नवम्यां शताब्द्याः मध्ये मुट्टरियारान् पराजित्य एतस्मिन् नदीमुखपुलीने आधिपत्यं स्थापितवन्तः। तत्र सः तंजावूरनगरस्य निशुम्भसूदिन्याः देव्याः मन्दिरं च रचितवान्।

विजयालयस्य उत्तराधिकारिणः प्रतिवेशिनः क्षेत्राणि जीतवन्तः तस्य राज्यं च स्वस्य क्षेत्रफले शक्तौ च द्वाभ्यां रूपाभ्यां वर्धितम्। दक्षिणस्य उत्तरस्य च पांड्यनस्य पल्लवस्य च क्षेत्राणि एतस्य राज्यस्य भागाः स्वायतीकृताः। राजराजप्रथमः यः सर्वेषु शक्तिशाली चोलशासकः मन्यते, **985** शताब्द्यां नृपः बभूव सः एव एतेषु अधिकतरेषु क्षेत्रेषु स्वस्य नियन्त्रणस्य विस्तारं कृतवान्। सः साम्राज्यस्य प्रशासनस्य अपि पुनर्घटनं कृतवान्।

राजराजस्य पुत्रः राजेन्द्रप्रथमः तस्य नीतिः नैरन्तर्येण स्थापितवन्तः सः गङ्गायाः उपत्यकायाः उपरि श्रीलङ्कायाः दक्षिण-पूर्वैशियायाः च देशेषु आक्रमणं च कृतवान् । एतेषाम् अभियानानां कृते सः एकां जलसेनाम् अपि सज्जीकृतवान् ।

भव्यमन्दिराणि कांस्यमूर्तिकलाः च

राजराजेन राजेन्द्रप्रथमेन च निर्मापितानां तंजावूरस्य गंगयीकोंडचोलपुरस्य च बृहन्म-न्दिराणि स्थापत्य-दृष्ट्या मूर्तिककलायाः च दृष्ट्या कश्चन चमत्कारः अस्ति ।

चोलमन्दिराणि प्रायः स्वस्य पार्श्वस्थानां विकासशीलानां निवासानां केन्द्रभूतानि जातानि । एते शिल्पोत्पादनस्य केन्द्राणि आसन् । एतानि मन्दिराणि शासकैः अन्यैः जनैः च प्रदत्तया भूम्या अपि सम्पन्नाः जाताः आसन् । एतस्य भूमेः उत्पादनं तेषां सर्वेषां विशेषज्ञानां निर्वाहार्थं व्ययीभवति स्म, ये मन्दिरस्य समीपे निवसन्ति स्म तेषां कृते पुरोहिताः कार्यं कुर्वन्ति स्म, मालाकारः पाचकः मलवाहकः अथवा प्रधानः

3-चित्रम्
गंगयीकोंडचोलपुरस्य मन्दिरं

छदिः येन प्रकारेण क्रमशः कृषा भवत् दृश्यते, तस्मिन् अवधानं कुर्वन्तु । बाह्याः भित्तीन् अलङ्कर्तुं पाषाणस्य याः प्रतिमाः अलङ्कृताः सन्ति, ताः अपि अवलोकयन्तु ।

सङ्गीतकारः नर्तकः इत्यादयः । अपरेषु शब्देषु मन्दिराणि केवलं पूजाराधनयोः च एव स्थानानि न आसन् तानि मन्दिराणि आर्थिकजीवनस्य सामाजिकजीवनस्य सांस्कृतिकजीवनस्य च केन्द्राणि अपि आसन् । मन्दिरैः सार्धं सम्बद्धेषु शिल्पेषु सर्वाधिकं विशिष्टम् आसीत् – कांस्यप्रतिमानां निर्माणस्य कार्यम् । चोलकालस्य कांस्यप्रतिमाः संसारस्य उत्कृष्टतराः कांस्यप्रतिमासु गण्यन्ते । अधिकतराः प्रतिमाः तु देवीनां देवतानां च एव भवन्ति स्म, परन्तु काश्चन प्रतिमाः भक्तानाम् अपि निर्मिताः आसन्।

कृषिः सेचनव्यवस्था च

चोलानां बह्व्यः उपलब्धयः कृषौ जातानां नूतनानां विकासानां माध्यमेन सम्भवाः जाताः । द्वितीये मानचित्रे पश्यन्तु । अवधीयतां यत् कावेरीनदी बङ्गालस्य आखाते मेलनात् पूर्वं बह्वीषु लघ्वीषु शाखासु विभक्ता जायते । एताः शाखाः पुनः पुनः जलम् उद्वेलयन्ति, येन तटेषु उर्वरामृत् तत्र तत्र लग्ना भवति । शाखानां जलं विशेषतः तण्डुलस्य कृषेः कृते आवश्यकीम् आर्द्रताम् अपि प्रयच्छति।

यद्यपि तमिलनाडुराज्यस्य विविधेषु भागेषु कृषिः पूर्वतः एव विकसिता जाता आसीत् परञ्च पञ्चमम्यां षष्ट्यां च शताब्द्यां आगत्य एव एतस्मिन् क्षेत्रे कृषिकार्यं बाहुल्येन प्रारब्धम्। केषुचित् क्षेत्रेषु वनानि कर्तनीयानि आसन् अपि च अपरेषु केषुचित् क्षेत्रेषु भूमिः समतला करणीया आसीत् । नदीतटपुलिनेषु जलौघं नियन्त्रयितुं तटबन्धाः क्रियन्ते स्म जलानि च क्षेत्राणि यावत् नेतुं कुल्यानां निर्माणं भवति स्म। केषुचित् क्षेत्रेषु वर्षाभ्यन्तरे सस्यद्वयं प्ररुह्यते स्म।

4. चित्रम्

एका चोलकालस्य कांस्यप्रतिमा। कियत्सावधानं सा अलङ्कृता अस्ति, एतां ध्यानेन पश्यन्तु। एतादृश्यः प्रतिमाः कथं निर्मीयन्ते स्म, एतत् ज्ञातुं षष्ठाध्यायं पश्यन्तु।

चित्रम् -5

नवम्याः शताब्द्याः तमिलनाडोः एकं जलद्वारम् । जलाशयात् नद्याः शाखासु जलस्य प्रवाहः अनेन नियन्त्र्यते स्म । एतेन जलेन क्षेत्राणि सिच्यन्ते स्म ।

केषुचित् स्थानेषु सस्यानां सेचनं कृत्रिमरूपेण करणीयमिति आवश्यकम् आसीत् । सेचनार्थम् अनेकासां पद्धतीनां प्रयोगः क्रियते स्म । केषुचित् क्षेत्रेषु कूपाः खनिताः । केषुचित् अन्येषु क्षेत्रेषु वृष्टेः जलानि एकत्रीकर्तुं विशालाः सरोवराः निर्मिताः । स्मरन्तु यत् सेचनकार्ये योजनायाः आवश्यकता भवति, यथा श्रमाणां संसाधनानां च व्यवस्थितकरणम्, एतेषां कार्याणां पर्यवेक्षणम् इदं सुनिश्चयीकरणं यत् जलस्य वण्टनं कथं स्यात् । अधिकतराः नूतनाः शासकाः सार्धम् एव ग्रामवासिनः जनाः एतासु गतिविधीषु सक्रियरूपेण रुचिं दर्शितवन्तः ।

साम्राज्यस्य प्रशासनम्

प्रशासनं कथं सङ्घटितम् आसीत् ? कृषकाणां निवासाः ये , "उर" इति उच्यन्ते स्म, सेचित-कृषिणा सह बहुसमृद्धा जाता आसीत् । एतादृशानां ग्रामाणां समूहः नाडु इति उच्यते स्म । ग्रामपरिषद् नाडुः च न्यानकरणस्य करादानस्य च सदृशानां प्रकाशकीयकार्याणां सम्पादनं कुर्वन्ति स्म ।

वेल्लालजातेः धनाढ्याः कृषकाः केन्द्रियचोलसर्वकारस्य सन्निधौ नाडु इत्यस्य कार्ये सम्यक् नियन्त्रणं प्राप्तवन्तः आसन् । तेषु बहुभ्यः धनाढ्येभ्यः भूस्वामिभ्यः चोलराजानः समानरूपेण "मुवेंदवेलन" इति अर्थात् त्रयाणां नृपाणां कृते स्वस्य सेवायाः प्रदाता वेलन इति अथवा कृषकः । "अरइयार" अर्थात् प्रधानसदृशाः उपलब्धयः प्रदत्ताः तेभ्यः च केन्द्रे महत्त्वपूर्णानि राजकीयानि पदानि अर्पितवन्तः ।

भूमेः प्रकाराः

चोलाभिलेषु भूमेः विभिन्नानां कोटीनाम् उल्लेखः उपलभ्यते ।

वेल्लनवगायी

अब्राह्मणस्य कृषकस्वामिनः भूमिः

ब्रह्मदेयम्

ब्राह्मणेभ्यः उपाहाररूपेण प्रदत्ता भूमिः

शालाभोगः

कस्यचित् विद्यालयस्य संरक्षणार्थं भूमिः

देवदानम्,तिरुनमट्टुक्कनी

मन्दिरस्य कृते उपहाररूपेण प्रदत्तभूमिः

पल्लिच्चंदम

जैनसंस्थानेभ्यः दानरूपेण प्रदत्ता भूमिः ।

अस्माभिः दृष्टम् अस्ति यत् ब्राह्मणाः यथाकालं भूम्यनुदानम् अथवा ब्रह्मदेयं प्राप्तवन्तः । परिणामतः कावेरी-उपत्यकायाम् अथ च दक्षिण भारतस्य अपरेषु भागेषु सहस्रं ब्राह्मणनिवासाः अस्तित्वं गताः ।

प्रत्येकं ब्रह्मदेयस्य सम्भालनं प्रमुखाणां ब्राह्मणभूस्वामिनाम् एका करोति स्म । एताः सभाः अतीव कुशलतापूर्वकं कार्यं कुर्वन्ति स्म । एतासां निर्णयाः शिलालेखेषु प्रायः मन्दिराणां पाषाणभित्तिषु विवरणसहितं दीयन्ते स्म । "नगरम्" इत्यस्य नाम्नः ज्ञातव्यापारिणां सङ्घाः अपि प्रायः नगरेषु प्रशासनिककार्याणि सम्पादयन्ति स्म ।

तमिलनाडुराज्यस्य चिंगलपुटजनपदस्य उत्तरमेरुरतः प्राप्तेषु अभिलेखेषु एवम्विधं वर्णनं सविस्तारम् अस्ति यत् ब्राह्मणानां सभायाः सङ्घटनं कीदृशम् आसीत् । सेचनव्यवस्थायाः कार्याणां कृते उद्यानां मन्दिर इत्यादीनां संरक्षणार्थं च सभायां विभिन्नाः समितयः भवन्ति स्म । एतासु सदस्यतार्थं ये जनाः योग्याः भवन्ति स्म. तेषां नामानि तालपत्रस्य लघुचिटिकासु लिख्यन्ते स्म मृत्पात्रेषु च स्थाप्यन्ते स्म अथ च कश्चित् लघुबालकः प्रत्येकं समितेः कृते क्रमशः एकैकशः एकां चिटिकां निष्कासयितुम् उच्यते स्म ।

अभिलेखाः लिखितसामग्री च

उत्तरमेरुरस्य अभिलेखस्य अनुसारं सभायाः सदस्यता :

सभायाः सदस्यतार्थम् इच्छुकैः जनैः एतादृश्याः भूमेः स्वामिभिः भवितव्यं यतः भूराजस्वं स्वीक्रियते ।

तेषां पार्श्वे स्वकीयं गृहं भवेत् । तेषां वयः 35 वर्षतः 70 वर्षाणां आभ्यन्तरे भवेत् । ते वेदानां ज्ञातारः भवेयुः ।

ते प्रशासनिकविषयाणां सम्यक् ज्ञातारः भवेयुः निष्ठावन्तः च भवेयुः ।

यदि कश्चित् गतत्रिभ्यः वर्षेभ्यः कस्याश्चित् समितेः सदस्यः स्यात् तर्हि सः कस्याश्चित् अन्यायाः समितेः सदस्यः न भवितुं शक्नोति । यः आत्मनः स्वसम्बन्धिनां च धान्याकोशान् अथवा सङ्ख्यानपञ्जिकायां येषां नामानि न योजितवान् स्यात् सः निर्वाचने भागं ग्रहीतुं शक्नोति ।

अभिलेखेषु नृपाणां शक्तिसम्पन्नानां च पुरुषाणां च विषये तु सूचनाः उपलभ्यन्ते परन्तु एतत् ज्ञानं दुष्करम् अस्ति यत् सामान्यपुरुषाणां स्त्रियाणां च जीवनम् एतेषु राज्येषु कथम् आसीत् ? द्वादशशताब्द्याः तमिलकृतेः पेरियापूरणमतः एकम् उद्धरणं पश्यामः –

अडनूरस्य सीमासु तृणमयैः लघुकुटीरैः परावृतः पुलाया (कश्चन तादृशः समाजः यान् ब्राह्मणाः वेल्लालाः च प्रतिष्ठितसमाजात् बहिः मन्यन्ते स्म ।) इति जनानाम् एकः लघुपुरवा इति आसीत्, यस्मिन् निम्नजातीयाः कृषिकर्मिणः निवसन्ति स्म । चर्ममयेषु गृहेषु कुक्कुटानां कुक्कुटीनां च समूहाः समूहेषु कुटीरान् परितः भ्रमन्ति स्म । कृष्णवर्णीयाः बालकाः ये कृष्णवर्णयुक्तानि कङ्कणानि धृत्वा विराजन्ते स्म, लघून् कुक्कुरशावकान् उत्थापयन्तः गच्छन्तः आसन् । ... मारूद इति वृक्षाणां छायासु एका श्रमिकी स्वस्य शिशून् चर्ममये एकस्मिन् आच्छादके शायितवती । आम्रवृक्षाः अपि सन्ति, येषां वृक्षाणां शाखासु पणवाः अवलम्बिताः आसन् अथ च नारिकेलस्य वृक्षाणाम् अधः भूमौ निर्मितेषु गर्तेषु लघुशिरस्काः शुनक्यः स्वशिशून् दुग्धं पाययित्वा शयितवत्यः आसन् । रक्तशिखकुक्कुटाः प्रातःकाले पुलैयार इत्येतं दिनचर्यायाः पालनात् प्राक् एव ध्वनिः कृता । धान्यं कुटट्न्तीनां लहरसदृशीनां पुलाया इति स्त्रीणां गीतस्य ध्वनिः प्रातःकाले कांजीवृक्षस्य छायायां विस्तारं गच्छति स्म ।...

? किं भवन्तः अनुभवन्ति यत् महिलाः एतासु सभासु सहभागितां कुर्वन्ति स्म ? किं भवन्तः अङ्गीकुर्वन्ति यत् समितीनां सदस्यानां चयनार्थं लाटरी इति एषः उपायः उपयोगी भवति ?

? किं एतस्मिन् पुरवे इत्यस्मिन् केचन ब्राह्मणाः आसन् ? यावत्यः गतिविधयः चलन्ति स्म तासां वर्णनं कुर्वन्तु । भवतां विचारस्य अनुसारं अभिलेखेषु एतेषां सर्वेषाम् उल्लेखः किमर्थं न कृतः अस्ति ?

अन्यत्र

ताङ्गवंशस्य युगस्य चीनदेशः

चीनदेशे ताङ्गराजवंशस्य अन्तर्गतं किञ्चन साम्राज्यं स्थापितं जातम्, यत् प्रायः त्रिशतं वर्षाणि यावत् अर्थात् सप्तमशताब्द्याः आरभ्यः दशमशताब्दीं यावत् सत्तायाम् अतिष्ठत् । एतस्य राजधानी शियान इति विश्वस्य बृहत्तमेषु नगरेषु अन्यतमा आसीत्, यत्र तुर्कीजनाः ईरानिजनाः जापानिजनाः कोरियायीजनाः गमनागमनं कुर्वन्ति स्म ।

ताङ्गसाम्राज्यं परीक्षायाः माध्यमेन नियुक्तैः सेवकैः प्रशासितं भवति स्म । एतासु परीक्षासु प्रत्येकम् इच्छुकः जनः उपवेष्टुं शक्नोति स्म । अधिकारिणां चयनस्य इयं व्यवस्था कैश्चित् परिवर्तनैः सह 1911 तमं वर्षं यावत् अचलत् ।

भारतीयोपमहाद्वीपे प्रचलिताभ्यः व्यवस्थाभ्यः इयं व्यवस्था कया दृष्ट्या भिन्ना आसीत् ?

कल्पनां कुर्वन्तु

भवन्तः एकस्याः सभायाः निर्वाचने विद्यमानाः सन्ति । यत्किमपि भवन्तः पश्यन्ति शृण्वन्ति च तस्य वर्णनं कुर्वन्तु ।

पुनः स्मरन्तु

१ युग्मान् निर्मान्तु

गुर्जर-प्रतिहारः	पश्चिमीदक्कनः
राष्ट्रकूटः	बङ्गालः
पालः	गुजरातः राजस्थानं च
चोलः	तमिलनाडुः

2 **"त्रिपक्षीय-सङ्घर्षः"** इत्यस्मिन् युक्ताः त्रयः पक्षाः के के आसन् ?

3 चोलसाम्राज्ये सभायाः कस्याश्चित् समितेः सदस्यः भवितुम् आवश्यक्यः प्रतिभूतयः काः आसन् ?

4 चाहमानानां नियन्त्रणे आगम्यमाने द्वे प्रमुखनगरे के आस्ताम् ?

आगच्छन्तु जानीमः

5 राष्ट्रकूटाः कथं शक्तिशालिनः जाताः ?

6 नूतनाः राजवंशाः स्वीकृतिं प्राप्तुं किम् अकुर्वन् ?

7 तमिलक्षेत्रे किंप्रकारायाः सेचनव्यवस्थायाः विकासः जातः ?

8 चोलमन्दिरैः सह काः काः गतिविधयः युक्ताः आसन् ?

आगच्छन्तु विचारयन्तु

9 प्रथमं मानचित्रं पुनः पश्यन्तु अन्विष्यन्तु च यत् यस्मिन् प्रान्ते भवन्तः निवसन्ति, तस्मिन् कानिचन पुरातनानि लोकतन्त्राणि आसन् अथवा न आसन् ?

10 यादृशानि पंचायतनिर्वाचनानि अद्य वयं पश्यामः, तेभ्यः उत्तरमेरुरस्य निर्वाचनानि केन प्रकारेण भिन्नानि आसन् ?

आगच्छन्तु कृत्वा पश्यामः

११ अस्मिन् अध्याये दर्शितेभ्यः मन्दिरेभ्यः स्वस्य परिवेशस्य कस्यचित् वर्तमानस्य मन्दिरस्य तुलनां कुर्वन्तु अथ च याः समानताः अन्तराणि च भवन्तः पश्यन्ति तानि बोधयन्तु।

१२ अद्यतनीये काले स्वीकृतानां कराणां विषये इतोऽपि ज्ञानं गृह्णन्तु। किम् एते साक्षात्-धनस्य रूपेण सन्ति ? वस्तुनः रूपेण सन्ति अथवा श्रमसेवानां रूपेण च सन्ति ?

बीजशब्दः

सामन्तः

मन्दिरम्

नाडुः

सभा

3 देहल्याः शासकाः

वयं द्वितीये अध्याये दृष्टवन्तः यत् कावेरीनदीमुखपुलिनसदृशानि क्षेत्राणि महतां राज्यानां केन्द्राणि जातानि आसन् । किं भवन्तः अनुभूतवन्तः यत् द्वितीये अध्याये एतादृशस्य कस्यचित् राज्यस्य उल्लेखः नास्ति यस्य राजधानी देहली स्यात् ? एतस्य कारणम् इदम् अस्ति यत् महत्त्वपूर्णं देहलीनगरं द्वादश्यां शताब्द्याम् एव अस्तित्वम् आगतम् ।

प्रथमायां तालिकायां दृष्टिपातं कुर्वन्तु । आदौ तोमरराजपुत्राणां काले देहली कस्य साम्राज्यस्य राजधानी अभवत् । द्वादशशताब्द्याः मध्ये तोमराः अजमेरस्य चौहानजनैः पराजिताः । तोमराणाम् अथ च चौहानजनानां काले एव देहली वाणिज्यस्य एकं महत्वपूर्णं केन्द्रम् अभवत् । एतस्मिन् नगरे बहवः समृद्धशालिनः जैनव्यापारिणः निवसन्ति स्म । ये अनेकेषां मन्दिराणां निर्माणं कारितवन्तः । अत्र देहलीवालाख्याः नाणकाः अपि निर्मीयन्ते स्म ये अत्यधिकाः प्रचलिताः आसन् ।

मानचित्रम् १

त्रयोदश-चतुर्दश-शताब्द्योः देहलीशासनस्य कानिचन चितानि नगराणि ।

त्रयोदशशताब्द्याः आरम्भे देहलीशासनस्य स्थापना अभवत् अथ च तेन सार्धम् एव देहली एकस्याम् एतादृश्यां राजधान्यां परिवर्तिता यस्याः नियन्त्रणम् एतस्य उपमहाद्वीपस्य वृहति क्षेत्रे विस्तृतम्

आसीत् । प्रथमायां तालिकायां पुनः दृष्टिपातं करोतु अथ च तेषां पञ्चवंशानां परिचयं प्राप्नुवन्तु यैः मिलित्वा देहल्याः शासनम् अभवत् । यत् क्षेत्रम् वयम् अद्य देहल्याः नाम्ना जानीमः तत्र एते शासकाः अनेकानि नगराणि स्थापितवन्तः । प्रथमं मानचित्रं दृष्ट्वा देहली-ए-कुह्ना इत्येतं, सीरी इत्येतं जहांपनाह इत्येतं च परिचिन्वन्तु ।

तालिका – १

देहल्या: शासका:

राजपूतवंश:

तोमर:	आरम्भिक-द्वादश-शताब्दी – ११६५
अनङ्गपाल:	११३० -११४५
चौहान:	११६५ – ११९२
पृथ्वीराज-चौहान:	११७५ - ११९२
प्रारम्भिक-तुर्की-शासक:	**१२०६ - १२९०**
कुत्बउद्दीन-ऐबक:	१२०६ -१२१०
शमसुद्दीन-इल्तुतमिश:	१२१०- १२३६
रजिया	१२३६ - १२४०
गयासुद्दीन-बलबन:	१२६६ - १२००



इल्तुतमिश इत्यस्य स्मारक:

खलजी-वंश:	**१२९० -१३२०**
जलालुद्दीन-खलजी	१२९० -१२९६
अलाउद्दीन-खलजी	१२९० -१३१६
तुगलक-वंश:	**१३२० - १४१४**
गयासुद्दीन –तुगलक:	१३२० - १३२४
मुहम्मद-तुगलक:	१३२४ - १३५१
फिरोज-शाह-तुगलक:	१३५१ - १३८८

अलाई-द्वारम्

सैयद-वंश:	**१४१४**
खिज-खान:	१४१४ - १४२१
लोदी-वंश:	**१४५१ - १५२६**
बहलोल-लोदी	१४५१-१४८९

फिरोजशाह-तुगलकस्य स्मारक:

चित्रम् – १

पाण्डुलिपीः सज्जीकर्तुं चत्वारः चरणाः सन्ति ।

१ कर्गदस्य सज्जीकरणम् ।

२ लेखनकार्यम् ।

३ महत्त्वपूर्ण-शब्दानाम् अनुच्छेदानां च ध्यानाकर्षणाय सुर्वणं विलयावस्थां नीत्वा तस्य प्रयोगः ।

४ पुस्तकावरणस्य सज्जीकरणम् ।

देहल्याः शासकानां विषये सूचनाः – कथम् ?

यद्यपि अभिलेखानां नाणकानां स्थाप्यकलानां च माध्यमेन पर्याप्ता सूचना उपलभ्यते, परन्तु इतोऽपि महत्त्वपूर्णाः ते इतिहासाः दिनाङ्काः (तारीख(एकवचनं), तवारीख (बहुवचनम्) च सन्ति ये शासकानां शासनकाले प्रशासनस्य फारसीभाषायां लिखिताः आसन् ।

तवारीखस्य लेखक-मन्त्रि-प्रशासक-कवि-राजसभासद्-सदृशाः सुशिक्षिताः जनाः भवन्ति स्म ये घटनानां वर्णनम् अपि कुर्वन्ति स्म अथ च शासकेभ्यः प्रशासन-सम्बन्धिनं परामर्शम् अपि यच्छन्ति स्म । ते न्यायोचितस्य शासनस्य महत्त्वे बलाघातं कुर्वन्ति स्म ।

? किं भवन्तः अनुभवन्ति यत् न्याय-चक्रं राज्ञः प्रजायाः च मध्ये विद्यमानं सम्बन्धं ज्ञापयितुम् उपयुक्तः शब्दः अस्ति ?

न्याय-चक्रम्

त्रयोदश-शताब्द्याः इतिहासकारः फख-ए-मुदब्बिरः लिखितवान् आसीत् ।

नृपस्य कार्यं सैनिकैः विना न चलितुं शक्नोति । सैनिकाः वेतनेन विना न जीवितुं शक्नुवन्ति । वेतनम् आगच्छति कृषकेभ्यः एकत्रितेन राजस्वेन । परन्तु सैनिकाः अपि राजस्वस्य आदानं तदा कर्तुं शक्ष्यन्ति यदा ते आह्लादिताः अर्थात् समृद्धिवन्तः प्रसन्नचित्ताः च स्युः । इत्थं तदा भवितुं शक्नोति यदा नृपः न्यायसङ्गतं निष्ठावन्तं च प्रशासनं कुर्यात् ।

एतान् काञ्चन विषयान् मनसि धारयन्तु (१) तवारीखस्य लेखकाः नगरेषु विशेषतया देहल्यां निवसन्ति स्म ग्रामे तु प्रायः कदाचित् एव निवसेयुः । (२) ते प्रायः स्वस्य इतिहासं शासकानां कृते तेभ्यः प्रभूतस्य धनस्य लालसायां लिखन्ति स्म । (३) एते लेखकाः प्रायः स्वशासकेभ्यः जन्मसिद्धाधिकाराणां विषये लिङ्गभेदस्य उपरि आधारिताम् आदर्शसमाजव्यवस्थायाः निर्माणार्थं च परामर्शं यच्छन्ति स्म । तेषां विचारेभ्यः सर्वे जनाः सहमताः न भवन्ति स्म ।

१२३६ तमे ख्रिस्ताब्दे इल्तुमिशशासकस्य पुत्री रजिया-महोदया सिंहासनारूढा जाता । तस्य युगस्य इतिहासकारेण मिन्हाज-ए-सिराज-महोदयेन अङ्गीकृतम् अस्ति यत् सा स्वकीयेषु सर्वेषु भातृषु योग्यतमा अधिका सक्षमा च आसीत्, परन्तु पुनरपि सः एकां सम्राज्ञीं शासकरूपेण आज्ञापयितुं सङ्कोचम् अनुभवति स्म । राजसभासदः अपि तस्याः स्वतन्त्ररूपेण शासकत्वस्य प्रयासैः सन्तुष्टाः न आसन् । 2040 तमे ख्रिस्ताब्दे सा सिंहासनात् अपसारिता ।

रजिया-महोदयायाः विषये मिन्हाज-ए-सिराजस्य विचाराः

मिन्हाज-ए-सिराजस्य चिन्तनम् आसीत् यत् ईश्वरेण या आदर्शसमाजव्यवस्था रचिता अस्ति तस्याः अनुसारं स्त्रियः पुरूषाधीनाः भवेयुः राज्ञ्याः शासनं तस्याः व्यवस्थायाः विपरीतम् आसीत् । अतः सः पृच्छति "खुदा इत्यस्य रचनायाः विवरणकोशे तस्य विवरणं यतोहि पुरुषाणां सूच्यां न आगच्छति, अतः एताभिः विशिष्टैः गुणैः अपि सा अन्ततः किं प्राप्तवती ?"

रजिया स्वस्य अभिलेखेषु मुद्रासु च उटङ्कितवती यत् सा इल्तुतमिशशासकस्य पुत्री आसीत् । आधुनिकस्य आन्ध्रप्रदेशस्य वारङ्गलक्षेत्रे कश्मिश्चित् काले काकतीयवंशस्य राज्यम् आसीत् । तस्य वंशस्य राज्ञी रुद्रम्मादेव्याः (१२६२ – १२८९) व्यवहारात् रजियायाः व्यवहारः सर्वथा भिन्नः आसीत् । रुद्रम्मादेवी स्वस्य अभिलेखेषु स्वस्य नाम पुरुषवत् लेखयित्वा स्वस्य विषये पुरुषत्वस्य भ्रमम् उत्पादितवती आसीत् । इतोऽपि एका महिलाशासिका आसीत् सा काश्मीरस्य रानी-दिद्दा (980-1003) | तस्याः नाम "दीदी" ज्येष्ठभगिनीतः निर्गतम् अस्ति । स्पष्टम् अस्ति प्रजया स्वस्याः प्रियराज्ञ्याः कृते इदं स्नेहयुक्तं सम्बोधनं कृतं स्यात् ।

? मिन्हाजस्य विचारान् स्वशब्देषु व्यक्तीकुर्वन्तु । किं भवन्तः अनुभवन्ति यत् रजियायाः विचाराः अपि एते एव आसन् ? भवताम् अनुसारं स्त्रियः कृते शासकः इति पदस्य अलङ्करणम् एतावत् कठिनं किमर्थम् आसीत् ?

जन्मसिद्धाधिकारः

जन्मनः आधारेण विशेषाधिकारस्य स्वत्वप्रतिपादनम् । उदाहरणार्थं जनाः अनुभवन्ति स्म यत् कुलीनजनानां कृते केषुचित् विशिष्टेषु कुटुम्बेषु जन्मनः कारणात् ते शासनस्य अधिकारं न्यासरूपेण प्राप्नुवन्ति ।

लिङ्गभेदः

स्त्रीपुरुषयोः मध्ये सामाजिकं तथा च शरीररचनासम्बद्धम् अन्तरम् । सामान्यतः एषः तर्कः दीयते यत् एतादृशस्य अन्तरस्य कारणात् पुरुषाः स्त्रीषु श्रेष्ठतराः भवन्ति ।

मानचित्रम् – २

शमसुद्दीन-इल्तुतमिश-द्वारा विजितानि प्रमुखाणि नगराणि

देहलीशासनस्य विस्तारः – गैरिसननगरात् साम्राज्यं यावत्



त्रयोदशशताब्द्याः आरम्भिकेषु वर्षेषु देहल्याः शासकानां शासनं गैरिसन इत्येतेषाम् अर्थात् रक्षकसैनिकानां समूहाः निवासार्थं निर्मितपिहितदुर्ग-नगरैः प्रायः कदाचित् एव प्रथितं स्यात्। नगरैः सम्बद्धः, परन्तु ततः दूरम् अन्तःप्रदेशेषु तेषां नियन्त्रणम् अल्पतरम् आसीत् अथ च अतः तैः आवश्यकसामग्र्याः कृते रसदादेः कृते च व्यापारे करे अपहरणक्रियायाम् एव निर्भरैः भाव्यं भवति स्म ।

देहल्याः सुदूरं बङ्गालस्य सिन्धस्य च गैरिसननगराणां नियन्त्रणम् अतीव कठिनम् आसीत्। राजद्रोह-युद्ध-दुष्टप्राकृतिकस्थितेः कारणेन अपि तेषां सम्पर्कस्य अदृढतन्तवः छिन्नाः भिन्नाः च जायन्ते स्म। शासनं नैरन्तर्येण अफगानिस्तानतः आगम्यमानैः आक्रमणकारिभ्यः अथ च तत्रत्येभ्यः सेनानायकेभ्यः च आह्वाहनानि लभ्यन्ते स्म, ये सेनानायकाः अल्पतराम् अपि न्यूनताम् अनूभूय विद्रोहस्य ध्वजाम् उद्वेलयन्ति स्म। एताभ्यः आह्वानेभ्यः सल्तनत इति स्वात्मानः कथञ्चित् रक्षां कुर्वन्ति स्म। एतस्य राज्यस्य विस्तारः गयासुद्दीनबलबनस्य अलाउद्दीनखलनी इत्यस्य मुहम्मदतुगलकस्य राज्यकाले च जातः।

राज्यस्य अन्तःसीमासु यानि अभियानानि जातानि तेषां लक्ष्यम् आसीत् गैरिसननगराणां पृष्ठभूमिषु स्थितानाम् अन्तः क्षेत्राणां स्थितेः सुदृढीकरणम् । एतेषाम् अभियानानां काले गङ्गायाः यमुनायाः च दोआब इत्यस्मात् वनानि स्वच्छीकृतानि अथ च आखेटकाः सङ्ग्राहकाः तथा च चरवाहाः च तेषां पर्यावासेभ्यः पलायिताः।

अन्तःप्रदेशाः

कस्यचित् नगरस्य अथवा पोताशयपुरस्य पार्श्वस्थानि क्षेत्राणि यानि तस्य क्षेत्रस्य कृते वस्तूनां अन्यासां च सेवानाम् आपूर्तिं कुर्युः ।

गैरिसन-नगरम्

दुर्गबद्ध-निवासः यत्र सैनिकाः निवसन्ति।

सा भूमिः कृषकेभ्यः प्रदत्ता कृषिकार्यं प्रोत्साहितम् । व्यापार-मार्गाणां सुरक्षायाः क्षेत्रीयस्य व्यापारस्य च उन्नतेः कृते नूतनानां दुर्गाणां नगराणां च निर्माणं कृतम्।

अपरः विस्तारः साम्राज्यस्य बाह्यसीमासु अभवत् । अलाउद्दीन-खलजी-महोदयस्य शासनकाले दक्षिणभारतं लक्षीकृत्य सैनिकानाम् अभियानानि प्रारब्धानि, (तृतीये मानचित्रे पश्यन्तु) अथ च यानि अभियानानि मुहम्मदतुगलकस्य समये स्वस्य चरमसीमायां प्राप्ताः आसन् । एतेषु अभियानेषु साम्राज्यस्य सेनाभिः हस्तिनः अश्वाः सेवकाः मूल्यवन्तः धातवः च स्वायत्तीकृतानि आसन्।

देहलीसाम्राज्यस्य सेनानां प्रारम्भः अपेक्षाकृत् दुर्बला आसीत्,परन्तु **150** वर्षाणाम् पश्चात् मुहम्मदतुगलकस्य राज्यकालस्य अन्तपर्यन्तम् एतस्य उपमहाद्वीपस्य एकं विशालक्षेत्रम् एतस्य युद्ध-अभियानस्य अन्तर्गतम् आगतम् आसीत् । सः शत्रुसेनाः पराजितवान् नगरेषु च आधिपत्यं कृतवान् च । एतस्य सेनानायकाः प्रशासकाभियोगेषु निर्णयान् श्रावयन्ति स्म सार्धम् एव कृषकेभ्यः करादानं कुर्वन्ति स्म । परन्तु एतावति विशाले क्षेत्रे एतेषां नियन्त्रणं कां सीमां यावत् कियत्प्रभावी च आसीत् ?



तृतीये मानचित्रे अलाउद्दीन-खलजी-महोदयस्य दक्षिणभारतस्य अभियानम्

चित्रम् – 2
बेगमपुरी-मस्जिदम् । इयं मुहम्मद-तुगलकस्य राज्यकाले, देहल्यां तस्य नूतना राजधानी जहांपनाह इत्यस्य (विश्वस्य शरणस्थली) मुख्यमस्जिदरूपेण निर्मिता आसीत् । प्रथमे मानचित्रे जहांपनाह इत्येतम् अन्विष्यन्तु।



चित्रम् – 3

द्वादश-शताब्द्याः अन्तिमे दशके निर्मित-कुव्वत-अल-इस्लाम-मसजिद इति तथा च तस्य सूच्यग्रस्तम्भाः । इयं जामामस्जिद इति देहल्याः शासकैः आदौ निर्मिते नगरे स्थिता अस्ति । इतिहासे एतन्नगरं देहली-ए-कुहना अर्थात् पुरातनं नगरम् इति उक्तः अस्ति । एतस्याः मस्जिद इत्यस्याः विस्तारम् इल्तुतमिश-महोदयः अलाउद्दीन-खलजी-महोदयः च कृतवन्तौ । सूच्यग्रस्तम्भः त्रिभिः शासकैः कुत्बौद्दीन-ऐबकेन इल्तुतमिश-महोदयेन फिरोजशाहतुगलकेन च निर्मापिता आसीत्।

मस्जिद (यवन-धार्मिक-स्थलम्)

अयम् अरबीभाषायाः शब्दः अस्ति,यस्य शाब्दिकः अर्थः अस्ति – एतादृशं स्थानं यत्र मुसलमान-जनाः अल्लाहस्य आराधनायां सजदा (अर्थात् जानुनि ललाटं च भूमौ संस्पृश्य) कुर्वन्ति । जामामसजिद (अथवा मसजिद –ए-जामी), तत् मसजिदं भवति, यत्र अनेके मुस्लिमजनाः एकत्रीभूय सार्धं नमाजं पठन्ति । नमाजस्य पम्परार्थं सर्वेषु नमाजकर्तृषु अधिकतमः सम्माननीयः अथ च यः विद्वान् पुरुषः इमाम अर्थात् नेतृरूपेण चीयते । इमाम-महोदयः शुक्रवासरस्य नमाजप्रसङ्गे धर्मोपदेशं अर्थात् खुतवा अपि ददाति।

नमाजस्य काले मुसलिमजनाः मक्कां प्रति अभिमुखाः भूत्वा तिष्ठन्ति । भारते मक्का पश्चिमदिशि भवति। मक्कायाः या दिशा अस्ति सा “किबला” इति उच्यते।

देहल्याः शासकाः सम्पूर्णस्य उपमहाद्वीपस्य अनेकेषु नगरेषु मस्जिद् इत्येतासां निर्माणं कारितवन्तः । एतेन तेषां वयं मुसल्मानाः इस्लामस्य च रक्षकाः इति प्रदर्शितायाः भावनायाः पोषणं भवति स्म । समानस्य आचारसंहितायाः आस्थायाः च पालयितॄणां श्रद्धालूनां परस्परम् एकेन समुदायेन सम्बद्धतायाः बोधकारणे मस्जिदः सहायकाः आसन् । एकस्य समुदायस्य अङ्गभूताः इत्येतस्य बोधस्य प्रबलीकरणम् आवश्यकम् आसीत् यतोहि मुसलमानजनाः अनेकाभ्यः विभिन्नाभ्यः पृष्ठभूमिभ्यः आगच्छन्ति स्म ।

चित्रम् -4

मोठस्य मस्जिदम्, सिकन्दरलोदीमहोदयस्य शासनकाले इयं तस्य मन्त्रिणा निर्मापिता असीत् ।

अपि



चित्रम् – 5

जमाली-कमाली इत्यस्य मस्जिद्, 1520 इत्यस्य दशकस्य अन्तिमेषु दिनेषु निर्मिता आसीत् ।

? द्वितीय-तृतीय-चतुर्थ-पञ्चानां च चित्राणां परस्परं तुलनां कुर्वन्तु । एतेषां यवनमन्दिराणां समानतानाम् असमानतानाम् अन्वेषणस्य प्रयासं कुर्वन्तु । तृतीय-चतुर्थ-पञ्चमेषु च चित्रेषु स्थापत्यस्य तस्याः परम्परायाः विकासः दृश्यते, यस्याः चरमसीमा अस्माभिः देहल्यां शाहजहान् इत्यस्य यवनमन्दिरे दृश्यते । पञ्चमाध्यायस्थे सप्तमे चित्रे पश्यन्त् ।

खलजीवंशस्य तुगलकवंशस्य च अन्तर्गतं प्रशासनं समेकन इति च - नातिदूरात् एकं दृष्टिपातम् ।

देहलीशासनसदृशस्य विशालसाम्राज्यस्य समेकन इत्यस्य कृते विश्वसनीयानां प्रान्ताधिपतीनां प्रशासकानां च आवश्यकता आसीत् । देहल्याः आरम्भिकाः शासकाः विशेषतया इल्तुतमिशः क्षेत्रपतीनां भूस्वामिनां च स्थाने स्वस्य विशिष्टान् दासान् प्रान्ताधिपतिरूपेण नियोजनम् अधिकं समीचीनतरं मन्यते स्म । एते दासाः फारसीभाषायां बंदगाँ इति उच्यन्ते स्म अथ च एते सैनिकसेवायाः कृते क्रीयन्ते स्म । ते राज्यस्य केषुचित् अतीव महत्त्वपूर्णेषु राजनैतिकपदेषु कार्यं कर्तुं बहुसावधानतया प्रशिक्षिताः क्रियन्ते स्म ।

ते यतोहि सम्पूर्णतया स्वस्य स्वामिनः उपरि एव निर्भराः भवन्ति स्म, अतः शासकाः अपि तेषु विश्वासं कृत्वा तेषु निर्भराः भवितुं शक्नुवन्ति स्म।

पुत्रेभ्यः महनीयाः दासाः

शासकाः परामृश्यन्ते स्म,
यः दासः अस्माभिः पालितः पोषितः अग्रेसरः च कृतः अस्ति, तस्य सम्भालनम् अस्माभिः करणीयम्, यतोहि भाग्यं सम्यक् भवेत् तदा एव सम्पूर्णे जीवने कदाचित् एव योग्यः अनुभवी च दासः प्राप्यते। बुद्धिमतां कथनम् अस्ति यत् योग्यः अनुभवी च दासः पुत्रेभ्यः अपि गरीयान् भवति ....

? किं भवन्तः कारणं जानन्ति यत् दासः पुत्रेभ्यः अपि गरीयान् अस्ति इति चिन्तितवतां चिन्तनं किमर्थम् आसीत् ?

आश्रितः यः कस्यचित् अन्यस्य जनस्य संरक्षणे वसति तस्मिन् निर्भरः स्यात्।

खलजीशासकाः तुगलकशासकाः च बंदगाँ इत्यस्य प्रयोगं कुर्वन्ति स्म अथ च सार्धम् एव स्वस्य उपरि आश्रितनिम्नवर्गस्य जनान् अपि महत्सु राजनैतिकपदेषु आसीनान् कुर्वन्ति स्म। एतादृशानां जनानां कृते सेनापति-प्रान्ताधिपतिसदृशानि पदानि दीयन्ते स्म। परन्तु ततः राजनैतिकास्थिरता अपि जायते स्म।

दासाः आश्रिताः च स्वस्य स्वामिनः संरक्षकान् च प्रति तु निष्ठावन्तः भवन्ति स्म परन्तु तेषाम् उत्तराधिकारिणः प्रति नैव आसन्। नूतनानां शासकानां स्वकीयाः सेवकाः भवन्ति स्म। परिणामतः कस्यचित् नूतनस्य शासकस्य सिंहासनारूढे सति प्रायः नूतनानां पुरातनानां च प्रान्ताधिपतीनां च मध्ये सङ्घर्षस्य प्रारम्भः जायते स्म। शासकैः निम्नवर्गस्य जनानां कृते संरक्षणदानस्य कारणात् उच्चवर्गस्य बहवः जनाः दुःखिनः भवन्ति स्म अथ च निम्नकुलसम्भवान् जनान् उच्चपदेषु उपवेशयन्ति इत्यतः तवारीखलेखकाः देहल्याः शासकानाम् आलोचनाम् अपि कृतवन्तः सन्ति ।

मुहम्मद-तुगलक-शासकस्य अधिकारिजनाः

मुहम्मदतुगलकशासकः अजीजखुम्मार-नामकं कलालम् अर्थात् (मद्यविक्रेतारम्), फिरुज-हज्जाम-नामकं नापितं मनकातब्बाखनामकं बावर्चीं लड्ढानामकं पीरानामकं च मालाकारौ उच्चप्रशासनिकपदेषु उपवेशितवान् आसीत् । चतुर्दशशताब्द्याः मध्यकालस्य इतिहासकारः जियाउद्दीनबरनी एतासां नियुक्तीनाम् उल्लेखः शासकस्य राजनैतिकविवेकस्य नाशस्य शासनस्य च अक्षमतायाः उदाहरणरूपेण कृतः अस्ति।

? भवतां मतानुसारं बरनी शासकस्य आलोचनां किमर्थं कृतवान् आसीत् ?

पूर्वतनानां शासकानाम् इव खलजी-तुगलक-शासकैः अपि सेवानायकाः भिन्नस्य भिन्नस्य आकाराणां क्षेत्राणां प्रान्ताधिपतिरूपेण नियोजिताः । एतानि क्षेत्राणि इक्ता इति उच्यन्ते स्म एतेषां संरक्षकाः अधिकारिणः इक्तदार इति अथवा मुक्ती इति उच्यन्ते स्म । मुक्ती इत्यस्य दायित्वम् आसीत् सैनिकाभियानानां नेतृत्वकरणम् अथ च स्वस्य इक्त इत्येतेषु अधिनियमान् स्थापयितुं व्यवस्थायाः च व्यवस्थापनम् आसीत् । स्वस्य सैनिकसेवानां प्रतिफलं वेतनस्य रूपेण मुक्ती इति स्वस्य क्षेत्रेभ्यः राजस्वस्य आदानं कुर्वन्ति स्म । राजस्वरूपेण प्राप्तराश्याः एव ते स्वस्य सैनिकेभ्यः वेतनं यच्छन्ति स्म । मुक्ती इति जनेषु नियन्त्रणस्य सर्वाधिकः प्रभावशाली उपायः अयम् आसीत् यत् तेषां पदं वंशपरम्परया न चलेत् अथ च तेभ्यः कश्चित् अपि इक्ता इति स्वल्पकालाय एव लभ्येत, यदनन्तरं तेषां स्थानान्तरणं स्यात् । शासकस्य अलाउद्दीनखलजीमहोदयस्य मुहम्मदतुगलकस्य च शासनकाले वृत्तेः एतेषां कठोराणां नियमानाम् अतीव दृढतया पालनं भवति स्म । मुक्ती इति जनैः एकत्रितस्य राजस्वस्य राशेः विवरणाय राज्यद्वारा लेखाधिकारी नियोज्यन्ते स्म । एतस्मिन् विषये अवधानं भवति स्म यत् मुक्तीजनाः राज्येण निर्धारितान् करान् एव स्वीकुर्युः अथ च निश्चितसङ्ख्यायाः अनुसारं सैनिकान् स्थापयेयुः ।

यदा देहल्याः शासकाः नगरेभ्यः दूरम् आन्तरिकानि क्षेत्राणि अपि स्वस्य अधिकारे आनीतवन्तः तदा ते भूमेः स्वामिनः धनाढ्यान् भूस्वामिनः अपि स्वस्य सत्तायाः पुरतः नम्रीभवितुं बाध्यान् कृतवन्तः । अलाउद्दीनखलजीमहोदयस्य शासनकाले भूराजस्वस्य निर्धारणस्य आदानस्य च कार्यं राज्यं स्वस्य नियन्त्रणे आनीतवान् । स्थानीयाः भूस्वामिनां पार्श्वे यः करादानस्य अधिकारः आसीत् सोऽपि बलात् अपसारितः अपि च ते स्वयम् अपि करं दद्युः इति ते बाध्याः कृताः । शासकस्य प्रशासकाः भूमेः मापनं कृतवन्तः अथ च तस्य विवरणं बहुसावधानतया स्थापितवन्तः । केचन पुरातनाः गणाधिपतयः भूस्वामिनः च राजस्वस्य निर्धारणाधिकारिरूपे ग्रहणाधिकारिरूपेण च राज्यस्य सेवाकार्यं कर्तुम् आरब्धवन्तः । तस्मिन् काले त्रिप्रकारकस्य कराः आसन् (1) कृषौ यः खराज इति उच्यते स्म अपि च यः कृषकस्य उत्पादनस्य प्रायः पञ्चाशत्-प्रतिशतं भवति स्म, (2) पशुपालकेषु, तथा च (3) गृहेषु च ।

इदम् अवश्यं स्मर्तव्यम् अस्ति यत् एतस्य उपमहाद्वीपस्य महत्तरः भागः देहल्याः शासकानाम् अधिकारक्षेत्रतः बहिर्भूतम् आसीत् । देहलीतः बङ्गसदृशानां सुदूरस्थितानां प्रान्तानां नियन्त्रणम् अतीव कठिनम् आसीत् अथ च दक्षिणभारतस्य विजयस्य अनुक्षणम् एव तत् सम्पूर्णं क्षेत्रं पुनः स्वतन्त्रं जातम् आसीत् । अत्र पर्यन्तं यत् गङ्गायाः समतलेषु क्षेत्रेषु अपि

सघनवनयुक्तानि एतादृशानि क्षेत्राणि आसन्, यस्मिन् पैठने इति मध्ये शासकस्य सेनाः अक्षमाः आसन् । स्थानीयाः अधिपतयः एतेषु क्षेत्रेषु स्वाधिपत्यं कृतवन्तः । अलाउद्दीनखलजी मुहम्मदतुगलकः च एतेषु क्षेत्रेषु बलात् स्वाधिपत्यं कुर्वन्ति स्म, परन्तु तत् आधिपत्यं कानिचन दिनानि यावत् एव तिष्ठति स्म ।

नायकाः तेषां दुर्गबन्धनं च

अफ्रीकीदेशात्, मोरक्कोतः चतुर्दश्यां शताब्द्यां भारतम् आगतः यात्री इब्नबतूता उक्तवान् अस्ति यत् अधिनायकाः कदाचित् पर्वतीयेषु नतोन्नतेषु च क्षेत्रेषु दुर्गस्य निर्माणं कृत्वा निवसन्ति स्म, कदाचित् कदाचित् च बंसस्य स्तम्बेषु च । भारते वंशदण्डः अन्तः रिक्तं न भवति । इदं दीर्घतरं भवति । एतस्य भिन्नाः भिन्नाः भागाः परस्परम् अनेन प्रकारेण ग्रथिताः भवन्ति यत् तेषु अग्नेः अपि प्रभावः न भवति अथ च ते सर्वे मिलित्वा बहुबलिनः भवन्ति । नायकाः एतेषु वनेषु निवसन्ति, यानि एतेषां कृते दुर्गस्य प्राचीरस्य कार्यं कुर्वन्ति । एतस्याः भित्त्याः परिकरे एव तेषां पशवः सस्यानि च निवसन्ति । अन्तः एव जलस्य व्यवस्था अपि भवति, अर्थात् तत्र एकत्रितं वृष्टेः जलम् । अतः ते प्रबलबलशालिसेनाभिः विना पराजेतुं न शक्यन्ते । एताः सेनाः वनं प्रविश्य विशेषतया सज्जीकृद्भिः शस्त्रैः वेणुदण्डान् कर्तयन्ति ।

? अधिनायकानां रक्षाव्यवस्थायाः वर्णनं कुर्वन्तु ।

चंगेजखानस्य नेतृत्वे मङ्गोलाः 1219 तमे वर्षे उत्तर-पूर्वी-ईरानदेशे ट्रांस-ऑक्ससियाना (आधुनिक-उजबेकिस्ताने आक्रमणं कृतवन्तः तदनन्तरमेव देहलीशासनेन तेषाम् आक्रमणं सोढव्यम् अभवत् । अलाउद्दीनखलज्यः मुहम्मदतुगलकस्य च शासनकालानाम् आरम्भिकेषु वर्षेषु देहल्याः उपरि मंगोलानाम् आक्रमणानि वर्धितानि । ततः बाध्याः भूत्वा द्वाभ्याम् अपि शासकाभ्यां काचित् विशाला सेना सज्जीकरणीया अभवत् । एतावत्याः विशालायाः सेनायाः सम्भालनं प्रशासनस्य कृते महत् आह्वानम् आसीत् । आगच्छन्तु पश्यन्तु यत् द्वौ शासकौ एतस्य आह्वानस्य सम्मुखीकरणं कथं कृतवन्तौ ।

अलाउद्दीन-खलजी	मुहम्मद-तुगलकः
देहल्याः उपरि वारद्वयं आक्रमणं जातम् , 1299/1300 इति वर्षेषु 1302 -1303 तमेषु वर्षेषु च । एतान् सम्मुखीकर्तुं अलाउद्दीनखलजी एकां विशालां स्थायिनीं सेनां सज्जीकृतवान् आसीत् ।	मुहम्मद-तुगलकस्य शासनस्य प्रारम्भिकेषु वर्षेषु साम्राज्ये आक्रमणम् अभवत् । मंगोलसेना पराजयं प्राप्तवती । मुहम्मदतुगलकस्य स्वस्य सेनायाः शक्तेः उपरि स्वस्य संसाधनानां च उपरि एतावान् विश्वासः आसीत् यत् सः ट्रांस-आक्ससियानायाः उपरि आक्रमणस्य योजनां

	कृतवान् । एकस्याः स्थायीसेनायाः सज्जीकरणं तस्य आक्रमकं कार्यम् आसीत् ।
अलाउद्दीनखलजी स्वस्य सैनिकानां कृते सीरीनामकम् नूतनं किञ्चन गैरिसननगरं रचितवान् । प्रथमे मानचित्रे तत् नगरम् अन्विष्यन्तु ।	नूतनस्य गैरिसननगरस्य निर्माणस्य स्थाने देहल्याः चतुर्षु नगरेषु सर्वपुरातनं नगरं देहली-ए-कुहनां निवासिभ्यः रिक्तं कारयित्वा तत्र सैनिकनिवासं कृतवान् । पुरातनस्य नगरस्य निवासिनः दक्षिणे निर्मितां नूतनां राजधानीं दौलतावादं प्रति प्रेषिताः ।
सैनिकानाम् उदरपूर्तेः समस्यायाः समाधानं गङ्गा-यमुनयोः मध्यभूतायाः भूमेः राजस्वस्य रूपेण कृषेः उत्पादनम् एकत्रीकृत्य समाधानं कृतम् । कृषकाणां यत् उत्पादनम् आसीत् तस्य पञ्चाशत् प्रतिशतं भागः करस्य रूपेण निश्चितः कृतः आसीत् ।	सेनायाः उदरपूर्त्यर्थं तस्मात् क्षेत्रात् एव खाद्यान्नानि एकत्रीकृतानि । परन्तु सैनिकानां विशालायाः सङ्ख्यायाः आवश्यकताः पूरयितुं शासकः अतिरिक्तान् करान् अपि योजितवान् । तस्मिन् एव कालावधौ दुर्भिक्षम् अपि अभवत् ।
सैनिकेभ्यः वेतनम् अपि दातव्यं भवति स्म । अलाउद्दीनः सैनिकेभ्यः इक्ता इत्यस्य स्थाने साक्षात् धनम् एव वेतनरूपेण दातुं निश्चयीकृतवान् । सैनिकाः स्वस्य आवश्यकतानुगुणं देहल्याः व्यापारिभ्यः वस्तूनि क्रीणन्ति स्म । अथ च एषा आशङ्का आसीत् यत् व्यापारिणः स्वस्य वस्तूनां मूल्यानि वर्धिष्यन्ते । तत् निरोद्धुं अलाउद्दीनः देहल्यां वस्तूनां मूल्येषु नियन्त्रणम् आरब्धवान् । अधिकारिणः बहुसावधानतया मूल्यानां सर्वेक्षणं कुर्वन्ति स्म अथ च ये व्यापारिणः निर्धारितमात्रायाः उल्लङ्घनं कुर्वन्ति स्म, ते दण्डभाजाः भवन्ति स्म ।	मुहम्मदतुगलकः अपि स्वस्य सैनिकेभ्यः प्रत्यक्षधनं वेतनरूपेण यच्छन्ति स्म । परन्तु मूल्येषु नियन्त्रणस्य स्थाने सः किञ्चित् किञ्चित् अद्यतनस्य कालस्य इव कर्गदेषु अङ्कितानां मुद्राणाम् इव "टोकन" साङ्केतिक-मुद्रायाः प्रचलनं कृतवान् । एतानि नाणकानि धातोः निर्मितानि भवन्ति स्म परन्तु सुवर्णस्य रजतस्य न भूत्वा अमहर्घस्य धातोः निर्मितानि भवन्ति स्म । चतुर्दशशताब्द्याः जनाः एतस्याः मुद्रायाः उपरि विश्वासः न आसीत् । ते बहुचतुराः आसन् । स्वस्य स्वर्णमयाः रजतमयाः च मुद्राः ते रक्षित्वा स्थापयन्ति स्म अथ च ते स्वस्य सर्वान् करान् एतया साङ्केतिकया मुद्रया यच्छन्ति स्म । एतस्याः अमहर्घमुद्रासदृशानि कृत्रिमानि नाणकानि अपि सारल्येन निर्मातुं शक्यन्ते स्म ।
अलाउद्दीनस्य प्रशासनिक-कार्याणि अतीव सफलानि जातानि अथ च इतिहासकारैः मूल्येषु न्यूनता विपण्यां वस्तूनां कुशलतया आपूर्त्यर्थं तस्य शासनकालस्य बहुप्रशंसा कृता अस्ति । मंगोलाक्रमणानां भयस्य अपि सः सफलतापूर्वकं सम्मुखीकरणं कृतवान् ।	मुहम्मदतुगलकद्वारा कृतानि प्रशासनिककार्याणि अतीव असाफल्यं प्राप्तानि । काश्मीरेषु तस्य आक्रमणं सम्पूर्णतया असफलम् आसीत् । तदा सः तूरानस्य उपरि स्वस्य आक्रमणस्य विचारं त्यक्तवान् अथ च सः स्वकीयायाः

	विशालायाः सेनायाः निरस्तीकरणं कृतवान् । एतस्मिन् कालावधौ सः प्रशासनसम्बन्धीनि यानि कार्याणि कृतवान् आसीत् तेभ्यः अनेकाः समस्याः समुत्पन्नाः । ये जनाः दौलताबादं नीताः ते अतीव असन्तुष्टाः आसन् । करेषु वृद्धिः गङ्गा-यमुनयोः च दोआब इति मध्ये दुर्भिक्षेण विक्षुब्धा जनता विद्रोहं कर्तुम् आरब्धवती अथ च मुहम्मदतुगलकः अन्ततः साङ्केतिकां मुद्राम् अपि प्रतिस्वीकर्तुं बाध्यः जातः ।

एतासां सर्वासाम् असफलतानां गणनाकाले वयं कदाचित् विस्मरामः यत् साम्राज्यस्य इतिहासे आदौ देहल्याः केनचित् शासकेन मंगोलक्षेत्रं जेतुम् अभियानस्य योजना कृता आसीत् । यत्र अलाउद्दीनखलज्यः बलं प्रतिरक्षारतः आसीत्, तत्र मुहम्मदतुगलकेन कृतानि कार्याणि मंगोलान् विरुद्ध्य सैनिकाक्रमणस्य योजनायाः भागभूताः आसन् ।

पञ्चदश्यां शताब्द्यां तथा च षोडश्यां शताब्द्यां साम्राज्यम्

प्रथमां तालिकां पुनः पश्यन्तु । भवन्तः द्रक्ष्यन्ति यत् तुगलकवंशस्य अनन्तरं 1526 तमं वर्षं यावत् देहल्याः आगरायाः च उपरि सैयदवंशस्य तथा च लोदीवंशस्य राज्यम् आसीत् । तावत् पर्यन्तं जौनपुरे वङ्गे मालवायां गुर्जरे राजस्थाने तथा च सम्पूर्णे दक्षिण भारते स्वतन्त्राः शासकाः प्रकाशम् आगताः आसन् । तेषां राजधानयः समृद्धाः आसन् राज्यानि च वर्धन्ते स्म । एतस्मिन् एव कालवधौ अफगानशासकाः राजपूतशासकसमूहाः च उदयं गताः ।

एतस्मिन् काले स्थापितेषु राज्येषु कानिचन लघूनि तु आसन् परन्तु शक्तिशालिनि आसन् अथ च तेषां शासनम् अतीव कुशलं तथा च सुव्यवस्थितरूपेण चलति स्म । शेरशाहसूरिमहोदयः (1540 -1545) तमे वर्षे बिहारे स्वपितृव्यस्य एकस्य लघुक्षेत्रस्य प्रबन्धकस्य रूपे कार्यम् आरब्धवान् आसीत् कालक्रमेण च सः एतावतीम् उन्नतिं कृतवान् यत् मुगलसम्राजं हुमायुँ-महोदयम् (1530-1540,1555-1556) अपि युद्धार्थम् आहूतवान् तं परास्तं कृतवान् च । शेरशाहः देहल्याः उपरि आधिपत्यं स्थापयित्वा स्वयं स्वस्य राजवंशं स्थापितवान् । यद्यपि सूरिवंशः केवलं पञ्चदशवर्षाणि (1540 तः 1555 यावत् शासनं कृतवान्, परन्तु एतस्य प्रशासनेन अलाउद्दीनखलजिमहोदयस्य बह्वीः नीतीन् स्वीकृत्य ताः नीतयः इतोऽपि सुदृढाः कृता । महासम्राट् अकबरः (1556 – 1605) यदा मुगलसाम्राज्यस्य

एकीकरणं कृतवान् तदा सः स्वस्य प्रतिमानस्य रूपेण शेरशाहस्य प्रशासनव्यवस्थाम् एव अङ्गीकृतवान् आसीत्।

अन्यत्र

तिस्रः श्रेण्यः, "ईश्वरीय-शान्तिः"

रात्रिः धर्मयुद्धं च

तिसृणां श्रेणीनां विचारः सर्वप्राक् एकादशशताब्द्याः आरम्भे फ्रांस-देशे सूत्रबद्धः कृतः। एतस्य अनुसारं समाजः त्रिषु वर्गेषु विभाजितः – प्रार्थनाकर्तृवर्गः, युद्धकर्तृवर्गः कृषकवर्गः च। त्रिषु वर्गेषु समाजस्य एतस्य विभाजनस्य कृते ईसायीधर्मस्य समर्थनम् अपि प्राप्तम् आसीत्। एतेन विभाजनेन ईसायीधर्मः समाजे स्वस्य प्रबलं प्रभावं इतोऽपि दृढीकर्तुं साहाय्यं लभते स्म। एतेन विभाजनेन योद्धृणां कश्चन समूहः अपि उदयं गतः। एते योद्धारः नाइट इति उच्यन्ते स्म।

ईसायीधर्मः एकस्मै समूहाय संरक्षणं यच्छति स्म स्वस्य च "ईश्वरीय-शान्तेः" अवधारणानां प्रसारे एतेषाम् उपयोगं करोति स्म। नाइट इत्येतेभ्यः अपेक्षा क्रियते स्म यत् धर्मस्य ईश्वरस्य च सेवायां समर्पिताः योद्धारः भवेयुः। अयं प्रयासः भवति स्म यत् एते योद्धारः परस्परं युद्धतः विमुखीकृत्य तेषां मुस्लिमजनानां विरुद्धं युद्धं कर्तुं प्रेष्येरन्, यैः यरुशलमनगरस्य उपरि आधिपत्यं स्थापितम् आसीत्। एतस्य प्रयत्नस्य परिणामतः सैनिकाभियानानाम् एका शृङ्खला प्रचलिता, यः "क्रुसेड" अर्थात् धर्मयुद्धम् इति उक्तः। ईश्वरस्य धर्मस्य सेवायां कृतैः अभियानैः नाइट इत्येतेषां व्यक्तित्वं सर्वथा परिवर्तनं नीतम्। पूर्वम् एतेषां नाइट इत्येतेषां गणना कुलीनेषु न भवति स्म। परन्तु फ्रांसदेशे एकादशशताब्द्याः अन्तपर्यन्तं जर्मन्यां च ततः एकस्याः शताब्द्याः अनन्तरम् एतेषां योद्धृणां दीनं हीनं च अतीतं सर्वथा विस्मृतवन्तः आसन्। द्वादशीं शताब्दीं यावत् तु कुलीनवर्गस्य जनाः अपि नाइट इति ख्यातिम् इच्छन्ति स्म।

कल्पनां कुर्वन्तु

भवन्तः अलाउद्दीन-खलज्यः अथवा मुहम्मदतुगलकस्य शासनकाले कृषकाः सन्ति भवन्तः च सम्राजा निर्धारितं करं अर्पयितुं च असमर्थाः सन्ति। भवन्तः किं करिष्यन्ति ?

पुनः स्मरन्तु

1. देहल्याम् आदौ केन राजधानी स्थापिता ?

2. देहल्याः शासकानां शासनकाले प्रशासनस्य भाषा का आसीत् ?

3. कस्य शासनस्य काले साम्राज्यस्य अधिकतरः विस्तारः अभवत् ?

4. इब्नबतूता कस्मात् देशात् भारतम् आगतवान् आसीत् ?

बीजशब्दः

इक्ता इति तारीखः,

गैरिसन इति, मंगोलः,

लिङ्गः,

खराजः

आगच्छन्तु जानीमः

5. "न्यायचक्रस्य "अनुसारं सेनापतिभ्यः कृषकहितानां ध्यानरक्षणं किमर्थम् आवश्यकम् आसीत् ?

6. साम्राज्यस्य "**अन्तस्सीम्नः**" **बाह्यसीम्नः** च भवन्तः किम् अवगच्छन्ति ?

7. मुक्ती इति स्वस्य कर्तव्यानां पालनं कुर्युः, एतत् सुनिश्चेतुं के के उपायाः कृताः आसन् ? भवतां विचारानुगुणं शासकस्य आदेशानाम् उल्लङ्घनस्य ये इच्छुकाः आसन् तेषाम् एतादृश्याः मानसिकतायाः पृष्ठे कानि कारणानि भवितुं शक्नुवन्ति ?

8. देहलीसाम्राज्यस्य उपरि मंगोलानाम् आक्रमणानां कः प्रभावः जातः ?

आगच्छन्तु

9. किं भवतां विचारानुसारितया तवारीखस्य लेखकाः, सामान्यजनतायाः जीवनस्य विषये काम् अपि सूचनां प्रयच्छन्ति ?

10. देहलीसाम्राज्यस्य इतिहासे रजियासम्राज्ञी स्वस्वभावस्य एका एव आसीत् । किं भवन्तः अनुभवन्ति यत् अद्यतने काले महिलानेतारः सरलतया स्वीक्रियन्ते ?

11. देहल्याः शासकाः वनानि कर्तयितुं किमर्थम् आदिशन्ति स्म ? किम् आद्यापि वनानि तैः कारणैः एव कर्त्यन्ते ?

आगच्छन्तु कृत्वा पश्येम विचारयामः

12. जानन्तु यत् किं भवतां क्षेत्रे देहल्याः शासकैः निर्मापितं किञ्चित् भवनम् अस्ति ? किं भवतां क्षेत्रे इतोऽपि किञ्चित् एतादृशं भवनम् अस्ति, यत् द्वादशशताब्द्याः आरभ्य पञ्चदशशताब्द्याः आभ्यन्तरे निर्मितं स्यात् ? एतेषु केषाञ्चित् भवनानां वर्णनं कुर्वन्ति तेषां च रेखाचित्राणि रचयन्तु ।

4 मुगल-साम्राज्यम्



मध्यकाले कस्यापि सम्राजः कृते भारतीयोपमहाद्वीपसदृशे विशालक्षेत्रे, यत्र जनेषु संस्कृतिषु च एतावत्यः अधिकाः विविधताः स्युः, शासनस्य कार्यम् अत्यन्तम् एव कठिनम् आसीत्। स्वस्य पूर्ववर्तिनां विपरीतं मुगलाः एकस्य साम्राज्यस्य स्थापनां कृतवन्तः तत् कार्यं च पूर्णं कृतं, यत् अधुना यावत् केवलम् अल्पावधीनां कृते एव सम्भवम् इति दृश्यते स्म । षोडशशताब्द्याः उत्तरार्धकालात् एते देहलीतः आगरातः च स्वस्य राज्यस्य च विस्तारम् आरब्धवन्तः अथ च सप्तदशशताब्द्यां प्रायशः सम्पूर्णे महाद्वीपे अधिकारं प्राप्तवान् । ते प्रशासनस्य संरचनासम्बन्धिनः शासनसम्बन्धिनः च ये विचाराः उपस्थापिताः, ते विचाराः तेषां राज्यस्य पतनान्तरम् अपि अतिष्ठन् । एषः एकः एतादृशः राजनैतिकः न्यासः आसीत्, यस्य प्रभावेण उपमहाद्वीपे तेभ्यः पश्चात् आगन्तारः शासकाः अपि एतेषां नियमानां पालनं कृतवन्तः । अद्य भारतस्य प्रधानमन्त्री स्वतन्त्रतादिवस्य अवसरे मुगलशासकानां निवासस्थानात् देहल्याः लालकिला इत्यस्य प्राचीरतः राष्ट्रं सम्बोधयति।

चित्रम् -1
रक्तदुर्गः

मुगलाः के आसन् ?

मुगलाः द्वयोः महाशासकवंशयोः वंशजाः आसन् । मातुः पक्षतः ते चीनदेशस्य मध्य-एशियायाः मंगोलशासकस्य चंगेजखानस्य उत्तराधिकारिणः आसन्। यस्य मृत्युः 1227 तमे वर्षे अभूत् । पितुः पक्षतः ते ईराणस्य इराकस्य वर्तमानस्य तुर्कीशासकतैमूरस्य वंशजाः



आसन्। यस्य मृत्युः 1404 तमे वर्षे अभवत्। परन्तु मुगलाः आत्मानं मुगलख्यात्या अथवा मंगोल इति ख्यात्या स्वस्य ख्यापनं न इच्छन्ति स्म । एतादृशम् एतदर्थम् आसीत् यतोहि चंगेजखानेन सम्बद्धाः स्मृतयः शतशः व्यक्तीनां नरसंहारात् सम्बद्धाः आसन् । एताः एव स्मृतयः मुगलानानां प्रतियोगिभिः उजबेगैः अपि सम्बद्धाः आसन् । अपरस्मिन् पक्षे मुगलाः वयं तैमूरवंशजाः इति आत्मनि गर्वस्य अनुभवं कुर्वन्ति स्म, आधिक्येन एतदर्थम् आसीत् यतोहि तेषाम् एषः महान् पूर्वजः 1398 तमे वर्षे देहल्याम् आधिपत्यं कृतवान् आसीत्।

चित्रम् – 2

तैमूरस्य तस्य उत्तराधिकारिणां मुगलसम्राजाम् एकं लघुचित्रं च (1702 -12)। मध्ये तैमूरः अस्ति तस्य दक्षिणपक्षे तस्य पुत्रः मीरन-शाह अस्ति यः प्रथमस्य मुगलसम्राजः बाबरस्य काष्ठहारः आसीत्। तस्य च अनन्तरम् अबुसेदः सः च बाबरस्य पितामहः आसीत्, तैमूरस्य वामपक्षे सम्राट् मोहम्मद-मिर्जा-महोदयः यः बाबरस्य प्रपितामहः आसीत् अथ च उमरशेखः अस्ति यः बाबरस्य पिता आसीत्। तैमूरस्य दक्षिणपक्षे तृतीयः चतुर्थः पञ्चमः च जनः क्रमशः मुगलसम्रा बाबरः अकबरः शाहजहाँ च सन्ति तेषां च वामपक्षे तेन एव क्रमेण हुमायूँ-महोदयः जहाँगीरः औरंगजेबः च सन्ति।

? किम् एतत् चित्रं दर्शयति यत् मुगलराजत्वस्य स्वप्रभुत्वप्रतिपादनं जन्मसिद्धस्य अधिकारस्य रूपेण कुर्वन्ति स्म ?



ते स्वस्य वंशावल्याः प्रदर्शनं चित्रं निर्मापयित्वा कृतवन्तः । प्रत्येकं मुगलशासकः तैमूरेण सार्धं स्वस्य चित्रं निर्मापितवान्। प्रथमं चित्रं पश्यन्तु, यत्र तैमूरस्य मुगलानां च चित्राणि प्रस्तौति।

मुगलसैन्याभियानम्

प्रथमः मुगलशासकः बाबरः (1526 – 1530) यदा 1494 तमे वर्षे फरघानाराज्यस्य उत्तराधिकारं प्राप्तवान्, तदा तस्य वयः केवलं द्वादशवर्षम् आसीत् । मंगोलानां द्वितीया शाखा, उजबेग इत्येतेषाम् आक्रमणानां कारणतः तया स्वस्य पैतृकसिंहासनं त्यक्तव्यम् अभवत् । अनेकानि वर्षाणि यावत् भ्रमणान्तरं सः 1504 तमे वर्षे काबुले आधिपत्यं स्थापितवान् । सः 1526 तमे वर्षे सः देहल्याः सम्राजम् इब्राहिमलोदीं पानीपते पराजितवान् देहलीम् आगरां च स्वाधिपत्ये स्थापितवान् ।

चित्रम् – 3 , मुगलसेना अभियाने

प्रथमायां तालिकायां मुगलानां प्रमुखाणि सैन्याभियानानि दर्शितानि सन्ति । एतां ध्यानेन पठन्तु । किं भवन्तः एतस्मिन् लम्बतरे घटनाक्रमे काञ्चित् पुनरावृत्तिम् अन्वेष्टुं शक्नुवन्ति ? उदाहरणार्थं भवन्तः ध्यानं दास्यन्ति यत् अफगानस्थाः मुगलसत्तायाः कृते तात्कालिकभीतिरूपेण आसन् । सप्तमाध्याये मुगलाहोमयोः सम्बन्धविषये अष्टमाध्याये दशमाध्याये च सिक्खानां विषये अथ च मेवाड-मारवाडयोः सम्बन्धविषये नवमाध्याये अवधानं कुर्वन्ति । सफाविदः ईरानतः अकबर-हुमायूँ इत्येतयोः सम्बन्धेषु किम् अन्तरम् आसीत् ? किम् औरंगजेबस्य शासनकाले गोलकुंडायाः बीजापुरस्य च अधिग्रहणेन सह दक्कने युद्धस्य समाप्तिः अभवत् ?

चित्रम् – 4

षोडशशताब्द्याः युद्धेषु शतघ्नीनां स्फोटकानां च प्रथमवारं प्रयोगः अभवत् । बाबरः एतेषां युद्धास्त्राणां शस्त्राणां च पानीपतस्य प्रथमे युद्धे प्रभाविरूपेण प्रयोगं कृतवान् ।

तालिका 1

मुगल-साम्राजः

प्रमुखाभियानानि घटनाः च

बाबरः 1526 -1530

1526 तमे वर्षे पानीपतस्य क्रीडाङ्गने इब्राहिमलोदी एवञ्च तस्य अफगानसमर्थकान् पराजितवान्।

1527 तमे वर्षे खानुवायां राणासांगामहोदयः राजपूतराज्ञः तेषां समर्थकान् च पराजितवान्।

1528 तमे वर्षे चंदेर्यां राजपूतान् पराजितवान्।

स्वस्य मृत्योः पूर्वं देहल्याम् आगरायां च मुगलनियन्त्रणं च स्थापितवान्।

हूमायूँ 1530 – 1540 तथा च 1555 – 1556

(1) हूमायूः स्वस्य पितुः मरणासन्नस्य अन्त्यादेशस्य अनुसारं सम्पत्तेः वण्टनं कृतवान्। प्रत्येकं भ्राता एकम् एकं प्रान्तं प्राप्तवान्। तस्य भ्रातुः मिर्जाकामरानस्य महत्त्वाकाङ्क्षाणां कारणेन हूमायूः स्वस्य अफगानप्रतिद्वन्द्विनां पुरतः म्लानः अभवत्। शेरखानः हूमायूँम् वारद्वयं पराजितवान् - 1539 तमे वर्षे चौसायां 1540 तमे वर्षे च कन्नौजे। एतासां पराजयानां कारणेन सः अफगानं प्रति पलायितुं बाध्यः जातः।

अकबरः 1556 – 1605

त्रयोदशवर्षस्य अल्पायुंसि अकबरः सम्राट् जातः। तस्य शासनकालः त्रिषु अवधिषु विभक्तुं शक्यते। (1) 1556, 1570 इति वर्षयोः मध्ये अकबरः स्वस्य संरक्षकात् बैरमखानात् स्वस्य गृहस्थेभ्यः कर्मचारिभ्यः च स्वतन्त्रः अभवत्। सः सूरी इत्यस्य अन्येषाम् अफगानानां निकटवर्तिराज्याणां मालवायाः गोंडवानायाः अथ च स्वस्य सहोदरस्य भ्रातुः मिर्जाहाकिमस्य उजबेकानां च विद्रोहान् अभिभवितुं सैन्याभियानानि चालितवान्। सः 1568 तमे वर्षे सिसौदियानां राजधान्यां चित्तौडे अथ च 1569 तमे वर्षे रणथम्भौरे आधिपत्यं स्थापितवान्।

(2) 1570, 1585 च तमयोः वर्षयोः मध्ये गुर्जरं विरुद्ध्य सैनिकाभियानि अभवन्। एतेषाम् अभियानानाम् अनन्तरं सः पूर्वस्मिन् बिहारे बङ्गे उडीसायां च अभियानानि चालितवान्, यानि अभियानानि 1579 -80 तमे वर्षे मिर्जाहाकिमस्य पक्षे जातविद्रोहम् इतोऽपि जटिलं कृतवान्।

(3) 1585 -1605 तमस्य कालस्य मध्ये अकबरस्य साम्राज्यस्य विस्तारः अभवत्। उत्तर-पश्चिमे अभियानानि चालितानि। सफाविदान् पराजित्य कांधारे अधिकारं कृतवान् काश्मीरः च तस्मोन् योजितः। मिर्जाहाकिमस्य मृत्योः अनन्तरं काबुलः अपि तेन स्वराज्ये मेलितः। दक्कने अभियानानां प्रारम्भः अभवत् अथ च बरारस्य खानदेशस्य अहमदनगरस्य च काञ्चन भागान् अपि सः स्वस्य राज्येषु मेलितवान्। स्वस्य शासनस्य अन्तिमेषु वर्षेषु अकबरस्य सत्ता राजकुमारस्य सलीमस्य विद्रोहणानां कारणेन दुर्बला जाता। एषः एव सलीमः कालक्रमेण सम्राट्-जहांगीरः इति नाम्ना विख्यातः जातः।



जहांगीरः 1605 -1627

जहांगीरः अकबरस्य सैन्याभियानानि अग्रेसरान् कृतवान् । मेवाडस्य सिसोदियाशासकः अमरसिंहः मुगलानां सेवां स्वीकृतवान् । तदनन्तरं सिक्खा नां विरोधे अहोमानाम् अहमदनगरस्य च अभियानानि चालितानि, यानि पूर्णतः सफलानि न जातानि । जहांगीरस्य शासनस्य अन्तिमेषु वर्षेषु राजकुमारखर्रमः विद्रोहं कृतवान् यः पश्चात् शाहजहां इति आख्यातः । जहांगीरस्य पत्नी नूरजहां शाहजहाँ इत्येतम् उपान्तस्थं कर्तुं प्रयासान् कृतवती, ये असफलाः जाताः ।

शाहजहाँ 1627 -1658

दक्कने शाहजहांस्य अभियानानि अग्रेसराणि अतिष्ठन् । अफगानस्य अभिजातखानजहानलोदी विद्रोहं कृतवान् सः च पराजितः अभवत् । अहमदनगरं विरुद्ध्य अभियानम् अभवत् यस्मिन् बुंदेलानां पराजयः अभवत् अपि च ओरछायाः उपरि अधिकारं स्थापितवान् । उत्तरपश्चिमे बल्खस्योपरि अधिकारं कर्तुम् उजबेगान् विरुद्ध्य अभियानम् अभवत्

यत् असफलम् अभवत् । परिणामतः कांधारः सफाविदानां हस्तयोः अगच्छत् । 1632 तमे वर्षे अन्ततः अहमदनगरं मुगलानां राज्ये मेलितवान् बीजापुरस्य सेनाः सन्ध्यर्थं निवेदनं कृतवत्यः । 1657 तमे वर्षे शाहजहांवर्यस्य पुत्राणां मध्ये उत्तराधिकारविषयकः कलहः प्रारब्धः । एतस्मिन् औरंगजेबस्य विजयः अभवत् अपि च दाराशिकोहादयः त्रयोऽपि भ्रातरः मृत्युपथं नीताः । शाहजहांवर्यस्य अवशिष्टं जीवनम् आगरायाः कारागारे व्यतीतम् अभवत् ।

औरंगजेबः 1658 – 1707

(1) 1663 तमे वर्षे उत्तर-पूर्वे आहोमानां पराजयः अभवत् परन्तु ते 1680 तमे वर्षे पुनः विद्रोहं कृतवान् । उत्तर-पश्चिमे यूसफजई इत्येतेषां सिक्खानां च विरोधे अभियानानि अस्थायिरूपेण सफलानि जातानि । मारवाडस्य राठौडराजपुत्राः मुगलानां विरोधे विद्रोहं कृतवन्तः । एतस्य कारणम् आसीत् तेषाम् आन्तरिकी राजनीतेः उत्तराधिकारस्य च विषयेषु मुगलानां हस्तक्षेपः । मराठासेनापतयः शिवाजीं विरुद्ध्य मुगलाभियानस्य प्रारम्भे सफलाः अभवन् । परन्तु औरंगजेबः शिवाज्यः अपमानं कृतवान् शिवाजी आगरा-स्थितात् मुगलकारागारात् पलायितः । सः आत्मानं स्वतन्त्रशासकरूपेण घोषयित्वा पश्चात् मुगलान् विरुध्य पुनः अभियानानि चालितवान् । राजकुमारः अकबरः औरंगजेबं विरुध्य विद्रोहं कृतवान्, यस्मिन् सः मराठानां दक्कनानां च साम्राज्यस्य सहयोगं प्राप्तवान् । अन्ततः सः सफाविदम् ईरानं पलायितवान् ।

(2) अकबरस्य विद्रोहस्य अनन्तरम् औरंगजेबः दक्कनस्य शासकानां विरोधे सेनाः प्रेषितवान् । 1685 तमे वर्षे बीजपुरे तथा च 1687 तमे वर्षे गोलकुडां मुगलाः स्वस्मिन् राज्ये मेलितवन्तः । 1685 तमे वर्षे औरंगजेबः दक्कने मराठाः ये गुप्तनिरीक्षणस्य पद्धतेः प्रयोगं कुर्वन्ति स्म, तेषां विरोधे अभियानस्य प्रबन्धं स्वयं कृतवान् । औरंगजेबः उत्तरभारते सिक्खानां जाटानां सतनामिनाम् उत्तरपूर्वे अहोमानां दक्कने मराठानां विद्रोहानां सम्मुखीकरणं कर्तुं बाध्यः जातः । तस्य मृत्योः पश्चात् उत्तराधिकारार्थं युद्धस्य प्रारम्भः अभवत् ।

मानचित्रम् – 1
अकबरस्य
शासनम्,1605



राजपूतैः सह मुगलानां विवाहाः

जहांगीरस्य माता कच्छवायाः राजकुमारी आसीत् । सा अम्बरस्य (वर्तमानकाले यः जयपुरे अस्ति) राजपुत्रशासकस्य पुत्री आसीत् । शाहजहांवर्यस्य माता एका राठौड-राजकुमारी आसीत् । सा मारवाडस्य (जोधपुरस्य) राजपुत्रशासकस्य पुत्री आसीत् ।

उत्तराधिकारस्य मुगलपरम्पराः

मुगलाः ज्येष्ठाधिकारस्य नियमे न विश्वसन्ति स्म यस्मिन् ज्येष्ठपुत्रः स्वस्य पितुः राज्यस्य उत्तराधिकारी भवति स्म । एतस्य विपरीतम् उत्तराधिकारे ते सहदायादस्य मुगलवंशस्य तैमूरवंशानां च प्रथाम् अङ्गीकुर्वन्ति स्म यस्यां परम्परायाम् उत्तराधिकारस्य विभाजनं समस्तपुत्रेषु क्रियते स्म । प्रथमायां तालिकायां प्रदत्तानि वर्णयुक्तानि उद्धरणानि पठन्तु तथा च मुगलराजकुमाराणां विद्रोहैः युक्तप्रमाणेषु अवधानं कुर्वन्तु । भवताम् अनुसारम् उत्तराधिकारस्य कः उपायः सम्यक् आसीत् –ज्येष्ठाधिकारः अथवा सहदायादः ?

मुगलानाम् अन्यैः शासकैः सार्धं सम्बन्धाः

प्रथमां तालिकां पुनः पश्यन्तु । भवन्तः द्रक्ष्यन्ति यत् मुगलैः तेषां शासकानां विरोधे नैरन्तर्येण अभियानानि कृतानि, ये तेषां सत्ताम् अस्वीकृतवन्तः । यदा मुगलाः शक्तिशालिनः अभवन् तदा अन्ये शासकाः तेषां सत्तां स्वीकृतवन्तः । राजपूताः इति एतस्य सम्यक् उदाहरणानि सन्ति । अनेके मुगलसमुदायेषु स्वस्य पुत्रीणां विवाहं कृत्वा उच्चपदानि प्राप्तवन्तः । परन्तु केचन विरोधम् अपि कृतवन्तः । सिसोदियाराजपुत्राः चिरकालं यावत् वयं मुगलानां सत्तां न स्वीकरिष्यामः इति वदन्तः आसन्, परन्तु यदा ते पराजयं प्राप्तवन्तः तदा मुगलाः तैः सार्धं सम्माननीयं व्यवहारं कृतवन्तः, अपि च मुगलाः तेभ्यः तेषां राज्यानि प्रत्यर्पितवन्तः । पराजितान् करिष्यामः परन्तु अपमानितान् न करिष्यामः इति द्वयोः विषययोः मध्ये सावधानतया मुगलैः यत् सन्तुलनं कृतं तेन मुगलाः

भारतस्य अनेकेषां शासकानाम् उपरि स्वकीयं प्रभावं वर्धितवन्तः। परन्तु एतत् सन्तुलनं नैरन्तर्येण भवेत् इति एतत् कार्यं कठिनम् आसीत्। एकदा पुनः प्रथमां तालिकां पश्यन्तु। चिन्तनं कुर्वन्तु यत् यदा शिवाजी मुगलसत्तां स्वीकर्तुम् आगतवान् तदा औरंगजेबः तस्य अपमानं कृतवान्। एतस्य अपमानस्य कः परिणामः अभवत्?

पदवन्तः भूस्वामिनः च

यथा यथा साम्राज्ये विभिन्नानि क्षेत्राणि सम्मिलितानि अभवन्, तथा तथा मुगलाः विविधानां सामाजिकसमूहानां सदस्यान् प्रशासने नियोक्तुम् आरब्धवन्तः। प्रारम्भे अधिकतराः सेनापतयः तुर्कीनः आसन्, परन्तु अधुना एतेन लघुसमूहैः सह ते शासकवर्गे ईरानवासिनः भारतीयान् मुस्लिमजनान् अफगानवासिनः राजपुत्रान् मराठाजनान् अन्यान् समूहान् च सम्मेलितवन्तः। मुगलानां सेवाकार्ये आगताः राजपुरुषाः मनसबदार अर्थात् पदवन्तः इति ख्यात्याः ख्याताः अभवन्।

मनसबदार" इति शब्दस्य प्रयोगः एतादृशानां जनानां कृते भवति स्म, ये मनसब इति अर्थात् किञ्चित् सर्वकारिपदं प्राप्नवन्ति स्म। इयं मुगलैः स्थापिता श्रेणी व्यवस्था आसीत्, यया (1) पदं (2) एवं च (3) सैन्यदायित्वानि च निर्धार्यन्ते स्म। पदस्य वेतनस्य च निर्धारणं जातस्य सङ्ख्यायां निर्भरः आसीत्। जातस्य सङ्ख्या यावती अधिका भवति स्म, राजसभायाम् अभिजातस्य प्रतिष्ठा तावती वर्धते स्म अपि च तस्य वेतनम् अपि तावत् एव अधिकं भवति स्म।

यानि सैन्यदायित्वानि पदवद्भ्यः दीयन्ते स्म तदनुसारम् एव तैः अश्वारोहिणः स्थापनीयाः भवन्ति स्म। पदवन्तः स्वस्य आरोहिणां निरीक्षणार्थम् आनयन्ति स्म। ते स्वस्य सैनिकानाम् अश्वान् दगवाते इति काचित् क्रियाविशेषां कुर्वन्ति स्म अपि च सैनिकानां पंजीकरणं कारयन्ति स्म। एतेषां क्रियान्वयनानन्तरम् एव ते सैनिकेभ्यः वेतनं दातुं धनं प्राप्नुवन्ति स्म।

पदवन्तः अथवा राजपुरुषाः स्वस्य वेतनं राजस्वस्य एकत्रितकर्त्र्याः भूमेः रूपेण प्राप्नुवन्ति स्म, ये भूस्वामिनः (जागीर) इति उच्यन्ते स्म अपि च याः प्रायः "इक्ताओं" इति एतासां समम् आसीत्।

जातस्य श्रेण्यः

5000

जातयुक्तानाम् अभिजातानां श्रेणीः 1000 जातयुक्तेभ्यः अभिजातेभ्यः उन्नतः आसीत्। अकबरस्य शासनकाले 29 एतादृशाः पदविमन्तः आसन् ये 5000 जातस्य पदवी इति इत्यस्याः आसन्। औरंगजेबस्य शासनकालं यावत् एतादृशानां पदविमतां सङ्ख्याः 79 इति अभवत्। किम् एतस्य अर्थः अयम् अभवत् यत् राज्यस्य व्ययः वर्धितः।

चित्रम् – 5
स्वस्य आरोहिभिः सह एकः पदवीमान् अभियाने

चित्रम् – 5
शाहजहांवर्यस्य राजकालस्य एकस्य लघुचित्रस्य विवरणानि । अत्र जहांगीरस्य समयस्य भ्रष्टाचारः दर्शितः अस्ति –(1) भ्रष्टाधिकारिणः उत्कोचं गृह्णन् ,(2) एकः कराधिकारी निर्धनकृषकान् दण्डयन् ।

परन्तु पदवीमन्तः, मुक्ति इत्येताभ्यः भिन्नः स्वस्य भूमौ न वसन्ति स्म अपि च नैव तासु प्रशासनं कुर्वन्ति स्म । तेषां पार्श्वे स्वस्य भूमिभ्यः केवलं **राजस्वस्य** एकत्रीकरणस्य अधिकारः आसीत् । एतत् राजस्वं तेषां राजपुरुषाः तेषां कृते एकत्रीकुर्वन्ति स्म, परन्तु ते स्वयं देशस्य कस्मिंश्चित् अन्यस्मिन् भागे सेवारताः भवन्ति स्म ।

अकबरस्य शासनकाले एतासां भूमिनां सावधानतया आकलनं क्रियते स्म, यतोहि एतेषां राजस्वं पदवीमतः वेतनस्य प्रायः समं भवेत् । औरंगजेबस्य शासनकालं यावत् प्राप्तायां सत्तायां स्थितेः परिवर्तनं अभवत् । अधुना प्राप्तराजस्वं, पदवीवतः वेतनस्य अपेक्षया अतिन्यूनम् आसीत् । पदवीमतां सङ्ख्यायाम् अपि अत्यधिका वृद्धिः अभवत्, यतः तेभ्यः भूमेः प्राप्तेः पूर्वम् एका लम्बतरा प्रतीक्षा करणीया भवति स्म । एतैः सर्वैः कारणैः भूमिखण्डानां सङ्ख्यायाम् अपि न्यूनता अभवत् । परिणामः बहवः भूमिस्वामिनः भूमौ सत्याम् एतं प्रयासं कुर्वन्ति स्म यत् ते यावन्तं राजस्वं प्राप्तुं शक्नुयुः प्राप्नुयुः । स्वस्य शासनकालस्य अन्तिमेषु वर्षेषु औरंगजेबः एतेषु परिवर्तनेषु नियन्त्रणं न कर्तुं शक्तवान् । एतस्मात् कारणात् कृषकाः अत्यधिकविपत्तीनां सम्मुखीकरणं कर्तुं बाध्याः जाताः ।

जब्त अर्थात् बलिनः भूस्वामिनः च

मुगलानाम् आयस्य प्रमुखं साधनं कृषकाणाम् उत्पादनतः प्राप्तराजस्वम् आसीत् । अधिकतरेषु स्थानेषु कृषकाः ग्रामीणकुलीनानाम् अर्थात् प्रमुखानाम् अथवा स्थानीयभूपतीनां माध्यमेन राजस्वं यच्छन्ति स्म । समस्तानां मध्यस्थानां कृते भवन्तु नाम ते स्थानीयग्रामस्य प्रमुखाः अथवा पुनः शक्तिशालिनः प्रान्ताधिपयः, मुगलाः एकस्य एव जमीदार अर्थात् भूस्वामी इति शब्दस्य प्रयोगं कुर्वन्ति स्म ।

अकबरस्य राजस्वमन्त्री टोडरमलः दशवर्षाणां (1570 - 1580) कालावधेः कृते कृषेः उत्पादनस्य, मूल्यानां कृषिभूमेः च सावधानतया सर्वेक्षणं कृतवान् । एतासां सङ्ख्यानाम् आधारेण प्रत्येकं सस्ये प्रत्यक्षधनस्य रूपेण करः अर्थात् राजस्वं निश्चितवान् । प्रत्येकं राज्यं राजस्वदृष्ट्या मण्डलेषु विभक्तम् अपि च

प्रत्येकं सस्यस्य कृते राजस्वमात्रायाः पृथक् सूची कृता । राजस्वप्राप्तेः एतां व्यवस्थां "जब्त" इति उच्यते स्म । एषा व्यवस्था तेषु स्थानेषु प्रचलिता आसीत् यत्र मुगलप्रशासनिकाधिकारिणः भूमेः निरीक्षणं कर्तुं शक्नुवन्ति स्म सावधानतया तासाम् आयव्ययविवरणं स्थापयितुं शक्नुवन्ति स्म । एतादृशं निरीक्षणं गुर्जरबङ्गसदृशेषु प्रान्तेषु सम्भवं न अभवत् ।

केषुचित् क्षेत्रेषु भूस्वामिनः एतावन्तः शक्तिशालिनः आसन् यत् मुगलप्रशासकैः शोषणस्य स्थितौ ते विद्रोहं कर्तुं शक्नुवन्ति स्म । कदाचित् एकस्याः एव जातेः भूस्वामिनः कृषकाः च मुगलसत्तायाः विरोधे मिलित्वा विद्रोहं कुर्वन्ति स्म । सप्तदशशताब्द्याः अन्तिमेषु वर्षेषु एतादृशाः कृषकविद्रोहसमूहाः मुगलसाम्राज्यस्य स्थायित्वस्य कृते आह्वानं दत्तवन्तः ।

अकबर-नामा आइने-अकबरी च

चित्रम् – 7 अबुल-फज्लतः अकबरनामां स्वीकुर्वन् अकबरः

अकबरः स्वस्य घनिष्ठमित्रं राजसभायाः अबुलफज्लं च आदिष्टवान् यत् सः तस्य शासनकालस्य इतिहासं लिखेत् । अबुल-फज्लः एतम् इतिहासं त्रिषु खण्डेषु लिखितवान् तस्य शीर्षकं च अस्ति अकबरनामा इति । प्रथमे खण्डे अकबरस्य पूर्वजानाम् उल्लेखः अस्ति अपरः खण्डः अकबरस्य शासनकालस्य घटनानां विवरणं ददाति । तृतीये खण्डे आइने-अकबरी इति अस्ति । एतस्मिन् अकबरस्य प्रशासनस्य, राजकुटुम्बस्य, सेनायाः, राजस्वस्य साम्राज्यस्य भूगोलस्य च वर्णनं लभ्यते । एतस्मिन् समकालीनभारतस्य जनानां परम्पराणां संस्कृतीनां च विस्तृतं वर्णनम् अस्ति । आइने-अकबरी इत्यस्य रोचकतरः आयामः अस्ति, विविधप्रकारस्य वस्तूनां सस्यानाम् उत्पादनस्य मूल्यानां पारिश्रमिकस्य राजस्वस्य च साङ्ख्यकीयं विवरणं वर्तते ।

अकबरस्य नीतयः समीपतः दृष्टिपातः

प्रशासनस्य मुख्याभिलक्षणम् अकबरः निर्धारितवान् आसीत् अपि च एतेषां विस्तृतवर्णनम् अबुलफज्लस्य अकबरनामा इत्यस्मिन् विशेषतया आइने-अकबरी इत्यस्मिन् च लभ्यते । अबुलफज्लस्य अनुसारं साम्राज्यम् अनेकेषु प्रान्तेषु विभक्तम् आसीत्, ये सूबा इति उच्यन्ते स्म । राज्याणां प्रकाशकाः प्रान्ताधिपतयः इति उच्यन्ते स्म, ये राजनैतिकानां सैनिककार्याणां च इति द्वयोः एव कार्ययोः निर्वहणं कुर्वन्ति स्म । प्रत्येकं प्रान्ते एकः वित्तीयः अधिकारी अपि भवति स्म यः "दीवान " इति उच्यते स्म ।

तस्य सहयोगः प्राप्तः आसीत्, यथा सैनिकस्य वेतनाधिकारिणः, सदर इत्यस्य अर्थात् धार्मिकस्य धर्मार्थक्रियमाणानां कार्याणां मन्त्री, फौजदार इत्यस्य अर्थात् सेनानायकस्य अपि च कोतवाल इत्यस्य नगरस्य आरक्षक-अधिकारिणः च सहयोगः लभ्यते स्म।

जहांगीरस्य राजसभायां नूरजहाँ इत्यस्य प्रभावः



चित्रम् – 8 नूरजहाँ इत्यस्याः आदेशः

मेहरुन्निसा 1611 तमे वर्षे जहांगीरं परिणीतवती अपि च सा नूरजहाँ इत्यस्य पुरस्कारं प्राप्तवती। नूरजहां सदा जहांगीरं प्रति निष्ठावती आसीत् यथाकालं च सा सहयोगं कृतवती। नूरजहांयाः सम्माने जहांगीरेण रजतमुद्रा प्रकाशिता, यस्यां एकस्मिन् पक्षे तस्य स्वस्य पुरस्काराः उत्कीर्णाः आसन् अपि च अपरस्मिन् पक्षे इदं वाक्यं "सम्राज्ञ्याः नूरजहांयाः नाम्नः ग्रथितम्"।
वामपक्षे प्रदत्ताभिलेखः, नूरजहाँद्वारा प्रदत्तादेशः अस्ति। चतुष्कारा मुद्रा ज्ञापयति, उदात्तायाः महत्याः साम्राज्ञ्याः नूरजहां-पादशाह-बेगम इत्यस्य आदेशः"। गोलाकारायाः मुद्रायाः अनुसारं सम्राजः जहांगीरस्य प्रतापेन महासम्राज्ञी चन्द्रसदृशी वैभवशालिनी जाता, वयं कामनां कुर्मः यत् नूरजहां पादशाहा एतस्य युगस्य सर्वोत्तमा महिला भवेत्।

अकबरस्य अभिजाताः महासेनानां सञ्चालनं कुर्वन्ति स्म अत्यधिकमात्रया ते राजस्वस्य व्ययं कर्तुं शक्नुवन्ति स्म। यावत्पर्यन्तं ते निष्ठावन्तः अतिष्ठन्, तावत्पर्यन्तं साम्राज्यस्य कार्यं सफलतापूर्वकम् अचलत् परन्तु सप्तदशशताब्द्याः अन्तपर्यन्तं बहुभिः अभिजातैः स्वतन्त्ररूपेण राज्यविस्तारम् आरब्धम्। साम्राज्यं प्रति तेषां निष्ठा तेषां निजानां हितानां कारणतः दुर्बला जाता असीत्।

1570 तमे वर्षे अकबरः यदा फतेहपुरसीकरी इत्यस्याम् आसीत्, तदा सः उलेमा इत्येतैः ब्राह्मणैः जेसुइट इत्येतैः पादरी इत्येतैः ये रोमन-कैथोलिकाः आसन् जरदुश्त इति धर्मस्य अनुयायिभिः सह धर्मस्य विषयेषु चर्चाम् आरब्धवान्। एताः चर्चाः इबादतखाना इत्यस्मिन् अभवन्। अकबरस्य रुचिः विभिन्नानां जनानां धर्मेषु रीति-नीतिषु च आसीत्। एतेन विचार-विमर्शेन अकबरस्य ज्ञानं सुदृढं जातं यत् विद्वांसः धार्मिकासु रीतिषु मतान्धतायाः च उपरि बलाघातं कुर्वन्ति, एते प्रायः स्वमते दृढनिष्ठावन्तः भवन्ति। तेषां शिक्षाः प्रजायाः मध्ये विभाजनम् असामञ्जस्यं च उत्पादयन्ति। एते अनुभवाः अकबरं सुलह-ए-कुल इति अर्थात् सर्वत्र शान्तेः विचारं प्रति नीतवन्तः। सहिष्णुतायाः इयं धारणा विभिन्नानां धर्माणाम् अनुयायिनां मध्ये भेदं न कुर्वन्ति स्म अपितु

चित्रम् – 9

इबादतखाना इत्यस्मिन् अकबरः विभिन्नधर्माणां विद्वद्भिः सः चर्चयन् अस्ति ।

एतस्मिन् चित्रे किं भवन्तः जेसुइट-पादरी इत्येतान् परिचेतुं शक्नुवन्ति ?

एतस्य केन्द्रबिन्दुः आसीत् नीतिशास्त्रस्य एका व्यवस्था यस्याः क्रियान्वयनं सर्वत्र भवितुं शक्नोति स्म यस्यां च केवलं सत्यतायां न्याये शान्तेः उपरि च बलम् आसीत् ।

अबुल-फज्लः सुलह-ए-कुल इत्यस्य विचारस्य उपरि आधारित-शासन-दृष्टिनिर्माणे अकबरस्य साहाय्यं कृतवान् । शासनस्य एतं सिद्धान्तं जहांगीरः शाहजहां च अपि अङ्गीकृतवन्तौ ।

सुलह-ए-कुल इति

अकबरस्य सुलह-ए-कुल इत्यस्य नीतेः तस्य पुत्रः जहांगीरः अनेन प्रकारेण वर्णनं कृतवान् अस्ति –

ईश्वरीयस्य अनुकम्पायाः विस्तृते वक्षस्थले सर्वेषां वर्गाणां सर्वेषां च धर्माणाम् अनुयायिनाम् एकं स्थानम् अस्ति । अतः .... तस्य विशाले साम्राज्ये, यं परितः विद्यमानाः सीमाः केवलं समुद्रद्वारा एव निर्धार्यन्ते स्म विरोधिधर्माणाम् अनुयायिनाम् अपि च विभिन्नप्रकाराणां शोभनानां विचाराणां दुष्टविचाराणां च कृते स्थानम् आसीत् । अत्र असहिष्णुतायाः मार्गः पिहितः आसीत् । अत्र सुन्निमुस्लिमाः शियामुस्लिमाः च एकस्मिन् एव यवनमन्दिरे एकत्रिताः भवन्ति स्म ईसायिजनाः यहूदिजनाः च एकस्मिन् एव क्राईस्टमन्दिरे प्रार्थनां कुर्वन्ति स्म । सः सुसंगतप्रकारेण सार्विकशान्तेः अर्थात् सुलह-ए-कुल इत्यस्य सिद्धान्तस्य पालनं कृतवान् ।

सप्तदशशताब्द्यां तदनन्तरं च मुगलसाम्राज्यम्

मुगलसाम्राज्यस्य प्रशासनिकसैनिककुशलतयोः परिणामतः आर्थिक्यां वाणिज्यिक्यां च समृद्धौ वृद्धिः अभवत् । वैदेशिकाः यात्रिणः एतं धनिकदेशः इति उक्तवन्तः, यथा कथादिषु वर्णितं भवति । परन्तु एते यात्रिणः एतया प्रचुरतया सार्धं प्राप्तदरिद्रतां दृष्ट्वा विस्मिताः अभवन् । सामाजिक्यः असमानताः स्पष्टया दृश्यन्ते स्म । शाहजहाँवर्यस्य शासनकालस्य विंशतितमस्य वर्षस्य अभिलेखैः वयं जानीमः यत् एतादृशाः पदवीमन्तः जनाः ये उच्चतमं पदं प्राप्तवन्तः आसन्, ते आहत्य **8000** तः **445** इति यावत् एव आसन् । आहत्य पदवीमतां जनानां केभ्यश्चित् लघुसङ्ख्याभ्यः **5.6** प्रतिशताय एव साम्राज्यस्य अनुमानितस्य राजस्वस्य **61.5** प्रतिशतं, स्वयं तेषाम् एवञ्च तेषाम् आरोहिणां वेतनस्य रूपेण दीयते स्म ।

मुगलसम्राट् तेषां पदवीमन्तः च स्वस्य आयस्य बृहत्तमं भागं वेतने वस्तुषु च नियोजयन्ति स्म । एतेन व्ययेन शिल्पकाराः कृषकाः च लाभान्विताः भवन्ति स्म, यतोहि ते वस्तूनां सस्यानां च पूर्तिं कुर्वन्ति स्म । परन्तु राजस्वस्य भारः एतावत् आसीत् यत् प्राथमिकानाम् उत्पादकानां कृषकाणां शिल्पकाराणां च पार्श्वे निवेशार्थम् अल्पतरं धनम् अवशिष्टं भवति स्म । एतेषु ये निर्धनतमाः आसन्, कठिनतया एव उदरपूर्तिं कुर्वन्ति स्म । ते उत्पादनशक्तेः वर्धनार्थम् अतिरिक्तसंसाधनेषु अस्त्रेषु अन्यवस्तुषु च निवेशस्य विषये चिन्तयितुम् अपि न शक्नुवन्ति स्म । एतादृश्याम् अर्थव्यवस्थायाम् आढ्यतराः कृषकाः शिल्पकाराणां समूहाः, व्यापारिणः महाजनाः च अत्यधिकं लाभं प्राप्नुवन्ति स्म ।

मुगलानां कुलीनवर्गस्य हस्तेषु प्रभूतानि धनानि संसाधनानि च आसन्, येषां कारणतः सप्तदशशताब्द्याः अन्तिमेषु वर्षेषु ते अत्यधिकाः शक्तिशालिनः अभवन् । यथाकालं मुगलसम्राजां सेवकाः स्वयमेव सत्तायाः शक्तिशालिकेन्द्रभूताः अभवन् । एतेषु केचन नूतनानां वंशानां स्थापनां कृतवन्तः अपि च हैदराबाद - अवधसदृशेषु प्रान्तेषु स्वकीयं नियन्त्रणं स्थापितवन्तः । यद्यपि ते देहल्याः मुगलसम्राजं स्वामिनः रूपेण मान्यतां यच्छन्ति स्म, तथापि अष्टादशशताब्दीं यावत् साम्राज्यस्य अनेके प्रान्ताः स्वस्य स्वतन्त्रराजनैतिकपरिचयं प्राप्तवन्तः आसन् । एतस्मिन् विषये वयं दशमे अध्याये विस्तरेण चर्चयिष्यामः ।

अन्यत्र **नृपाः राज्यः च**

षोडशशताब्द्यां, मुगलानां प्रायः समकालीनाः संसारस्य विभिन्नेषु भागेषु अपि अनेके महान्तः राजानः राज्यः च आसन् । एतेषु ऑटोमन-तुर्क्याः शासक-सुलेमानः (1520 – 1566) सम्मिलिताः सन्ति । तस्य राजशासने ऑटोमनराज्यस्य विस्तारः यूरोपस्य दिशि अभवत् । सः हंगरीं स्वस्य राज्येन सह मेलितवान् अपि च ऑस्ट्रियाम् आवृतवन्तः । तस्य सैन्यदलानि बगदादम् इराकम् अपि स्वायत्तीकृतवन्ति । मोरक्को इति यावत् उत्तरी-अफ्रीकायाः अधिकतरः भागः ऑटोमनसत्तायाः शासनम् अङ्गीकरोति स्म । सुलेमानः ऑटोमन-नौसेनायाः पुनर्गठनं कृतवान् । पूर्विभूमध्यसागरस्य क्षेत्रेषु अस्याः नौसेनायाः प्रभुत्वस्य कारणेन स्पेनदेशेन सह तस्य प्रतिस्पर्धा अभवत् । अरबसागरे एषा नौसेना पुर्तगालिनः आहूतवन्तः । सम्राजे अल-कानूनी" इत्यस्य अर्थात् विधिनिर्मातुः पदवीं दत्तवन्तः । यतोहि तस्य शासनकाले अधिकसङ्ख्यायां नियमान् अधिनियमान् च रचितवन्तः आसन् । एतेषां नियमानां लक्ष्यम् इदम् आसीत् यत् वर्धमानस्य साम्राज्यस्य विभिन्नानि क्षेत्राणि मनसि निधाय प्रशासनिकानाम् उपायानां मानकीकरणं भवेत् यतोहि कृषकाः सेवाकार्यात् अधिकात् राजस्वात् च रक्षिताः भवेयुः । कालक्रमेण सप्तदशशताब्द्याम् ऑटोमन-क्षेत्रेषु यदा सार्वजनिक-व्यवस्थायाः पतनम् अभवत् तदा सुलेमान-कानूनी इत्यस्य कालम् आदर्शशासनकालस्य रूपेण स्मरणं क्रियते स्म ।

? अकबरस्य अन्यसमकालीनशासकानां विषये जानन्तु – इंग्लैंडदेशस्य शासकराज्ञी एलिजाबेथः (1558 - 1603), ईरानस्य सफाविदशासकशाहाब्बासः (1588-1629), अपि च एतेभ्यः अधिकतरः विवादास्पदः रूसिशासकः जार-ईवान-चतुर्थ-बेसिलयेविचः (1530 - 1584) यः "ईवान–दि-टेरिबलः" नाम्नः कुख्यातः अस्ति ।

कल्पनां कुर्वन्तु

बाबरः अकबरः च यदा शासकौ अभवतां तदा तौ भवताम् एव समवयाः आसन् । कल्पनां कुर्वन्तु यत् भवन्तः पैतृकसम्पत्तेः रूपेण किञ्चन राज्यं प्राप्तवन्ति । भवन्तः स्वराज्यं स्थायिनं समृद्धं च कथं निर्मास्यन्ति ?

पुनः स्मरन्तु

1 समीचीनान् युग्मान् रचयन्तु –

मनसब	***मारवाडः***
मंगोलः	***गवर्नरः***
सिसौदिया-राजपूतः	***उजबेगः***
राठौर-राजपूतः	***मेवाडः***
नूरजहां	***पदम्***
प्रान्ताधिपतिः	***जहांगीरः***

बीज-शब्दाः

मुगलः,

पदवीवान्,

भूस्वामिनः,

जातः,

आरोही,

सुलह-ए-कुल इति,

ज्येष्ठाधिकारः,

सहदायादः,

जब्त इति,

भूस्वामी ।

2 रिक्तस्थानानि पूरयन्तु ;

(क) --------- अकबरस्य विमातृज-भ्रातुः मिर्जाहाकिमस्य राज्यस्य राजधानी आसीत् ।

(ख) दक्कनस्य पञ्चसाम्राज्यानि बरारः, खानदेशः, अहमद-नगरं --------च ---आसीत् ।

(ग) यदि जातः एकस्य पदवीमतः पदस्य वेतनस्य च द्योतकः आसीत्, तर्हि आरोहिनः तस्य ---इत्येतं दर्शयति स्म ।

(घ) अकबरस्य मित्रम् अपि च परामर्शदाता, अबुलफज्लः तस्य ---- इत्यस्य विचारं बलात्पालने साहाय्यं कृतवन्तः येन सः विभिन्नसंस्कृतिभ्यः धर्मेभ्यः जातिभ्यः च निर्मितसमाजे राज्यं कर्तुं शक्तवान् ।

3 मुगलसाम्राज्यस्य अधीनस्थाः केन्द्रियाः प्रान्ताः के के आसन् ?

4 पदवीमत्सु भूमिषु च कः सम्बन्धः आसीत् ।

आगच्छन्तु जानीमः

5 मुगलप्रशासने भूस्वामिनां का भूमिका आसीत् ?

6 शासन-प्रशासन-सम्बन्धिनः अकबरस्य विचाराणां निर्माणे धार्मिकैः विद्वद्भिः जायमानाः चर्चाः कियत्यः महत्त्वपूर्णाः आसन् ?

7 मुगलाः आत्मानं मंगोलस्य अपेक्षया तैमूरस्य वंशजाः वयम् इत्यस्मिन् विषये बलाघातं कृतवन्तः ?

आगच्छन्तु विचारयामः

8 भू-राजस्वतः प्राप्तायः मुगलसाम्राज्यस्य स्थायित्वस्य कृते कुत्र पर्यन्तम् आवश्यकः आसीत् ?

9 मुगलानां कृते केवलं तूरानी अथवा ईरानी एव न, अपितु विभिन्नानां पदवीमतां नियुक्तिः किमर्थं महत्त्वपूर्णा आसीत् ?

10 मुगलसाम्राज्यस्य सामाजस्य इव वर्तमानं भारतम्, अद्य अपि अनेकाभिः सामाजिकीभ्यः सांस्कृतिक-घटकैः च निर्मितम् अस्ति ? किम् एतत् राष्ट्रियस्य एकीकरणस्य कृते एकम् आह्वानम् अस्ति ?

11 मुगलसाम्राज्यस्य अर्थव्यवस्थायाः कृते कृषकाः अनिवार्याः आसन् । किं भवन्तः चिन्तयन्ति यत् ते अद्य अपि एतावन्तः एव महत्त्वपूर्णाः सन्ति ? किम् अद्य भारते धनाढ्यस्य निर्धनस्य च मध्ये आयस्य अन्तरं मुगलानां कालस्य अपेक्षया कुत्रचित् आधिक्येन वर्धितम् अस्ति ?

आगच्छन्तु कृत्वा पश्यामः

12 मुगलसाम्राज्यस्य उपमहाद्वीपस्य विभिन्नेषु क्षेत्रेषु अनेकप्रकाराकाः प्रभावाः अभवन् । जानन्तु यत् यस्मिन् नगरे ग्रामे अथवा क्षेत्रे भवन्तः निवसन्ति, किं तस्मिन् एतस्य कोऽपि प्रभावः आगतः आसीत् ?

5 शासकाः भवनानि च

प्रथमं चित्रं कुत्बमीनारस्य प्रथमम् आलिन्दं प्रदर्शयति । कुत्बउद्दीन-ऐबकः प्रायः 1199 तमे वर्षे एतस्य निर्माणं कारितवान् आसीत् । आलिन्दस्य अधः लघुमेहराब इति तथा च ज्यामितीयाभिः रूपरेखाद्वारा निर्मितं चित्रं पश्यन्तु । किं भवन्तः आलिन्दस्य अधः अभिलेखानां पट्टिकाद्वयं पश्यन्ति ? एते अभिलेखाः अरबीभाषायां सन्ति । अवधीयन्तां यत् मीनार इत्यस्य बाह्यः भागः चक्राकारः कोणीयः च अस्ति । एतस्मिन् एव तले अभिलेखं लेखितुम् अत्यधिकायाः परिशुद्धतायाः आवश्यकता भवति स्म । सर्वाधिकः योग्यः वास्तुकारः एव एतत् कार्यं सम्पन्नतां प्रति नेतुं शक्नुवन्ति स्म । स्मरन्तु यत् अष्टभ्यः वर्षेभ्यः पूर्वं केवलं कानिचन एव भवनानि पाषाणैः इष्टकाभिः च निर्मितानि भवन्ति स्म । त्रयोदशशताब्द्यां कुत्बमीनारसदृशस्य भवनस्य द्रष्टृणां च उपरि कीदृशः प्रभावः अपतत् ?

अष्टमशताब्द्याः अष्टादशशताब्द्याः च मध्ये राज्ञां तथा च तेषाम् अधिकारिणः द्विप्रकारस्य भवनानां निर्माणं कृतवन्तः ।

चित्रम् – 1

कुत्बमीनारः पञ्चतलात्मकं भवनम् अस्ति । अभिलेखानां पट्टिकाः एतस्य प्रथमस्य तलस्य नीध्रस्य अधः सन्ति । एतस्य भवनस्य प्रथमस्य तलस्य निर्माणं कुत्ब-उद्दीन-ऐबकेन अपि च अवशिष्टानां तलानां निर्माणं 1229 तमस्य वर्षस्य निकटस्थे काले इल्तुतमिशद्वारा कारितम् अस्ति । बहुषु वर्षेषु एतत् भवनं झञ्झावातेन भूकम्प-कारणेन च क्षतिग्रस्तम् अभवत् । अलाउद्दीन-खलजी, मुहम्मद-तुगलकः, फिरोजशाह-तुगलकः, इब्राहिमलोदी च एतस्य जीर्णोद्धारं कृतवन्तः ।

प्राक्तनीयेषु भवनेषु सुरक्षितानि तथा च अस्मिन् जगति अपरस्मिन् जगति च आरामस्य विरामस्य च भव्यानि स्थानानि दुर्गाः भवनानि यवन-मृतक-मन्दिराणि च आसन्। द्वितीयायां श्रेण्यां मन्दिराणि यवनमन्दिराणि जलाशयाः कूपाः, अतिथिगृहाणि विपणिसदृशानि जनतायाः उपयोगस्य भवनानि आसन्। राजभ्यः इयम् अपेक्षा क्रियते स्म यत् ते स्वस्य प्रजायाः संरक्षणं करिष्यन्ति अपि च प्रजायाः उपयोगाय आरामाय च भवनानां निर्माणं कारयित्वा राजा तेषां पक्षतः तस्य प्रशंसा भवेत् इत्येताम् आशां कुर्वन्ति स्म । एतादृशानि निर्माणकार्याणि, व्यापारिभिः सहितम् अन्यव्यक्तिभिः अपि क्रियन्ते स्म। ते मन्दिराणां यवनमन्दिराणां कूपानां च निर्माणं कारयन्ति स्म । परन्तु गृहस्थस्थापत्यानां व्यापारिणां च विशालभवनानाम् अवशेषाः अष्टादशशताब्दीतः एव लभ्यन्ते।

अभियान्त्रिककौशलं तथा च निर्माणकार्यम्

स्मारकेभ्यः वयं तेषां स्मारकाणां निर्माणे प्रयुक्तशिल्पविज्ञानस्य ज्ञानं भवति। छदेः एव उदाहरणं स्वीकुर्वन्तु। वयं चतुर्णां भित्तीनां मध्यभूतस्य काष्ठस्य मध्यस्थमहादण्डान् अथवा एकस्य पाषाणस्य पट्टिकां स्थापयित्वा छदेः निर्माणं कर्तुं शक्नुमः। परन्तु इदं कार्यं तस्मिन् समये बहुकठिनं भवति स्म यदा वयम् एकस्याः विस्तृतस्य अधिरचनायुक्तस्य विशालकक्षस्य निर्माणं कर्तुम् इच्छामः। एतस्य कृते अत्यधिकस्य परिष्कृतस्य कौशलस्य आवश्यकता भवति।

सप्तम्याः दशम्याः शताब्द्याः च मध्ये वास्तुकाराः भवनेषु इतोऽपि अधिकाः प्रकोष्ठाः द्वाराणि वातायनानि निर्मातुम् आरब्धवन्तः। छदेः द्वाराणां वातायनानां निर्माणम् इदानीम् अपि द्वयोः उर्ध्वाधरस्तम्भानाम् अवारे-पारे एकम् अनुप्रस्थं शहतीरं स्थापयित्वा निर्मीयन्ते स्म । वास्तुकलायाः इयं शैली "अनुप्रस्थ-टोडा-निर्माणम्" इति उच्यते । अष्टमतः त्रयोदश-शताब्द्याः मध्ये यवनमन्दिरेभ्यः मस्जिदेभ्यः मक्बरेभ्यः सोपानाकारकूपेभ्यः वापीभ्यः सम्बद्धभवनानां निर्माणार्थम् अस्याः शैल्याः प्रयोगः अभवत्।

चित्रम् – 2 (क)

चित्रम् – 2 (ख)



आगरादुर्गस्य निर्माणे निहितश्रमः

अकबरद्वारा निर्मितागरादुर्गस्य निर्माणहेतुः 2,000 तमानां पाषाणकर्तृणां 2000 तमानाम् अश्मचूर्ण-श्वेताश्मचूर्ण-कर्तृणां तथा च 8000 कर्मकराणाम् आवश्यकता अभवत्।

अधिरचना

भूतलतः उपरि कस्यचित् भवनस्य भागः

चित्रम् – 2 (क)

देहल्याः कुव्वत-अल-इस्लाम-यवनमन्दिरस्य एकः भागः, (द्वादश-शताब्द्याः उत्तरार्धः)

चित्रम् – ख

मेहराबस्य निर्माणे अनुप्रस्थ-टोडा-शैल्याः प्रयोगः



एकादशशताब्द्याः प्रारम्भे मन्दिरनिर्माणम्

चित्रम् - 3 क शिवस्य स्तुतौ निर्मितस्य कंदरियामहादेव-मन्दिरस्य निर्माणं चन्देलराजवंशस्य राजा धंगदेवद्वारा 999 तमे वर्षे कृतम् आसीत्।

चित्रम् – 3 ख मन्दिरस्य योजना अस्ति । एकस्मात् अलङ्कृतद्वारात् एतस्य प्रवेशभागः मुख्यसभाभवनं (महामण्डपः) यत्र च नृत्यस्य आयोजनं भवति स्म, अलङ्कृतद्वारं मुख्यसभाभवनं यावत् गम्यते स्म । प्रमुखायाः देवतायाः मूर्तिः मुख्यमन्दिरे अर्थात् गर्भगृहे स्थाप्यते स्म । धार्मिकानुष्ठानानि एतस्मिन् स्थाने एव सम्पन्नानि क्रियन्ते स्म तथा च एतस्मिन् केवलं राजानः तेषां निकटतमकुटुम्बजनाः पुरोहिताः च एकत्रिताः भवन्ति स्म । खजुराहो-समूहे राजकीयमन्दिराणि सम्मिलितानि आसन् यत्र सामान्यजनमानसस्य कृते गमनस्य अनुमतिः न भवति स्म । एतानि मन्दिराणि सुपरिष्कृताभिः उत्कीर्णितमूर्तिभिः अलङ्कृतानि आसन्।

चित्रम् - 3 क

? द्वयोः मन्दिरयोः शिखरेषु भवन्तः किम् अन्तरम् अनुभवन्ति ? किं भवन्तः एतं ज्ञातुं शक्नुवन्ति यत् राजराजेश्वरमन्दिरस्य शिखरं कंदरियामहादेवस्य मन्दिरस्य शिखरापेक्षया द्विगुणितम् उच्चतरम् अस्ति ?

चित्रम् – 4

तंजावूरस्य राजराजेश्वरमन्दिरस्य शिखरं तस्य कालस्य मन्दिरेषु उच्चतरम् आसीत् । एतस्य निर्माणकार्यं सरलं न आसीत्, यतोहि तेषु दिनेषु किञ्चित् क्रेनयन्त्रं न आसीत् । शिखरस्य शीर्षे 90 टनमितस्य पाषाणस्य शिखरं प्रति नयनम् एतावत् भारयुक्तं भवति स्म यत् तं पाषाणं जनः स्वयम् उत्थाप्य न नेतुं शक्नोति स्म । अतः एतस्य कार्यस्य कृते वास्तुकाराः मन्दिरस्य शीर्षं यावत् प्राप्तुं उन्नतसोपानाकारमार्गं निर्मापितवन्तः । रोलर इति यन्त्रैः भारयुक्तान् पाषाणान् अनेन मार्गेण उपरि नीतवन्तः । एतस्य कार्यस्य कृते चतुर्किलोपरिमितात् लम्बतरः मार्गः सज्जीक्रियते स्म, येन आरोहणे

अधिकम् औन्नत्यं न भवेत् । मन्दिरस्य निर्माणानन्तरम् एतस्य पतनं कारितम्, परन्तु तस्य क्षेत्रस्य जनाः मन्दिरनिर्माणस्य अनुभवं चिरकालं यावत् स्मृतवन्तः । अद्यत्वे अपि मन्दिरस्य पार्श्वस्थस्य एकः ग्रामः चारू-पल्लमः इति उच्यते, यस्य शाब्दिकः अर्थः उन्नतायुक्तमार्गस्य ग्रामः ।

द्वादशशताब्द्यां प्रौद्योगिकीद्वयम् अपि च शैलीसम्बद्धानि परिवर्तनानि दृश्यन्ते –

(1) द्वाराणां वातायनानां च भारः कदाचित् कदाचित् मेहराब इत्येतेषु निपात्यते स्म । वास्तुकलायाः इदम् चापाकारं रूपम् आसीत् ।



चित्रम् – 5 क
तोरणस्य अथवा वृत्तखण्डस्य विशुद्धं रूपं
तोरणस्य मध्ये "तोरण" अधिरचनायाः भारं
तोरणस्य आधारशिलायां निपातयन्ति ।

द्वितीयस्य चित्रस्य क भागस्य अपि च द्वितीयचित्रस्य ख भागस्य तुलनां पञ्चमचित्रस्य क भागेन अपि च पञ्चमचित्रस्य ख भागेन सह कुर्वन्तु ।

(2) निर्माणकार्ये श्वेताश्मचूर्णस्य प्रयोगः वर्धितः । इदम् उच्चश्रेण्याः अश्मचूर्णं भवति स्म, यस्मिन् पाषाणस्य खण्डानां मेलनेन कंकरीट इत्यस्य निर्माणं भवति स्म । एतस्य कारणतः विशालाकृतीनां निर्माणं सरलतया तीव्रतया च अभवत् । षष्ठे चित्रे निर्माणस्थलस्य उपरि दृष्टिपातं कुर्वन्तु ।



? ज्ञापयन्तु यत् कर्मकराः किं कुर्वन्तः सन्ति, कानि कानि शस्त्राणि अदर्शयन् तथा च पाषाणानां वहनाय केषां साधनानां प्रयोगं कृतवन्तः ।

मन्दिराणां मसजिदानां जलाशयानां च निर्माणम्

मन्दिराणां यवनमन्दिराणां निर्माणम् अतीव विशिष्टपद्धत्या क्रियते स्म यतोहि ते उपासनायाः स्थलानि आसन् । ते स्वस्य संरक्षकस्य शक्तेः धन-वैभवस्य भक्तिभावस्य च अपि प्रदर्शनं कुर्वन्ति स्म । उदाहरणार्थं राजराजेश्वरमन्दिरं स्वीकर्तुं शक्यते । एकस्मात्

चित्रम् – 5 ख
तोरणस्य विशुद्धरूपम्
अलाई-द्वारस्य तोरणम्
(प्रारम्भिक-
चतुर्दशशताब्दी),
कुव्वत-अल-इस्लाम-
मसजिद इति,
देहली ।

चित्रम् – 6
आगरादुर्गे जल-द्वारनिर्माणस्य कलां दर्शयन्ती एका प्रदर्शनी चित्रकला च । एषा अकबरनामातः सङ्कलिता अस्ति ।

एकः राजकीयः वास्तुशिल्पी

मुगल-शासकस्य शाहजहाम् इत्यस्य इतिहासकारः शासकं "साम्राज्यस्य धर्मस्य च कार्यशालायाः वास्तुशिल्पी" उक्तवान् ।

अभिलेखात् एतस्य विषयस्य सङ्केतः उपलभ्यते यत् एतस्य मन्दिरस्य निर्माणं राजाराजदेवः स्वस्य देवतायाः राजराजेश्वरमस्य उपासनाहेतोः कृतवान् आसीत् । ध्यायन्तां यत् राज्ञः तस्य देवतायाः च नामनी आधिक्येन साम्यतां भजतः । राजा एतादृशं नाम एतदर्थं स्थापितवान् यतोऽहि एतत् नाम मङ्गलकारि आसीत् राजा आत्मानं च ईश्वररूपेण दर्शयितुम् इच्छति स्म । धार्मिकस्य अनुष्ठानस्य माध्यमेन मन्दिरे एका देवता (राजाराजदेवः) अपरायाः देवतायाः(राजराजेश्वरः) सम्माननं करोति स्म । सर्वेषां विशालतमानां मन्दिराणां निर्माणं राजानः कारयन्ति स्म । मन्दिरस्य अन्यलघुदेवाः शासकस्य सहयोगिनां तथा च अधीनस्थानां देवीदेवाः आसन् । एतत् मन्दिरं शासकस्य तस्य सहयोगिभिः च शासितविश्वस्य एकं लघुरूपम् एव आसीत् । यथा ते राजकीयमन्दिरेषु एकत्रीभूय स्वस्य देवानाम् उपासनां कुर्वन्ति स्म, इत्थं प्रतीयते स्म यत् ते देवानां न्यायप्रियं शासनं भूमौ आनीतवन्तः स्युः ।

मुस्लिमशासकाः तथा च राजानः आत्मानं भगवतः अवतारभूताः इति घोषणां तु न कुर्वन्ति स्म परन्तु फारसीराजसभायाः इतिहासेषु शासकस्य वर्णनम् "अल्लाह इत्यस्य छायायाः रूपेण जातः अस्ति । देहल्याः एकस्य यवनमन्दिरस्य अभिलेखतः ज्ञायते यत् अल्लाहः अलाउद्दीनं शासकरूपेण एतदर्थं चितवान्, यतोहि तस्मिन् अतीतकालस्य महतां विधिकर्तृणां मूसायाः सलेमानस्य च विशिष्टताः विद्यमानाः आसन् । सर्वेषु महान् विधिकर्ता वास्तुकारः च अल्लाहः स्वयम् आसीत् । सः अव्यवस्थां दूरीकृत्य विश्वस्य सृजनं कृतवान् तथा च काञ्चित् व्यवस्थां तस्याः सन्तुलनं च कृतवान् ।

सत्तारूढे सति प्रत्येकं राजवंशस्य राजा शासकभावस्य स्वस्य नैतिके अधिकारे बलाघातं कृतवान् । उपासनायाः स्थानानां निर्माणेन शासकेभ्यः ईश्वरेण सह स्वस्य

चित्रम् – 7
स्वस्य नूतनराजधान्यां शाहजहांनाबादे (1650-56) शाहजहांद्वारा निर्मितायाः जामीयवनमन्दिरस्य योजना ।



घनिष्ठसम्बन्धानाम् उद्घोषणायाः अवसरः दत्तः । एतादृश्यः उद्घोषणां तीव्रतया परिवर्तनस्य राजनीतेः सन्दर्भे महत्त्वं गृह्णन्ति स्म । शासकाः विदुषेभ्यः धर्मनिष्ठजनेभ्यः अपि आश्रयं दत्तवन्तः अपि च स्वस्य राजधानीः नगराणि च महत्त्वपूर्णसांस्कृतिककेन्द्राणां रूपेण परिवर्तयितुं प्रयासं कृतवन्तः । एतेन सर्वेण तेषां शासनानि राज्यानि च ख्यातिवन्ति जातानि ।

व्यापकज्ञानम् एतत् आसीत् यत् न्यायप्रियस्य राज्ञः राज्यम् एतादृशं भविष्यति, यत्र समृद्धिः भविष्यति यत्र च पर्याप्तरूपेण वृष्टिः भविष्यति । अनेन एव प्रकारेण कूपानां जलाशयानां च निर्माणेन बहुमूल्यस्य जलस्य उपलब्धताकार्यस्य अतिप्रशंसाः क्रियन्ते स्म । शासकः इल्तुतमिशः देहली-ए-कुहना इत्यस्य निकटतमस्य विशालस्य जलाशयस्य निर्माणं कृत्वा व्यापकं सम्मानं प्राप्तवान् । एतं विशालजलाशयं हौज-ए-सुलतानी इति अथवा राज्ञः तडागः इति उच्यते स्म । किं भवन्तः एतं तृतीय अध्यायस्य प्रथमे मानचित्रे अन्वेष्टुं शक्नुवन्ति ? शासकाः प्रायः समान्यजनानां कृते वृहतां लघूनां च जलाशयानां तडागानां च निर्माणं कारयन्ति स्म । कदाचित् कदाचित् ते कस्यचित् मन्दिरस्य यवनमन्दिरस्य (सप्तमे चित्रे जामीमसजिद इत्यस्य लघुजलाशये ध्यानं यच्छन्तु) अथवा गुरुद्वारस्य च भागभूताः इति भवन्ति स्म । गुरुद्वारा सिक्खानां एकत्रितभवनस्य उपासनायाः च स्थानं भवति, अष्टमे चित्रे द्रष्टुं शक्नुवन्ति ।

मन्दिराणि किमर्थं नष्टीकृतानि ?

राजानः मन्दिराणां निर्माणं स्वस्य शक्तेः धनसम्पदायाः ईश्वरं प्रति निष्ठायाः च प्रदर्शनार्थं कुर्वन्ति स्म । एतादृश्याम् अवस्थायाम् अयं विषयः आश्चर्यजनकः न प्रतिभाति यत् यदा ते अन्येषां राज्येषु आक्रमणं कृतवन्तः, तर्हि ते प्रायः एतादृशेषु भवनेषु स्वदृष्टिं दृढीकृतवन्तः ।

जलस्य महत्त्वम्

फारसीशब्दः आबाद इति आबादी च "आब" इत्यतः निर्गतः अस्ति यस्य अर्थः अस्ति जलम् । आबाद-शब्दः तस्य स्थानस्य कृते प्रयुज्यते स्म, यत्र बसावट इति स्यात् । एतस्य एकः अन्यः अर्थः समृद्धिः अपि अस्ति । आबादी इत्यस्य अर्थः जनसङ्ख्या अपि च समृद्धिः इति द्वौ अपि स्तः ।

चित्रम् -8

हरमंदरसाहब इति (स्वर्णमन्दिरम्) अपि च तस्य पवित्रसरोवरः, अमृतसरः

चित्रम् – मुगल-चारबाग इति



(क)हुमायूँ इत्यस्य स्मारकस्य चारबाग इति देहली, 1562-71



(ख)काश्मीरे शालीमारबागस्य सोपानाकारः चारबाग इति, 1620 अपि च 1634



(ग) लालमहलवातायने चारबाग इत्येतं तटीयोद्यानस्य रूपे स्वकृतम्, 1637

नवम्याः शताब्द्याः आरम्भे यदा पांड्यनराजा श्रीमरश्रीबल्लभः श्रीलङ्कायाः उपरि आक्रमणं कृत्वा राजासेनप्रथमं (831-851)पराजितवान् आसीत्, तस्य विषये बौद्धभिक्षुः अपि च इतिहासकारः धम्मकित्तिः लिखितवान् यत्, "सर्वाणि बहुमूल्यानि वस्तूनि अनयत् --- रत्नमहले स्थापितस्वर्णनिर्मितबुद्धस्य मूर्तिं --- अपि च विभिन्नमठेषु स्थापितसुवर्णस्य प्रतिमाः – सः एतान् सर्वान् स्वायत्तीकृतवान् ।" सिंहलीशासकस्य आत्माभिमानम् एतस्मात् यः आघातः प्राप्तः आसीत्, तस्य प्रतिकारः स्वीकर्तव्यः इति स्वाभाविकः आसीत् । अग्रिमेण सिंहलिशासक-द्वितीयेन स्वकीयः सेनापतिः पाण्ड्यानां राजधानीमदुरयी इत्यस्याः उपरि आक्रमणं कर्तुम् आदिष्टः । बौद्धः इतिहासकारः लिखितवान् यत् अस्मिन् अभियाने बुद्धस्य स्वर्णमूर्तेः अन्वेषणस्य तथा च प्रत्यानेतुं महत्त्वपूर्णाः प्रयासाः कृताः ।

अनेन एव प्रकारेण एकादशशताब्द्याः प्रारम्भे यदा चोलराजा राजेन्द्रप्रथमः स्वस्य राजधान्यां शिवमन्दिरस्य निर्माणं कारितवान् आसीत् तदा सः पराजितशासकैः परिहृताभिः उत्कृष्टप्रतिमाभिः एतं पूर्णं कृतवान् । एकस्याम् अपूर्ण्यां सूच्यां निम्नलिखितानि वस्तूनि सम्मिलितानि आसन् चालुक्येभ्यः प्राप्ता एका सूर्यपीठिका एका गणेशमूर्तिः अपि च दुर्गायाः अनेकाः मूर्तयः, पूर्वीचालुक्येभ्यः प्राप्ता एका नंदीमूर्तिः, उडीसायाः कलिङ्गतः प्राप्ता भैरवस्य भैरव्याः च एका प्रतिमा तथा च बङ्गस्य पालेभ्यः प्राप्ता कालीदेव्याः प्रतिमा ।

गजनीदेशस्य शासकः महमूदराजेन्द्रप्रथमस्य समकालीनः आसीत् । भारते स्वस्य अभियानानां काले सः पराजितानां राज्ञां मन्दिराणि अपवित्राणि कृतानि । अपि च तेषां धनानि मूर्तीः अपहृतवन्तः । तस्मिन् काले शासकः महमूदः महत्त्वपूर्णः शासकः न आसीत्, परन्तु मन्दिराणि नष्टीकृत्य विशेषतया सोमनाथस्य मन्दिरं तत् एकस्य महान् यवनयोद्धृरूपेण श्रेयसः प्राप्तेः प्रयासं कृतवान् । मध्ययुगीयराजनैतिकसंस्कृतौ अधिकतराः शासकाः स्वस्य राजनैतिकबलस्य सैनिकप्रदर्शनस्य च प्रदर्शनं पराजितशासकानाम् उपासनास्थलेषु आक्रमणं कृत्वा तेषां सम्पत्तेः च अपहरणं कर्तुं शक्नुवन्ति स्म ।

? राजेन्द्रप्रथमस्य महमुदगजनवी च इत्यनयोः नीतयः केषु रूपेषु समकालीनस्य समस्य दानम् आसीत् अपि च केषु रूपेषु एते परस्परं भिन्नाः आसन् ?

उद्यानानि, स्मारकाणि दुर्गाः च

मुगलानाम् अधीनस्थाः वास्तुकलाः इतोऽपि जटिलतराः अभवन् । बाबरः, हूमायूँ अकबरः जहांगीरः विशेषत्वेन शाहजहां साहित्यकलायाम् अपि च कलायां वास्तुकलायां च व्यक्तिगतरूपेण रुचिं स्वीकुर्वन्ति स्म । स्वस्य आत्मकथायां बाबरः औपचारिकोद्यानानां

योजनानां विषये तेषां क्रियान्वयने च स्वकीयायाः रुच्याः च वर्णनं कृतवान् अस्ति । प्रायः एतानि उद्यानानि भित्त्या आवृत्ताः भवन्ति स्म । अपि च कृत्रिमकूल्याभिः चतुर्षु भागेषु विभाजितायताकारे स्थिताः आसन् । औपचारिकाणाम् उद्यानानां योजनासु तासां क्रियान्वयने विवरणस्य सज्जीकरणे बाबरः स्वस्य रुच्याः वर्णनं कृतवान् ।



चतुर्षु विभागेषु विभाजन-कारणतः एतानि चत्वारि उद्यानानि इति उच्यन्ते स्म । चतुर्णाम् उद्यानानां निर्माणस्य परम्परा अकबरस्य कालतः आरब्धा । केषाञ्चित् सुन्दराणाम् चतुर्णाम् उद्यानानां निर्माणं जहांगीरः शाहजहां च काश्मीरेषु आगरायां देहल्यां च कारितवन्तौ।

अकबरस्य शासनकाले बहुप्रकाराकाः महत्त्वपूर्णाः वास्तुकलात्मकाः नवाचाराः अभवन् । एतेषां नवाचाराणां प्रेरणाम् अकबरस्य वास्तुशिल्पकाराः तस्य मध्यैशियायीपूर्वजस्य तैमूरस्य स्मारकेभ्यः स्वीकृतवन्तः । हूमाय्वोः स्मारके सर्वादौ दर्शनीयं केन्द्रीयं शिखरम् (यः उच्चतरः आसीत्) अपि च उच्चतरं तोरणम् अर्थात् प्रवेशद्वारं (पिश्तक) मुगलवास्तुकलायाः महत्त्वपूर्णानि रूपाणि जातानि । अयं स्मारकः एकस्य विशालस्य औपचारिकस्य चतुरोद्यानस्य मध्ये स्थितः आसीत् । एतस्य निर्माणम् अष्टौ स्वर्गाः इत्येतेषाम् अथवा हश्त-विहिश्त इत्यस्य परम्परायां जातं आसीत् । यस्मिन् एकः केन्द्रियकक्षः अष्टभिः प्रकोष्ठैः आवृत्तः भवति स्म । एतस्य भवनस्य निर्माणं रक्त-सिकता-पाषाणैः जातः आसीत् एतस्य तटप्रान्ताः श्वेतसंगमरमर-पाषाणैः निर्मिताः आसन् ।

चित्रम् -10 काबुले चतुरोद्यानस्य रचनां कुर्वतः बाबरस्य 1590 तमवर्षस्य काचित् चित्रकला । ध्यायन्तां कीदृशे मार्गे परस्परं कर्तयन्ती कूल्याः चतुरोद्यानयोजनायाः वैशिष्ट्यं निर्मान्ति ।

चित्रम् – 11

1562 अपि च 1571 तमवर्षयोः मध्ये निर्मितहुमाय्वः स्मारकम् । किं भवन्तः कुल्यां द्रष्टुं शक्नुवन्ति ?

चित्रम् – 12

देहल्यां दीवान –ए-आम इत्यस्मिन् सिंहासनस्य प्रान्तभागः । एतस्य निर्माणं 1648 तमे वर्षे पूर्णं कृतम् आसीत् ।



शाहजहांवर्यस्य शासनकालस्य अवधौ मुगलवास्तुकलायाः विभिन्नानि तत्त्वानि एकस्मिन् विशाले सद्भावपूर्णे संश्लेषणे मेलिताः । शाहजहांवर्यस्य शासनकाले अनवरतं निर्माणकार्याणि अचलन्, विशेषरूपेण आगरायां देहल्यां च । सार्वजनिकायाः व्यक्तिगतायाः च सभायाः हेतोः समारोहकक्षाणां (दीवान –ए – खास अपि च दीवान – ए – आम) योजना अतीव सावधानीपूर्वकं निर्मीयते स्म । एकस्मिन् विशाले क्रीडाङ्गणे स्थिताः एताः राज्यसभाः चिहिल-सुतुन इति अथवा चत्वारिंशत् स्तम्भानां सभाभवनानि अपि उच्यन्ते स्म ।

शाहजहांवर्यस्य सभाभवनं विशेषरूपेण यवनमन्दिरसदृशाः निर्मिताः आसन् । तस्य सिंहासनं यस्मिन् मञ्चे स्थापितम् आसीत् सः किबला (नमाज इति काले मुस्लिमजनानां पुरस्था दिशा) इति उच्यते स्म यतोहि यस्मिन् समये राजसभा चलति स्म तस्मिन् समये प्रत्येकं जनः ताम् अभिमुखीभूय एव उपविशति स्म । एतेषां वास्तुकलात्मकानाम् अभिलक्षणानाम् एतं प्रति सङ्केतः भवति स्म यत् राजा पृथिव्याम् ईश्वरस्य प्रतिनिधिः आसीत् ।

शाहजहांवर्यः देहल्याः रक्तदुर्गस्य स्वस्य नवनिर्मितराजसभायां राजकीयस्य न्यायस्य विशिष्टराजसभायाः च अन्तःसम्बन्धे बहुबलं दत्तवान् । सम्राजः सिंहासनस्य पृष्ठतःपितरा-दूरा इत्यस्य जडा ऊकार्यस्य एकां शृङ्खलां निर्मितवान् आसीत्, यस्यां पौराणिकयूनानिदेवताम् आर्फियस इत्येतां वीणां वादयन्तीं चित्रितवन्तः आसन् ।

पितरा-दूरा

उत्कीर्ण-सङ्गमरमर इति अथवा सिकता-पाषाणयोः उपरि वर्णयुक्तान् दृढपाषाणान् नोदयित्वा निर्मितानि नूतनानि अपि च अलङ्कृतानि चित्राणि ।

इत्थं मन्यते स्म यत् आर्फियस इत्यस्य सङ्गीतम् आक्रामकान् पशून् अपि शान्तान् कर्तुं शक्नोति अपि च ते शान्तिपूर्वकं परस्परं वसन्ति । शाहजहांवर्यस्य सार्वजनिकसभाभवनस्य निर्माणम् एतत् सूचयति स्म यत् न्यायकाले राजा उच्चवर्गैः निम्नवर्गैः च सह समानव्यवहारं करिष्यति सर्वे जनाः परस्परं सद्भावेन सह स्थास्यन्ति।

शासनस्य आरम्भिकवर्षेषु शाहजहांवर्यस्य राजधानी आगरा आसीत् । अस्मिन् नगरे विशिष्टवर्गाः स्वस्य गृहाणां निर्माणं यमुनायाः तीरेषु कारितवन्तः आसन् । एतेषां निर्माणं चतुरोद्यानस्य रचनायाः समम् एव औपचारिकोद्योगानां मध्ये अभवत् । चतुरोद्यानस्य योजनायाः अन्तर्गतम् एव भिन्नप्रकारस्य उद्यानानि अपि आसन् यानि इतिहासकाराः नदी-तट-उद्यानम् इति कथयन्ति । एवंविधे उद्याने निवासस्थानं चतुरोद्यानस्य मध्ये न भूत्वा नदीतटानां नातिदूरे उद्यानस्य सर्वथा तटे एव भवति स्म।

शाहजहांवर्यः स्वस्य शासनस्य भव्यतमवास्तुकलात्मकोपलब्धिः ताजमहलस्य प्रतिरूपे (मानचित्रे) नदी-तटोद्यानस्य योजनाम् अनुसृतवान् । अत्र श्वेतमणिशिलायाः यवनमृत्युस्मारकः नदीतटस्य एकस्मिन् प्रान्तदेशे तथा च उद्यानम् एतस्य दक्षिणे निर्मितम् आसीत्। नद्यां सर्वेषाम् अभिजातानां प्राप्तौ नियन्त्रणहेतुः शाहजहांवर्यः एतत् वास्तुकलात्मकरूपं विकसितवान् । देहल्यां शाहजहांनाबादे सः यत् नूतनं नगरं निर्मापितवान् तस्मिन् राजभवनं नद्यां स्थितम् आसीत् । केवलं विशिष्टकृपाप्राप्ताभिजातानां कृते यथा तस्य ज्येष्ठपुत्रस्य दाराशिकोहस्य एव नदीं यावत् गन्तुम् आज्ञा आसीत् । अन्यैः सर्वैः स्वस्य गृहस्य निर्माणं यमुनानदीतः दूरे नगरे करणीयं भवति स्म।

चित्रम् – 13

आगरास्थः तेजोमहलम्, यस्य निर्माणम् 1643 तमे वर्षे पूर्तिम् अगच्छत्।



चित्रम् – 14

एकस्मात् मानचित्रात् आगरायाः नदीतट-उद्यान-नगरस्य पुनर्कल्पितं दृश्यम् । ध्यायन्तु यत् कथं यमुनायाः द्वयोः तटयोः अभिजातानाम् उद्यानानि महालयाः च स्थिताः सन्ति । तेजोमहलं वामपक्षे अस्ति । 15 चित्रे प्रदत्तदेहल्याः शाहजहांनाबादस्य योजनायाः तुलनाम् आगरायाः योजनया सह कुर्वन्तु ।

यमुना-नदी

चित्रम् – 15

1850 तमस्य वर्षस्य शाहजहांवर्यस्य एकं मानचित्रम् । राज्ञः निवासः कुत्र अस्ति ? नगरं बहुसघनम् इति प्रतीयते परन्तु किं भवन्तः अत्र महान्ति उद्यानानि अपि द्रष्टुं पारयन्ति ? किं भवन्तः मुख्यमार्गं जामीयवनमन्दिरं च अन्वेष्टुं शक्नुवन्ति ।

क्षेत्राणि साम्राज्यानि च

अष्टम्याः अष्टादश्याः च शताब्द्याः मध्ये यदा निर्माणसम्बद्धासु गतिविधिषु वृद्धिः जाता, तदा विभिन्नक्षेत्राणां मध्ये विचाराणाम् अपि पर्याप्तमात्रया आदानं प्रदानं च अभवत् । एकस्य क्षेत्रस्य परम्पराः अपरेण क्षेत्रेण अङ्गीकृता । उदाहरणार्थं विजयनगरे राज्ञां गजशालासु बीजापुरस्य गोलकुंडासदृशानां पार्श्वस्थानां साम्राज्यानां वास्तुकलात्मकशैल्याः अतीव प्रभावः अभवत् । षष्ठाध्याये पश्यन्तु । मथुरायाः समीपे स्थिते वृन्दावने निर्मितमन्दिराणां वास्तुकलात्मकशैली फतेहपुरसीकर्याः मुगलभवनैः सह बहुसाम्यतां भजन्ते स्म ।

विशालसाम्राज्यानां निर्माणं विभिन्नक्षेत्राणि तेषां शासनस्य अधीनम् आनीतवान् । एतेन कलात्मकरूपाणां वास्तुकलात्मकशैलीनां च परसंसेचने साहाय्यं लब्धम् ।



मुगलशासकाः स्वस्य भवनानां निर्माणे क्षेत्रीयवास्तुकलात्मकशैल्याः स्वीकरणे विशेषतया दक्षाः आसन् । उदाहरणार्थं बङ्गे स्थानीयैः शासकैः छदेः कुटीरस्य समानं दर्शनीयाः छदेः निर्माणं कारितवन्तः । मुगलशासकेभ्यः अयं "बाङ्गला-गुंबद इति एतावान् अरोचत् यत् ते स्वस्यां वास्तुकलायाम् एतस्य प्रयोगं कृतवन्तः । एतेषां क्षेत्राणां प्रभावः अपि स्पष्टः आसीत् । अकबरस्य राजधानी फतेहपुरसीकर्याः बहुषु भवनेषु गुर्जरस्य मालवायाः च वास्तुकलात्मकशैलीनां प्रभावः दृश्यते ।

16 चित्रम्

वृन्दावने गोविंददेवस्य मन्दिरस्य अन्तर्भागः 1590, एतस्य मन्दिरस्य निर्माणं रक्तसिकता-पाषाणेन अभवत् । द्वयोः प्रतिच्छेदितोरणयोः ध्यायन्तु, यतः एतस्य उच्चान्तच्छद्याः निर्माणं कृतम् आसीत् । वास्तुकलायाः इयं शैली उत्तर-पूर्वी-ईरानतः आगता अपि च फतेहपुरसीकर्याम् एतस्य प्रयोगः कृतः आसीत् ।



अष्टादशशताब्द्याः आरभ्य मुगलशासकानां सत्तायाः चाक्चक्यविरहितायाः अनन्तरम् अपि तेषाम् आश्रये विकसितायाः वास्तुकलात्मकशैल्याः निरन्तरप्रयोगे अतिष्ठत् अपि च अन्यशासकाः यदा आत्मनः राज्यस्थापनस्य प्रयासं कृतवन्तः तदा ते एतां शैलीम् एव अङ्गीकृतवन्तः ।

17- चित्रम् फतेहपुरसीकर्याः जोधाबायीमहालये छदेः विस्तारं वहन्तः अलङ्कृतस्तम्भाः उपस्तम्भाः च । एते गुर्जरक्षेत्रस्य वास्तुकलात्मकपरम्पराभ्यः प्रभाविताः सन्ति ।

आकाशं स्पृशन्ति क्राईस्टमन्दिराणि



द्वादशताब्दीतः फ्रांसदेशे आरम्भिकभवनानां तुलनायाम् उच्चतराणाम् अल्पभारयुक्तानां च क्राईस्टमन्दिराणां निर्माणस्य प्रयासाः प्रारब्धाः । वास्तुकलायाः इयं शैली "गोथिक" नाम्ना ज्ञायते । अस्याः शैल्याः वैशिष्ट्यानि सन्ति कण्टकिलाः तोरणाः, वर्णयुक्तस्य काचस्य प्रयोगः, यस्मिन् प्रायः बायीबिलतः गृहीतदृश्यानां चित्रणम् अस्ति उड्यमानाः पुश्ते इति । दूरतः एव दृश्यमानाः उच्च-मीनार इति अपि च घण्टायुक्ताः बुर्ज इति पश्चात् योजिताः सन्ति ।

अस्याः वास्तुकलात्मकशैल्याः सर्वोत्कृष्टज्ञातेषु उदाहरणेषु एकं पेरिसस्य नाट्रेडमचर्च इति अस्ति । द्वादशशताब्द्याः त्रयोदशशताब्द्याः च अनेकेषु दशकेषु एतस्य निर्माणम् अभवत् ।

? प्रथमे चित्रे एकं दृष्टिपातं कुर्वन्तु अपि च घण्टायुक्तानां बुर्ज इत्येतेषाम् अन्वेषणस्य प्रयासं कुर्वन्तु ।

कल्पनां कुर्वन्तु

भवान् शिल्पकारः अस्ति अपि च भूमितः पञ्चाशत्मीटरोन्नते स्थाने वेणुदण्डस्य रज्जोः च सहायतया निर्मितस्य काष्ठस्य एकस्मिन् लघुतरे मञ्चे स्थितः अस्ति। भवता कुत्बमीनारस्य प्रथमस्य प्रान्तभागस्य अधः एकः अभिलेखः योजनीयः अस्ति। भवान् एतत् कार्यं कथं करिष्यति ?

पुनः स्मरन्तु

1 वास्तुकलायाः "अनुप्रस्थटोडानिर्माण-सिद्धान्तः "चापाकार-सिद्धान्ततः केन प्रकारेण भिन्नः अस्ति।

2 "शिखरः" इत्यस्मात् भवतां कः अभिप्रायः अस्ति ?

3 "पितरा-दूरा" इति किम् अस्ति ?

4 एकस्य मुगलचारबागस्य काः मुख्याः विशेषताः सन्ति ?

आगच्छन्तु जानीमः

5 कस्माच्चित् मन्दिरात् एकस्य राज्ञः महत्तायाः सूचना कथं लभ्यते ?

6 देहल्यां शाहजहः दीवान –ए – खास इत्यस्मिन् अभिलेखे उक्तम् अस्ति –"यदि पृथिव्यां कुत्रचित् स्वर्गः अस्ति तर्हिः सः अत्र एव अस्ति, अत्र एव अस्ति, अत्रैव अस्ति ? इयं धारणा कथम् अभवत् ?

7 मुगलराजसभातः एतस्य विषयस्य सङ्केतः कथं लभ्यते यत् सम्राजः धनिभ्यः निर्धनेभ्यः शक्तिशालिभ्यः कृषकजनेभ्यः च समानन्यायस्य प्राप्तिः भविष्यति ?

8 शाहजहांनाबादे नूतनस्य मुगलनगरस्य योजनायां यमुनानद्याः का भूमिका आसीत् ?

बीज-शब्दः

सम्पूर्णं पाठं पठित्वा षण्णां शब्दानाम् एकां सूचीं निर्मान्तु। एतस्यां प्रत्येकं कृते एतस्य तर्कस्य पुरस्सरं ज्ञापनीयं यत् भवन्तः तस्य शब्दस्य चयनं किमर्थं कृतवन्तः, एकेन वाक्येन लिखन्तु।

आगच्छन्तु विचारयामः

9 अद्यत्वे धनिनः शक्तिशालिनः च जनाः विशालगृहाणां निर्माणं कारयन्ति। अतीतकाले राज्ञां तेषां राजपुरुषाणां च निर्माणानि केषु अर्थेषु एतेभ्यः भिन्नानि आसन् ?

10 चतुर्थे चित्रे दृष्टिपातं कुर्वन्तु। इदं भवनं कथम् अद्य तीव्रगत्या निर्मापयितुं शक्यते ?

आगच्छन्तु कृत्वा पश्यामः

11 जानन्तु यत् किं भवतां ग्रामे अथवा नगरे कस्यचित् महापुरुषस्य काचित् प्रतिमा कमपि स्मारकं च अस्ति ? एतत् तत्र किमर्थं स्थापितम् अस्ति ? एतस्य प्रयोजनं किम् अस्ति ?

12 स्वस्य परिवेशे विद्यमानस्य कस्यचित् उद्यानस्य पर्यटनस्थानस्य च यात्रां कृत्वा तस्य वर्णनं कुर्वन्तु। केषु अर्थेषु एतानि मुगलोद्यानानां समानम् अथवा भिन्नानि सन्ति?

6 नगराणि व्यापारिणः शिल्पिजनाः च

एकस्य मध्ययुगीननगरस्य यात्रायाम् आगतः कश्चित् यात्री, तस्य नगरस्य विषये कीदृशीः आकाङ्क्षा स्वमनसि स्थापयिष्यते ? एषः विषयः एतस्मिन् तथ्ये निर्भरं करोति यत् तत् नगरं कथंविधम् आसीत्, किं तत् मन्दिरनगरम् आसीत् अथवा किञ्चन प्रशासनिककेन्द्रम् आसीत्, किञ्चन वाणिज्यिकं नगरं, किञ्चन पत्तनगगरम् अथवा किञ्चित् अन्यप्रकारकं नगरम् आसीत् । वस्तुतः अनेकानि नगराणि सार्धमेव अनेकप्रकारकाणि आसन्, तानि प्रशासनिकनगराणि तथा च मन्दिराणि नगरे सति अपि तेन सार्धं वाणिज्यिककार्यकलापानाम् अपि च शिल्पोत्पादनानां केन्द्राणि अपि आसन् ।

1 **मानचित्रम्**

मध्ये दक्षिणे च भारते व्यापारस्य शिल्पकार्योत्पादनस्य कानिचन प्रमुखकेन्द्राणि ।

प्रशासनिककेन्द्राणि

द्वितीये अध्याये भवन्तः चोलवंशस्य विषये पठितवन्तः। आगच्छन्तु, वयं स्वकल्पनाधारेण चोलराज्ञां राजधान्याः तंजावूरस्य यात्रां कर्तुं चलामः यथा सा सहस्रं वर्षेभ्यः पूर्वम् आसीत्। वर्षे द्वादशमासेषु प्रवहणशीला कावेरीनदी एतस्य सुन्दरनगरस्य पार्श्वतः प्रवहति।

राजा राजराजचोलद्वारा निर्मितस्य राजराजेश्वरमन्दिरस्य घण्टाः नुदन्तः श्रूयन्ते । जनाः नगरस्य वास्तुकारस्य कुंजरमल्लनराजराजपेरूथच्चनस्य वास्तुकलायाः प्रशंसां कुर्वन्तः श्रान्ताः न भवन्ति। वयं वास्तुकारस्य नाम एतदर्थं जानीमः यतोहि सः गर्वेण स्वकीयं नाम मन्दिरस्य भित्तौ उत्कीर्णवान् । मन्दिरस्य अन्तः एकं विशालं शिवलिङ्गं स्थापितम् अस्ति।

एतत् मन्दिरम् अतिरिच्य नगरे अनेके राजमहालयाः सन्ति, येषु अनेके मण्डपाः निर्मिताः सन्ति। राजानः एतेषु मण्डपेषु राजसभाः कुर्वन्ति स्म। इतः एव ते स्वस्य अधीनस्थजनानां कृते सन्देशान् प्रेषयन्ति। नगरे सैन्यशिबिराणि अपि निर्मितानि सन्ति।

नगरं तेषां विपणिनां क्रियाकलापैः पूरितम् अस्ति, यत्र अन्नस्य उपस्कराणां वस्त्राणाम् आभूषणानां विक्रयणं भवति। नगरस्य कृते जलस्य आपूर्तिः कूपेभ्यः तडागेभ्यः च भवति। तंजावूरस्य तस्य च निकटवर्तिनगरस्य उरैयूरस्य सालीयतन्तुवायाः मन्दिरस्य उत्सवस्य कृते ध्वजं निर्मातुं वस्त्रं राज्ञः अभिजातवर्गस्य च कृते उत्तमं कार्पसिकवस्त्राणि जनसाधारणस्य च कृते स्थूलं कार्पासिकं वस्त्रं निर्मान्तः सन्ति । इतः नातिदूरे स्वामीमलायी इत्यस्मिन् स्थपतयः अथवा मूर्तिकाराः उत्तमानां कांस्यप्रतिमानां तथा च उन्नतसुन्दर-घंटाधातोः दीपकानां च निर्माणं कुर्वन्तः सन्ति।

भवतां मते जनाः तंजावूरम् एकं महत् नगरम् अस्ति इति किमर्थम् मन्यन्ते स्म ?

मन्दिरनगरं तीर्थकेन्द्रं च

तंजावूरः एकं मन्दिरनगरस्य अपि उदाहरणम् अस्ति। मन्दिरनगराणि नगरीकरणस्य एकम् अत्यन्तं महत्त्वपूर्णं प्रतिरूपं प्रस्तुवन्ति । नगरीकरणं नगराणां विकासस्य प्रक्रिया अस्ति मन्दिराणि प्रायः समाजस्य अर्थव्यवस्थायाः च कृते एव अत्यन्तं महत्त्वपूर्णानि भवन्ति स्म । शासकाः विभिन्नदेवी-देवाताः प्रति स्वस्य भक्तिभावं प्रदर्शयितुं मन्दिराणि निर्मापयन्ति स्म । ते मन्दिराणि भूमिरूपेण धनानुदानरूपेण च यच्छन्ति स्म । येषां आयमाध्यमेन धार्मिकानुष्ठानानि विधिविधानेन सम्पन्नानि क्रियन्ते स्म, तीर्थयात्रिणः पुरोहितान् पण्डितान् च भोजयन्ति स्म पर्वोत्सवाः च आयोज्यन्ते स्म । मन्दिरस्य दर्शनार्थिनः अपि दानदक्षिणां च यच्छन्ति स्म।

कांस्यम्, घण्टा-धातुः, "लुप्तमोम" कौशलम्

कांस्यं कश्चन मिश्रधातुः भवति, यत् ताम्रस्य रांगा इत्यस्य च मेलनेन निर्मीयते । घण्टाधातौ रांगा इत्यस्य अनुपातं कस्यापि अन्यप्रकारस्य कांस्यतः अधिकं भवति । इदं घण्टाध्वनिवत् ध्वनिम् उत्पादयति । चोलकालीनः कांस्यप्रतिमाः (द्वितीये अध्याये पश्यन्तु) "लुप्तमोम" इति शैल्या निर्मीयते स्म । अस्य प्रविधेः अन्तर्गतं सर्वप्रथमं सिक्थस्य एका प्रतिमा निर्मीयते स्म । एतां स्निग्धमृत्तिकया सम्पूर्णतया लेपयित्वा शोषणस्य कृते त्यज्यते स्म । यदा सा सर्वथा शुष्का भवति स्म तदा सा उष्णीक्रियते स्म अपि च तस्याः मृत्तिकायाः आवरणे एकं लघुच्छिद्रं कृत्वा तस्य छिद्रस्य माध्यमेन सम्पूर्णं लयप्राप्तं सिक्थं बहिः निष्कास्यते स्म । पुनः स्निग्धमृत्तिकायाः रिक्ते प्रतिरूपे तच्छिद्रद्वारेणैव विलयप्राप्तधातुः पूर्यते स्म । यदा सः धातुः शीतलीभूय ठोसभावम् अर्थात् दृढताम् उपयाति स्म तदा स्निग्धमृत्तिकायाः आवरणं सावधानतया अपसार्यते स्म अपि च ततः निष्कासितप्रतिमां स्वच्छीकृत्य दीप्तियुक्तां कुर्वन्ति स्म ।

? भवतां विचारानुसारम् अस्य प्रविधेः प्रयोगस्य के के लाभाः आसन् ?



1 चित्रम् कांस्यप्रतिमा , यस्यां श्रीकृष्णः नागराक्षसं कालियां नियन्त्रीकुर्वन् दर्शितः अस्ति ।

मन्दिरस्य कार्यकर्तारः मन्दिरस्य धनं व्यापारे अर्थव्यवसाये च नियोजयन्ति स्म । शनैः शनैः कालक्रमेण, महत्यां सङ्ख्यायां पुरोहिताः अर्चकाः कर्मकराः शिल्पिनः व्यापारिणः इत्यादयः मन्दिरस्य तस्य दर्शनार्थिनां तीर्थयात्रिणां च आवश्यकताः पूरयितुं मन्दिरस्य समीपस्थेषु स्थानेषु वासम् आरब्धवन्तः । अनेन प्रकारेण मन्दिरनगराणां विकासः अभवत् । अनया रीत्या मन्दिराणां परितः अनेकेषां नगराणाम् आविर्भावः अभवत् । यथा मध्यप्रदेशे भिल्लस्वामिनः गुर्जरे च सोमनाथस्य । कानिचन अन्यानि महत्त्वपूर्णानि मन्दिरनगराणि तमिलनाडुराज्ये कांचीपुरं मदुरै तथा च आन्ध्रप्रदेशे तिरुपतिः च सन्ति ।

तीर्थस्थलानि अपि शनैः शनैः नगररूपेण विकसितानि जातानि । वृन्दावनम् (उत्तर-प्रदेशः) तिरुवन्नमलायी इति (तमिलनाडुः) एतादृशाणां नगराणां द्वे उदाहरणे स्तः । अजमेरः (राजस्थानम्) द्वादशशताब्द्यां चौहानराज्ञां राजधानी आसीत् अपि च कालक्रमेण मुगलानां शासने सा "सूबा" मुख्यालयः अभवत् । इदं नगरं धार्मिकसहास्तित्वस्य एकम् उत्कृष्टम् उदाहरणं प्रस्तौति । सुप्रसिद्धः सूफी-संत-ख्वाजा-मुयीनुद्दीन-चिश्तीवर्यः अत्र द्वादशशताब्द्यां निवासं कृतवान् । अपि च तस्य दर्शनार्थिनः श्रद्धालवः च सर्वे सम्प्रदायानां भवन्ति स्म । अजमेरस्य समीपे एव पुष्करसरोवरः अस्ति, यत्र प्राचीनकालात् एव तीर्थयात्रिणः आगच्छन्ति ।

? स्वस्य जनपदस्य नगराणां सूचीं कुर्वन्तु अपि च तेषां प्रशासनिककेन्द्राणां मन्दिरनगराणां तीर्थकेन्द्राणां च रूपेण वर्गीकरणं कुर्वन्तु ।

लघुनगराणां च संजालम्

अष्टमशताब्द्याः एव उपमहाद्वीपे अनेकेषां लघुनगराणां संजालं विस्तारं गच्छति स्म । संभवतः तेषां प्रादुर्भावः दीर्घ-दीर्घग्रामेभ्यः जातः आसीत् । तेषु सामान्यतया एका मण्डपिका भवति स्म । पश्चात् सा एव मण्डपिका मण्डी इति उच्यते स्म । यत्र समीपस्थाः ग्रामवासिनः स्वस्य उत्पादान् विक्रेतुम् आनयन्ति स्म । तासु एतादृश्यः वीथ्यः आसन् यत्र आपणाः विपण्यः च आसन् ये हट्ट इति उच्यन्ते स्म । एतदतिरिच्य विभिन्नप्रकारकाणां कर्मकराणां तथा च शिल्पिणां यथा कुम्भकाराणां तैलीयानां शक्करनिर्मातृणां ताडी इति निर्मातृणां स्वर्णकाराणां काष्ठकाराणां लौहकाराणां पाषाणकर्मकराणां च पृथक् पृथक् विपण्यः भवन्ति स्म । केचन व्यापारिणः तु स्थायीरूपेण नगरे स्थित्वा स्वकीयं कार्यं कुर्वन्ति स्म, परन्तु केचन अन्ये व्यापारिणः प्रतिनगरं भ्रमित्वा क्रयणं विक्रयणं च कुर्वन्ति स्म । पार्श्वस्थाः दूरस्थाः च व्यापारिणः एतेषु नगरेषु स्थानीयम् उत्पादनं क्रेतुम् अपि च दूरवर्तिनां स्थानानाम् उत्पादनानि यथा घोटकाः, लवणं कर्पूरः केसरः पानं पुगीफलं कृष्णमरीचिका इति एतादृशान् उपस्कारान् विक्रेतुम् आगच्छन्ति स्म ।

चित्रम् – 2

नगरस्य एका विपणिः

सामान्यरूपेण कश्चित् प्रान्ताधिपतिः अर्थात् परवर्तिकालस्य भूस्वामी एतेषु नगरेषु अथवा एतेषां नगराणां नातिदूरे दुर्गस्य आकारसदृशं महालयं रचयति स्म । एतादृशाः प्रान्ताधिपतयः व्यापारिणां शिल्पकाराणां तेषां व्यापारस्य वस्तुषु च करस्य स्थापनं कुर्वन्ति स्म अपि च कदाचित् कदाचित् एतेषां कराणां सङ्ग्रहणस्य "अधिकारं" तेभ्यः स्थानीयमन्दिरेभ्यः यच्छन्ति स्म, येषां निर्माणं स्वयं तैः अथवा धनाढ्यैः व्यापारिभिः कारितं भवति स्म । एतादृशानाम् अभिलेखानाम् उल्लेखः अभिलेखेषु कृतः अस्ति ये अद्य अपि उपलभ्यन्ते ।

चित्र – ३ *काष्ठे विलेखयन् कश्चन काष्ठकारः*

विपणिषु कराधानम्

अयं राजस्थानतः प्राप्तस्य एकस्य दशमशताब्द्याः अभिलेखस्य सारांशः अस्ति । यस्मिन् तानि शुल्कानि दत्तानि सन्ति यानि मन्दिरप्राधिकारिभिः वस्तुरूपेण स्वीकर्तुं शक्यन्ते । शर्करायां गुडे, वर्णे, सूत्रेषु, कार्पासे, नारिकेलेषु, लवणे, पुगीफले, तिलतैले वस्त्रे च करस्य निर्धारणं क्रियते स्म । एतदतिरिच्य व्यापारिषु धातुसम्बद्धवस्तुविक्रेतृणाम् आसवकानां तैले पश्वाहारे अन्नस्य गोणिषु अपि करस्य निर्धारणं भवति स्म ।

एतेषु कानिचन राजस्वानि तु वस्तुरूपेण कानिचन अन्यानि च साक्षात् धनरूपेण स्वीक्रियन्ते स्म ।

? अद्य विपणिषु संस्थापितानां कराणां विषये आधिक्येन ज्ञानं प्राप्नुवन्तु, एतान् कः सङ्गृह्णाति, ते कथं स्वीक्रियन्ते अपि च तेषां प्रयोगः कस्य कार्यस्य कृते भवति ।

महान्तः लघुव्यापारिणः च

व्यापारिणः अनेकधा भवन्ति स्म । तेषु यायावराः (सप्तमे अध्याये पश्यन्तु) अपि सम्मिलिताः आसन् । केचन व्यापारिणः विशेषरूपेण अश्वानां व्यापारिणः स्वस्य सङ्घान् रचयन्ति स्म येषाम् एकः प्रमुखः भवति स्म अपि च सः प्रमुखः तेषां पक्षतः अश्वक्रयणस्य इच्छुकैः योद्धृभिः सह वार्तां करोति स्म । यतोहि व्यापारिभिः अनेकराज्येभ्यः वनप्रदेशेभ्यः च गन्तव्यं भवति स्म । अतः ते सामान्यतया समूहान् कृत्वा यात्रां कुर्वन्ति स्म अपि च स्वस्य हितानां रक्षार्थं व्यापारसङ्घान् रचयन्ति स्म ।

दक्षिण-भारते अष्टमशताब्द्यां परवर्तिकाले च अनेके एतादृशाः सङ्घाः आसन् । तेषु सर्वप्रसिद्धं "मणिग्रामः" "नानादेशी" च आस्ताम् । एते व्यापारसङ्घाः प्रायद्वीपे दक्षिणपूर्वेशियया चीनेन सार्धं च अपि दूरदेशं यावत् अपि व्यापारं कुर्वन्ति स्म । एतदतिरिच्य चेट्टियार-मारवाडी-ओसवालसदृशाः समुदायाः अपि आसन्, ये अग्रे चलित्वा देशस्य प्रधानव्यापारिसमूहाः जाताः । गुर्जरप्रान्तस्य व्यापारिषु हिन्दूवणिजः

मुस्लिमबोहरा इति द्वौ समुदायौ सम्मिलितौ आस्ताम् । ते दूरं दूरं यावत् रक्तसागरस्य पोताशयैः फारसस्य परिखया पूर्व्याफ्रीकया दक्षिणपूर्वेशियया चीनेन सह च व्यापारं कुर्वन्ति स्म । ते एतेषु पत्तनेषु वस्त्राणि उपस्काराणि च विक्रीणन्ति स्म तेषां विनिमये अफ्रीकातः सुवर्णं हस्तिदन्तान् च अपि च दक्षिण-पूर्वेशियातः चीनतः च उपस्कराणि टिन इति मृत्तिकायाः नीलपात्राणि रजतं च आनयन्ति स्म ।

पश्चिमितटीयनगरेषु अरबिजनाः फारसिजनाः, चीनिजनाः, यहूद्दिजनाः, सीरियायी-ईसायी-जनाः च अवसन् । रक्तसागरस्य पोताशयेषु विक्रीतभारतीयोपस्कराणि अपि च वस्त्राणि इतालविव्यपारिभिः क्रीयन्ते स्म ततः च ते तानि वस्तूनि अग्रे यूरोपीयविपणिषु प्रापयन्ति स्म । तेभ्यः व्यापारे महान् लाभः भवति स्म । उष्णकटिबन्धीये जलवायौ उत्पादितोपस्कराणि यूरोपीयव्यञ्जनानां महत्त्वपूर्णानि अङ्गभूतानि आसन् अपि च भारतीयं कार्पासिकं वस्त्रं बह्वाकर्षकं भवति स्म । एतानि वस्तूनि एव यूरोपीयव्यापारिणः भारतं यावत् आकृष्य आनीतवन्ति । कालक्रमेण सार्धं व्यापारस्य नगराणां च रूपं केन प्रकारेण परिवर्तितम्, एतस्मिन् विषये वयं शीघ्रमेव अग्रे पठिष्यामः ।

? यथा भवन्तः अवगन्तुं शक्नुवन्ति, एतस्मिन् कालावधौ जनानां वस्तूनां च गमनागमनं नैरन्तर्येण चलति स्म । भवतां चिन्तनानुसारम् अस्य गमनागमनस्य नगराणां ग्रामाणां च जनजीवनस्य उपरि कः प्रभावः स्यात् ? नगरेषु वसतां कर्मकराणां सूचीं कुर्वन्तु ।

काबुलः

काबुलः स्वस्य पर्वतीयेण विषम-भू-दृश्येन च सह षोडशशताब्द्याः राजनैतिक-वाणिज्यिकदृष्टिभ्यां च महत्त्वपूर्णः अभवत् । काबुलः कन्धारः च सुप्रसिद्धरेशममार्गेण सम्बद्धौ आस्ताम् । सार्धमेव अश्वानां व्यापारः अपि मुख्यरूपेण अनेनैव मार्गेण भवति स्म । सप्तदशशताब्द्यां हीरकाणां कश्चन व्यापारी जौं-बेपटिस्टे-टैवर्नियरः अनुमानं कृतवान् यत् काबुले अश्वानां व्यापारः प्रतिवर्षं 30000 रूप्यकाणां भवति स्म । या च तेषु दिनेषु काचित् महती राशिः मन्यते स्म । काबुलतः शुष्कफलानि खर्जूराणि कुथःआस्तरणानि सद्यःपक्वानि फलानि ऊष्ट्राणां द्वारा उह्यन्ते स्म अपि च उपमहाद्वीपे तथा च अन्यभागेषु विक्रीयन्ते स्म । एतदतिरिच्य क्रीतदासाः अपि विक्रेतुम् आनीयन्ते स्म ।

नगरेषु शिल्पकला

बीदरस्य शिल्पकाराः ताम्रे रजते च अलङ्करणस्य कार्यार्थम् एतावन्तः अधिकाः प्रसिद्धाः आसन् यत् अस्य शिल्पस्य नाम एव "बीदरी" इति अभवत् । पाञ्चालः अर्थात् विश्वकर्मासमुदायः यस्मिन् सुवर्णकाराः कसेरे इति लोहकाराः राजमिस्त्री इति अपि च काष्ठकाराः च सम्मिलिताः आसन्, मन्दिराणां निर्माणाय आवश्यकाः आसन् । एतदतिरिच्य ते राजमहालयानां बृहद्भवनानां जलाशयानां तडागानां च निर्माणकार्ये अपि स्वस्य महत्त्वपूर्णां भूमिकां निर्वहन्ति स्म । अनेन एव प्रकारेण सालियार-कैक्कोलारसदृशाः तन्तुवायाः अपि समृद्धशालिसमुदायाः जाता अपि च ते मन्दिरेभ्यः आधिक्येन दानं दक्षिणां च यच्छन्ति स्म । वस्त्रनिर्माणसम्बद्धानि कानिचन अन्यानि कार्याणि यथा कार्पासस्य स्वच्छीकरणं, कर्तनं रञ्जनम् अपि स्वतन्त्रव्यवसायाः जाता आसन्, येषां कृते विशेषज्ञतायाः आवश्यकता भवति स्म ।

चित्रम् *– 4*

पीतलस्य एतस्मिन्
सिक्थवर्तिकाधाने कृष्णावरणम्
अस्ति ।

चित्रम -5 उर्णवस्त्रस्य प्रान्तभागः

चित्रम् -6

हम्प्यः जलाशयस्य त्रुटितभित्तेः बुर्ज इत्यस्य दृश्यम् ।

नगराणां परिवर्तमानं भाग्यम्

अनेकासु शताब्दीषु अहमदाबादः गुर्जरसदृशानि बृहन्ति नगराणि व्यापारिकेन्द्राणां रूपेण विकसितानि जातानि, परन्तु तंजावूरसदृशानि कानिचन अन्यानि नगराणि पूर्वापेक्षया विस्तारस्य महत्त्वस्य च दृष्ट्या सङ्कुचितानि जातानि । एतस्मिन् काले पश्चिमबङ्गाले भागीरथीनद्याः तटे स्थितः मुर्शिदाबादः कौशेयवस्त्राणां प्रमुखकेन्द्रस्य रूपेण विकसितः जातः । सः 1704 तमे वर्षे बङ्गालस्य राजधानी अभवत् परन्तु एतस्याः शताब्द्याः अवधौ तस्यः भाग्यतारकम् अस्तं गतं, यतोहि तत्रत्याः तन्तुवायाः इङ्गलैण्डवस्त्रोद्योगेभ्यः आगतैः अमहर्घवस्त्रैः सह स्पर्धायां पुरतः स्थातुं न शक्तवन्तः ।

हम्पी, मसूलीपट्टनं सूरतश्च – समीपतः दृष्टिपातः

हम्पी इत्यस्य वास्तुकलायाः सौन्दर्यम्

हम्पीनगरं कृष्णा-तुङ्गभद्रयोः उपत्यकासु स्थितम् अस्ति । इदं नगरं 1336 तमे वर्षे स्थापितस्य विजयनगरसाम्राज्यस्य केन्द्रस्थलम् आसीत् । हम्प्यः उत्तमैः भवनावशेषैः ज्ञायते यत् तस्य नगरस्य दुर्गबन्धनम् उच्चकोट्याः आसीत् । दुर्गस्य भित्तीनां निर्माणे कुत्रापि लेप-श्वेताश्मचूर्णसदृशस्य योजकपदार्थस्य प्रयोगः न कृतः आसीत् शिलाखण्डाः च परस्परं योजयित्वा ग्रथिताः आसन् ।

एकं दुर्गबद्धं नगरम्

एकः पुर्तगाली यात्री डोमिंगो-पेजः षोडशशताब्द्यां हम्पीनगरस्य वर्णनम् अनेन प्रकारेण कृतवान् –

... गोवातः आगन्तारः जनाः यस्मात् प्रवेशद्वारात् आगच्छन्ति तस्य द्वारस्य अन्तः राजा एकम् अन्त्यन्तं सुदृढं प्राचीरबद्धं नगरं रचितवान् अस्ति, यत् भित्तिभिः बुर्ज इत्येतैः च सुरक्षितम् अस्ति । एताः भित्तयः अन्यनगरस्य भित्तिसदृशाः न सन्ति, परन्तु अत्यधिकस्य राजगीरी इत्यस्याः एतादृशम् उदाहरणम् अस्ति, यत् अन्येषु भागेषु विरलतया एव द्रष्टुम् उपलप्स्यते । तस्य अन्तः तया रीत्या निर्मितभवनानाम् अत्यन्तसुन्दरपङ्क्तयः सन्ति येषां छदयः समतलाः प्रथिताः च सन्ति ।

? भवतां विचारेण एतदेव नगरं दुर्गबन्धितं किमर्थम् आसीत् ?

हम्प्यः वास्तुकलाः विशिष्टप्रकारकाः आसन् । अत्रत्येषु राजसीभवनेषु भव्यतोरणानि मन्दिरमुकुटानि च आसन् । तत्र स्तम्भयुक्ताः अनेके विशालकक्षाः आसन्, यस्मिन् प्रतिमानां स्थापनार्थम् आले इति निर्मिताः आसन् । तत्र सुनियोजितानि उद्यानानि पुष्पवाटिकाः च अपि आसन्, येषु कमल-टोडाकृतियुक्ताः मूर्तिकलायाः चित्राणि आसन् । पञ्चदश-षोडश-शताब्द्योः स्वस्य समृद्धिकाले हम्पीनगरम् अनेकाभिः वाणिज्यिकसांस्कृतिकाभिः गतिविधिभिः शब्दायमानः भवति स्म । तेषु दिनेषु हम्पीनगरस्य विपणिषु मूर इत्येतेषां चेट्टि इत्येतेषां पुर्तगालिसदृशानां च यूरोपीयव्यापारिणां तेषां सहयकानां च प्राचुर्येण उपस्थितिः भवति स्म ।

चित्रम् -7

हम्प्यः विट्ठलमन्दिरस्य पाषाणनिर्मितः रथः

मन्दिराणि सांस्कृतिकगतिविधीनां केन्द्राणि भवन्ति स्म अपि च देवदास्यः विरूपाक्षमन्दिरस्य अर्थात् शिवमन्दिरस्य अनेकस्तम्भयुक्तेषु विशालकक्षेषु देवप्रतिमानां राज्ञां तथा च प्रजाजनानां च समक्षे नृत्यं कुर्वन्ति स्म । महानवमीपर्वः यत् अद्यत्वे दक्षिणे नवरात्रपर्व इति उच्यते, तेषु दिनेषु हम्प्याम् एकं महत्त्वपूर्णं पर्वः मन्यते स्म । पुरातत्त्वविदः तं महानवमीमञ्चम् अन्विष्टवन्तः, यत्र राजा स्वस्य अतिथीनां स्वागतं सत्कारं च करोति स्म

अधीनस्थजनेभ्यः च नजराने-उपहारान् स्वीकरोति स्म । तत्रैव उपविश्य राजा नृत्यं सङ्गीतं मल्लयुद्धं च इत्येतादृशान् कार्यक्रमान् अपि पश्यति स्म ।

1565 तमे वर्षे दक्कनीसम्राजां गोलकुंडायाः बीजापुरस्य अहमदनगरस्य बरारस्य बीदरस्य च शासकैः विजयनगरस्य पराजयानन्तरं हम्प्यः विनाशः कृतः ।

वाणिज्यकेन्द्रम्

किञ्चन एतादृशं स्थानं यत्र विभिन्नोत्पादनकेन्द्रेभ्यः आगतवस्तूनि क्रीयन्ते विक्रीयन्ते च ।

सूरतनगरम् इति पश्चिमस्य प्रवेशद्वारम्

सूरतनगरं, मुगलकाले कैंबे (अद्यतनस्य खंबात) इत्यस्य किञ्चित् कालानन्तरं च अहमदाबादेन सार्धं गुर्जरप्रान्ते पश्चिमिव्यापारस्य वाणिज्यकेन्द्रं जातम् । सूरत-ओरमुजस्य आखाततः भूत्वा पश्चिम्येशियया सार्धं व्यापारं कर्तुं मुख्यद्वारम् आसीत् । सूरतं मक्कायाः प्रस्थानद्वारम् अपि उच्यते, यतोहि बहवः हजयात्रिणः जलयानेन इतः एव प्रस्थानं कुर्वन्ति स्म ।

सूरतम् एकं सर्वदेशीयं नगरम् आसीत्, यत्र सर्वेषां धर्माणां जातीनां च जनाः निवसन्ति स्म । सप्तदशशताब्द्यां तत्र पुर्तगालिजनानां डचजनानाम् आङ्गलीयानां च उद्योगगृहाणि वस्तुभाण्डारगृहाणि च आसन् । आङ्गलीयेन इतिहासकारेण ओविंगटनवर्येण 1689 तमे वर्षे सूरतपोताशयस्य वर्णनं कुर्वता लिखितम् अस्ति यत् कस्मिंश्चित् अपि काले एतस्मिन् पोताशये विभिन्नदेशानां सामान्यतः शतं जलयानानि स्थितानि द्रष्टुं शक्यन्ते स्म ।

हुंडी इति

हुंडी कश्चन एतादृशः अभिलेखः यस्मिन् एकेन जनेन निहितराशिः अङ्किता भवति । हुंडीं कुत्रचित् अन्यत्र प्रस्तूय निहितराशिं प्राप्तुं शक्यते ।

सूरते एतादृशाः अनेके आपणाः आसन् ये कार्पासिकवस्त्रं प्रचुरमात्रया अल्पमात्रया च विक्रीणन्ति स्म । सूरतस्य वस्त्राणि स्वस्य द्युतिमताम् उत्तरीयप्रान्तवस्त्राणां कृते प्रसिद्धाः आसन् तथा च तेषां कृते पश्चिमेशियायाम् अफ्रीकायां यूरोपे च आपणाः उपलब्धाः आसन् । राज्यं विश्वस्य सर्वेभ्यः भागेभ्यः नगरं प्रति आगन्तृणां जनानां कृते तेषाम् आवश्यकताः पूरयितुं च अनेकेषां विश्रामगृहाणां निर्माणं कृतवान् आसीत् । तत्र भव्यभवनानि असङ्ख्यकानि मनोरञ्जनस्थालानि च आसन् । सूरते काठियावाडिश्रेष्ठिनां महाजनानां च महान्तः धनव्यवसायसमूहाः आसन् । उल्लेखनीयम् अस्ति यत् सूरतेन निर्मिताः हुंडि इत्येताः दूरदेशं यावत् यथा मिस्रे काहिरायाः विपणिषु इराके बसरायाः विपणिषु बेल्जियमे एंटवर्पस्य विपणिषु च मान्यतां प्राप्तवत्यः आसन् ।

परन्तु, सप्तदशशताब्द्याः अन्तिमेषु वर्षेषु सूरतस्य अपि अधःपतनं प्रारब्धम् । एतस्य बहूनि कारणानि आसन्, मुगलसाम्राज्यस्य पतनस्य कारणतः विपणीनाम् उत्पादकतायाः च हानिः, पुर्तगालिजनैः समुद्रसम्बद्धमार्गेषु

नियन्त्रणं स्थापितम् आसीत् अपि च बम्बयी इत्यनेन प्रतिस्पर्धा आसीत् यत्र 1668 तमे वर्षे आङ्गलीयेन ईस्ट-ईंडिया-समूहेन स्वस्य मुख्यालयः स्थापितः आसीत् । अद्य सूरतं किञ्चन वाणिज्यककेन्द्रम् अस्ति ।

सङ्कटकालः, मसूलीपट्टनमस्य कृते आह्वानम्

मसूलीपट्टनम् अथवा मछलीपट्टनम् इति नगरं कृष्णानद्याः नदीमुखपुलीने स्थितम् अस्ति । सप्तदशशताब्द्याम् इदं विभिन्नानां गतिविधीनां केन्द्रम् आसीत् ।

हालैण्ड-इङ्ग्लैण्डदेशयोः ईस्ट-इण्डिया-समूहाः मसूलीपट्टनं नियन्त्रयितुं प्रयत्नं कृतवन्तः यतोहि तावत्पर्यन्तं तत् आन्ध्रतटस्य महत्तरं पत्तनं जातम् आसीत् । मसूलीपट्टनमस्य दुर्गं हालैण्डवासिनः निर्मितवन्तः आसन् ।

मत्स्यपालकानां कश्चित् विपन्ननगरम्

आङ्गलीयेष्ट-इण्डिया-समूहस्य केनचित् प्रतिनिधिना विलियम-मेथवल्डवर्येण 1620 तमे ख्रिस्ताब्दे एतैः शब्दैः मसूलीपट्टनमस्य वर्णनं कृतं आसीत् ।

इदं गोलकुण्डायाः मुख्यं पत्तनम् अस्ति यत्र परमपूज्यः ईस्ट-इण्डिया-समूहः(कम्पनी) स्वाभिकर्तारं स्थापयति । इदं लघुनगरम् अस्ति, परन्तु सघनरूपेण अवस्थितम् अस्ति चतुर्भित्तिं विना तस्य नगरस्य च निर्माणं अनुचितप्रकारेण जातम् अस्ति । एतत् नगरं शोभने स्थाने न अस्ति । एतस्य नगरस्य सर्वाणि जलस्रोतांसि लावणिकस्य जलस्य सन्ति । पूर्वम् एतत् विपन्नमत्स्यपालकानां नगरम् आसीत् । कालक्रमेण अत्र जलयानानां स्थगनस्य व्यवस्था जाता यतः व्यापारिणः अत्र अवसन् यतोहि अस्माकं तथा च हालैण्डस्य निवासिनः अत्र अस्मिन् तटे गमनागमनं कुर्वन्ति स्म इदं नगरं तेषां कृते निवासस्य व्यवस्थां करोति स्म ।

? आङ्गलीयैः हालैण्डवासिभिः च मसूलीपट्टनमे स्वनिवासस्थापनस्य निर्णयः किमर्थं स्वीकृतः ?

गोलकुण्डायाः कुत्बशाहिनः शासकाः वस्त्राणाम् उपस्कराणाम् अन्यवस्तूनां च विक्रयणे राजसीम् एकाधिकारं योजितवन्तः, यतः तत्रत्यः व्यापारः सर्वथा ईस्ट-इण्डिया-समूहस्य (कम्पनी) अधीनं न गच्छेत् । विभिन्नाः व्यापारि-

प्रतिनिधयः

ईस्ट-इण्डिया-समूहेन नियुक्तव्यापारिणः

समूहानां गोलकुण्डानां च कुलीनवर्गैः फारसिव्यापारिणः तेलगु-जनैः कोमेटी-जनैः चेट्टियर-जनैः य़ूरोपीयव्यापारिभिः नगरं सघनजनसङ्ख्यायुक्तं समृद्धशालि च कृतम्। यदा मुगलैः गोलकुण्डां यावत् स्वशक्तेः विस्तारः कृतः तदा तेषां प्रतिनिधिः प्रान्ताधिपतिः मीरजुमलावर्यः यः स्वयम् एकः व्यापारी आसीत् तेन हालैण्डवासिनः आङ्गलीयाः च परस्परं युद्धं कर्तुं सज्जीकृताः। 1686-87 तमयोः वर्षयोः मुगलसम्राजेन औरंगजेबेन गोलकुण्डा स्वमुगलसाम्राज्ये संमेलितः।

अधुना यूरोपीयसमूहानां पार्श्वे अन्यविकल्पस्य अन्वेषणस्य समस्या आगता। समूहस्य नूतननीत्यन्तर्गतं केवलम् एतावत् एव पर्याप्तं न आसीत् यत् पत्तनेन अन्तर्भूतप्रदेशस्य उत्पादनस्य केन्द्रैः सह सम्बन्धस्य स्थापनं स्यात्। परन्तु एतस्य तथ्यस्य अपि आवश्यकता अनुभूता यत् समूहस्य नूतनानि केन्द्राणि सार्धम् एव राजनैतिकभूमिकायाः प्रशासनिकभूमिकायाः वाणिज्यिकभूमिकायाः च अपि निर्वहणं कुर्युः। यदा समूहस्य व्यापारिणः मुम्बयीनगरं कोलकातानगरं मद्रासं च गतवन्तः, तदा मसूलीपट्टनं स्ववाणिज्यं समृद्धिं च नंष्टवत्। अपि च अष्टादशशताब्द्याः कालावधौ तस्य अधःपतनम् अभवत् अद्य तत् कञ्चित् लघुनगरम् अतिरिच्य किमपि नास्ति।

नूतनानि नगराणि व्यापारिणः च

षोडश-सप्तदश-शताब्द्योः यूरोपीयाः देशाः व्यापारिकोद्देश्यैः उपस्कराणां वस्त्राणां च अन्वेषणे संलग्नाः आसन्, ये यूरोप-पश्चिमेशिययोः द्वयोः स्थानयोः लोकप्रियाः अभवन्। आङ्गलीयाः हालैण्डवासिनः फ्रांसीसिजनाः पौर्वेषु देशेषु स्ववाणिज्यिकगतिविधीनां विस्तारं कर्तुं स्वस्य स्वस्य ईस्ट-इण्डिया-समूहानां स्थापनां कृतवन्तः। प्रारम्भे तु मुल्ला-अब्दुल-गफूर-वीरजीवोरासदृशाः महान्तः भारतीय-व्यपारिणः येषां पार्श्वे बृहत्यां सङ्ख्यायां जलपोताः आसन् तेषां सम्मुखीकरणं कृतवन्तः। किन्तु यूरोपीयसमूहाः सामुद्रिके व्यापारे स्वनियन्त्रणं स्थापयितुं स्वस्य नौशक्तेः प्रयोगं कृतवन्तः अपि च यूरोपीयसमूहेन भारतीयव्यापारिणः स्वाभिकर्तुः रूपेण कार्यं कर्तुं बाध्याः कृताः। अन्ततः आङ्गलीयाः उपमहाद्वीपे सर्वाधिकसफल-वाणिज्यिकरूपेण अपि च राजनैतिकशक्तेः रूपेण विकसिताः जाताः।

वस्त्रसदृशानां वस्तूनाम् अभियाचनायां वृद्धौ सत्याम् अधिकतराः जनाः वयन-कर्तन-धावन-रञ्जनादीनां कार्याणाम् आरम्भं कृतवन्तः। एतेन कार्येण एतेषां शिल्पानां महान् विस्तारः जातः। भारतीयानां वस्त्राणां रूपं वर्णः आकृतिः च आधिक्येन

परिष्कृता जाता किन्तु अस्मिन् काले शिल्पकाराणां स्वतन्त्रतायां न्यूनता जाता । शिल्पिनः प्राग्दत्तमूल्यस्य प्रणाल्यां कार्यं कर्तुम् आरब्धवन्तः, यस्य अर्थः अयम् आसीत् यत् ते यूरोपीयाभिकर्तृभ्यः पूर्वमेव प्राग्दत्तमूल्यं स्वीकृतवन्तः आसन् तेषां कृते एव तैः वस्त्रस्य वयनं करणीयं भवति स्म । अधुना तन्तुवायाः स्ववस्त्रस्य वयनस्य आकृतीः विक्रेतुं स्वतन्त्राः न आसन् । तैः तु समूहस्य प्रतिनिधिभिः निर्धारिताकृत्याः अनुसारम् एव अपि च तेषाम् अभियाचनायाः अनुसारम्, एव वस्त्राणां वयनं करणीयं भवति स्म ।

अष्टादशशताब्द्यां मुम्बयीनगरस्य कोलकातानगरस्य मद्रासनगरस्य च उदयः अभवत्, एतानि अद्यत्वे प्रमुखाणि महानगराणि सन्ति । शिल्पकलायां वाणिज्ये च महान्ति परिवर्तनानि आगतानि । तन्तुवायसदृशाः शिल्पिनः तथा च व्यापारिणः यूरोपीयसमूहैः स्थापितेषु एतेषु "ब्लैक-टाउन्साख्येषु नूतनेषु नगरेषु स्थानान्तरिताः जाताः । ब्लैक इति अर्थात् स्वदेशीव्यापारिणः अपि च शिल्पकाराः एतेषु "ब्लैकटाउन्साख्येषु सीमिताः कृताः, परन्तु श्वेतशासकाः मद्रासे फोर्ट-सेंट-जार्ज इति अपि च कोलकातायां फोर्ट-सेन्ट-विलियम इति द्वयोः भव्यभवनेषु स्वावासान् निर्मितवन्तः । अष्टादशशताब्द्यां शिल्पकलानां वाणिज्यस्य च कथां वयम् अग्रिमे वर्षे पठिष्यामः ।

अष्टमं चित्रम्

प्रारम्भिकेकोनविंशत्यां शताब्द्यां मुम्बयीमहानगरस्य कश्चित् राजमार्गः ।

अन्यत्र

वास्को-डि-गामा क्रिस्टोफर-कोलम्बसः च

चित्रम् – ९, वास्को-डि-गामा

पञ्चदशशताब्द्यां यूरोपीयनाविकैः सामुद्रिकमार्गानाम् अन्वेषणसम्बन्धीनि अभूतपूर्वाणि कार्याणि कृतानि । तेषु अधिकतमाः नाविकाः भारतीयोपमहाद्वीपं प्राप्तुं कश्चित् मार्गः स्यात् इति अन्वेषणस्य उपस्कराणां च प्राप्तिः स्यात् इति इच्छया प्रेरिताः आसन् । पुर्तगालिनाविकः वास्को-डि-गामा अटलान्टिकस्य महासागरस्य यात्रां कुर्वन् केप-आफ-गुड-होपतः निर्गत्य हिन्दमहासागरं च पारं कृत्वा भारतं प्राप्तवान् । सः स्वकीयां प्रथमां यात्रां वर्षस्य कालावधौ समापितवान् । सः 1498 तमे वर्षे कालीकटम् अर्थात् कोलकातामहानगरं प्राप्तवान् ततः अग्रिमे वर्षे सः पुर्तगालस्य राजधानीं लिस्बनं प्रत्यागतवान् । एतस्याः सामुद्रिकयात्रायाः समये तस्य चतुर्षु जलपोतेषु द्वे जलपोते नष्टे जाते अपि च 170 यात्रिषु केवलं 54 यात्रिणः एव जीविताः । एतासां प्रत्यक्षासु आपत्तिषु सतीषु ये मार्गाः अन्विष्टाः उद्घाटिताः वा ते अत्यन्तं लाभप्रदाः जाताः तदनन्तरं तु आङ्गलीयैः हालैण्डवासिभिः फ्रांसीसिभिः अपि तेषाम् अनुसरणं प्रारब्धम् । भारतं प्राप्तुं सामुद्रिकमार्गाणाम् अन्वेषणस्य कश्चित् अन्यः सुपरिणामः अपि आगतः यस्मिन् विषये कस्य अपि आशा न आसीत् । कश्चित् इटलीवासी क्रिस्टोफर-कोलम्बसः भारतं प्रति आगन्तुं मार्गान्वेषणाय अटलांटिकं महासागरं पारं कृत्वा पश्चिमं प्रति यात्रां कर्तुं निश्चितवान् । तस्य चिन्तनम् आसीत् यत् पृथिवी गोलाकारा अस्ति अतः सः पश्चिमतः अपि भारतं प्रति आगन्तुं शक्नोति । सः 1492 तमे वर्षे वेस्टइंडीज इत्यस्य तटं प्राप्तवान् । (बेस्ट-इंडीज इति नाम एतस्याः एव भ्रान्त्याः कारणेन अभवत् । क्रिस्टोफर-कोलम्बसस्य अनन्तरं स्पेनस्य पुर्तगालस्य च नाविकाः विजेतारः अपि अत्र नैरन्तर्येण आगतवन्तः अपि च ते मध्यदक्षिणामेरिकायाः महत्सु भागेषु स्वाधिपत्यं कृतवन्तः प्रायः ते तत्रत्यनिवासान् नंष्टवन्तः ।

कल्पनां कुर्वन्तु

भवन्तः सप्तदशशताब्द्यां सूरतः पश्चिमेशियायाः यात्रां कर्तुं योजनां रचयन्ति । एतस्मिन् विषये भवन्तः कीदृशीं सज्जां करिष्यन्ति ?

पुनः स्मरन्तु

1 रिक्तस्थानानि पूरयन्तु ---

(क) राजराजेश्वरमन्दिरं ------- निर्मितम् आसीत् ।

(ख) अजमेर-सूफी-संतः -------- सम्बद्धः अस्ति ।

(ग) हम्पी ------ साम्राज्यस्य राजधानी आसीत् ।

(घ) हालैण्डवासिनः आन्ध्रप्रदेशे ----- स्वग्रामं निर्मितवन्तः ।

2 ज्ञापयन्तु किं सत्यम् अस्ति किं च असत्यम् अस्ति -

(क) वयं राजराजेश्वरमन्दिरस्य मूर्तिकारस्य(स्थपतेः) नाम केनचित् शिलालेखेन जानीमः ।

(ख) वणिजः समूहेषु यात्राम् अकृत्वा एकाकिनः यात्रां कर्तुम् इच्छन्ति स्म ।

(ग) काबुलः हस्तिवाणिज्यस्य प्रमुखं केन्द्रम् आसीत् ।

(घ) सूरतनगरं बङ्गालस्य आखाते स्थितं कञ्चित् वाणिज्यपत्तनम् आसीत् ।

3 तंजावूरनगराय जलस्य आपूर्तिः कथं क्रियते स्म ?

4 मद्राससदृशेषु महानगरेषु स्थितासु "ब्लैक-टाउन्स इत्याख्यासु कः निवसति स्म ?

आगच्छन्तु अवगच्छामः

5 भवतां विचारेण मन्दिराणां समीपस्थेषु स्थानेषु नगराणि किमर्थं विकसितानि ?

6 मन्दिराणां निर्माणार्थं तेषां संरक्षणार्थं च शिल्पिनः कियन्तः महत्त्वपूर्णाः आसन् ?

बीज-शब्दः

मन्दिरम् ,

नगरम्,

नगरीकरणम्,

विश्वाकर्मा,

वाणिज्यकेन्द्रम्,

ब्लैक-टाउन अर्थात् कृष्णनिवासः ।

7 जनाः दूरस्थेभ्यः प्रदेशेभ्यः सूरतनगरं प्रति किमर्थम् आयान्ति स्म ?

8 कोलकातासदृशेषु नगरेषु शिल्पोत्पादनं तंजावूरसदृशानां नगराणाम् अपेक्षया केन प्रकारेण भिन्नम् आसीत् ?

आगच्छन्तु विचारयामः

9 अस्मिन् अध्याये वर्णितस्य कस्यचित् एकस्य नगरस्य तुलनां भवन्तः स्वपरिचितेन केनापि नगरेण सह अथवा ग्रामेण सह कुर्वन्तु ? किं द्वयोः मध्ये काचित् समानता अथवा किञ्चित् अन्तरम् अस्ति ?

10 व्यापारिभिः कासां कासां समस्यानां सम्मुखीकरणं करणीयं भवति स्म ? भवतां विचारेण किम् अद्य अपि तादृश्यः काश्चन समस्याः विद्यमानाः सन्ति ?

आगच्छन्तु कृत्वा पश्यामः

11 तंजावूरस्य अथवा हम्प्यः वास्तुशिल्पस्य विषये काञ्चित् अधिकां सूचनां प्राप्नुवन्तु अपि च एतेषां नगराणां मन्दिराणां भवनानां च चित्राणां साहाय्येन कस्यचित् स्क्रैपबुक इत्यस्य सज्जीकरणं कुर्वन्तु ।

12 कस्यचित् वर्तमानतीर्थस्थानस्य ज्ञानं कु वन्तु । वदन्तु यत् जनाः तत्र किमर्थं गच्छन्ति, तत्र किं कुर्वन्ति, किं तस्य केन्द्रस्य समीपस्थेषु स्थानेषु आपणाः सन्ति तत्र च किं विक्रीयते क्रीयते च ?

7 जनजातीयाः यायावराः स्थायिरूपेण अध्युषित-समुदायाः च

द्वितीये तृतीये चतुर्थे च अध्याये भवद्भिः दृष्टं यत् केन प्रकारेण राज्यानाम् उत्थानं पतनं च अभवत् । एतस्मिन् ऊहापोहे एव कलानां शिल्पकारिणाम् उत्पादक-गतिविधीनां च नवीनाः जातयः नगरेषु ग्रामेषु विकासं प्राप्नुवत्यः आसन् । एकस्मिन् दीर्घकालिके अन्तराले अनेकानि महत्त्वपूर्णानि राजनैतिकानि सामाजिकानि आर्थिकानि च परिवर्तनानि अभवन् । परन्तु सामाजिकानि परिवर्तनानि सर्वत्र समानानि न आसन् । यतोहि अनेकविधाः समाजाः अनेकविधैः प्रकारैः विकसिताः अभवन् । एवं कथं तथा च किमर्थम् अभवत् एतस्य अवगमनं महत्त्वपूर्णम् अस्ति ।

चित्रम् – 1

जनजातीयं नृत्यम् : संताल-चित्र-खर्रा



अस्य उपमहाद्वीपस्य विशालतमे भागे समाजः वर्णनियमानुसारं पूर्वमेव विभाजितः आसीत् । ब्राह्मणैः परामृष्टाः एते नूतननियमाःविशालतमानां राज्यानां राज्ञैः स्वीकृताः आसन् । एतेन उच्चस्य तथा च नीचस्य, धनिकस्य तथा च निर्धनस्य मध्ये अन्तरालम् अवर्धत । देहल्याः सुल्तानानां तथा च मुगलानां काले श्रेणिबद्धः समाजः अधिकः जटिलः अभवत् ।

महानगरेभ्यः परम् – जनजातीयः समाजः

निस्सन्देहम्, अन्ये समाजाः अपि अस्मिन् समये विद्यमानाः आसन् । उपमहाद्वीपस्य अनेके समाजाः ब्राह्मणैः परामृष्टान् सामाजिकनियमान् कर्मकाण्डान् च न मन्यन्ते स्म तथा च न अपि ते अनेकेषु असमानेषु वर्गेषु विभक्ताः आसन् । प्रायेण एतादृशाः समाजाः जनजातयः कथ्यन्ते ।

प्रत्येकं जनजातेः सदस्याः सजातितायाः बन्धनेन युक्ताः भवन्ति स्म । अनेकाः जनजातयः कृषिकार्येण स्वीयां जीविकां चालयन्ति स्म । केचन अपराणां जनजातीनां जनाः आखेटकाः, सङ्ग्राहकाः अथवा पशुपालकाः च आसन् । प्रायः ते स्वस्य निवासस्थानस्य प्राकृतिकानां संसाधनानां च पूर्णतया उपयोगं कर्तुं एतेषां गतिविधीनां सम्मिश्रितं रूपम् आचरन्ति स्म । काश्चन जातयः

अस्थानिन्यः आसन् एवं च एकस्मात् स्थानात् अपरं स्थानं प्रति भ्रमणं कुर्वन्ति स्म । जनजातीय-समूहाः संयुक्तरूपेण भूम्यां तथा च चरागाहेषु नियन्त्रणं कुर्वन्ति स्म तथा च स्वरचितानां नियमानाम् आधारेण परिवारेषु एतत्सर्वं वण्टयन्ति स्म ।

अस्य उपमहाद्वीपस्य विभिन्नेषु भागेषु बहव्यः विशालाः जनजातयः विकसिताः अभवन् । सामान्यतः एताः जङ्गलेषु पर्वतेषु मरुस्थलेषु तथा च अन्येषु दुर्गमस्थानेषु निवसन्ति स्म । कदाचित् जातिविभाजने आधारिते अधिकशक्तिशालिभिः च समाजैः सह तासाम् आभिमुख्यं भवति स्म । बहुषु विषयेषु एताभिः जनजातिभिः स्वस्य स्वातन्त्र्यं संरक्षितं तथा च स्वस्य भिन्नसंस्कृतेः संरक्षणं कृतम् ।

परन्तु जाति-आधारितः समाजः जनजातिय-समाजः च उभौ अपि स्वस्य विविधकोटीनाम् आवश्यकतानां कृते परस्परम् आश्रितौ अपि आस्ताम् । संघट्टनस्य निर्भरतायाः च अनेन सम्बन्धेन उभयपक्षीयस्य समाजस्य शनैः शनैः परिवर्तनस्य कार्यम् अपि कृतम् ।

?

उपमहाद्वीपस्य भौतिक-मानचित्रं स्वीकृत्य तानि क्षेत्राणि सूचयन्तु यत्र जनजातीयाः जनाः निवासं कुर्वन्तः स्युः।

जनजातीयाः जनाः के आसन् ?

समकालीनैः इतिहासकारैः तथा च पथिकैः जनजातीयानां विषये अतीव न्यूना सूचना प्रदत्ता । काञ्चन अपवादान् त्यजामः चेत् जनजातीयाः जनाः अपि लिखितान् अभिलेखान् न स्थापयन्ति स्म । परन्तु समृद्धानां परम्पराणां वाचिक-मौखिकानां च परम्पराणां च ते संरक्षणं कुर्वन्ति स्म । एताः परम्पराः प्रत्येकम् अपि नवीनां वंशावलीं पैतृकधनरूपेण प्राप्ताः आसन् । अद्यतनाः इतिहासकाराः जनजातीयानाम् इतिहासं लेखितुम् एतासां वाचिकपरम्पराणाम् उपयोगम् आरभन्त ।

जनजातीयजनाः भारतस्य प्रायेण प्रत्येकम् अपि क्षेत्रे प्राप्यन्ते । कस्याः अपि एकस्याः जनजात्याः क्षेत्रं प्रभावः च यथासमयं परिवर्तितः भवति स्म । कासाञ्चन शक्तिशालीनां जनजातीनां बृहत्सु क्षेत्रेषु नियन्त्रणम् आसीत् । पञ्जाबे खोखर-जनजातिः त्रयोदशे चतुर्दशे च शताब्दे अतीव प्रभावशालिनी आसीत् । अत्र अनन्तरं गक्खरजनाः बहुमहत्त्वपूर्णाः अभवन् । तेषां प्रमुखं कमालखान-गक्खरं बादशाहः अकबरः पदवीधारिणम् अकरोत् । मुल्ताने तथा च सिन्धे मुगलैः स्वाधीनकरणात् प्राक् लङ्गाहजनानां तथा च अरघुनजनानां प्रभुत्वम् अत्यन्तं विस्तृते क्षेत्रे आसीत् । उत्तर-पश्चिमे एकतः विशालशक्तिशाली जनजातिः आसीत् - बलोच इति । एते जनाः पृथक्-पृथक्-प्रमुखाणाम् अनेकेषु लघुषु कुलेषु वण्टिताः आसन् । पश्चिमीहिमालये मेषपालकानां जनजातिः निवसति स्म । उपमहाद्वीपस्य सुदूरम् उत्तर-पूर्वीभागे एव नागानाम् अहोमानां तथा च अनेकेषां बहूनां जनजातीनां पूर्णतया प्रभुत्वम् आसीत् ।



मानचित्रम् -1

प्रमुख-भारतीय-जनजातीनां क्षेत्रम्

विद्यमानस्य बिहारस्य झारखण्डस्य च अनेकेषु क्षेत्रेषु द्वादशं शताब्दं यावत् चेराणां सरदारशाहिजनानां च उदयः जातः आसीत् । सम्राजः अकबरस्य प्रसिद्धः सेनापतिः राजा मानसिंहः 1591 तमे वर्षे तेरजनेषु आक्रमणम् अकरोत् अपि च तान् परास्तम् अकरोत् । तान् लुण्ठयित्वा उत्तमतया अधिकानि वस्तूनि अपाहृत्य सङ्गृहीतवान् । परन्तु तेषाम् स्वाधीनकरणं पूर्णतया न अभवत् । औरङ्गजेबस्य कार्यकाले मुगलसेनाः चेरजनानां बहूनां दुर्गाणाम् अधिग्रहणम् अकुर्वन् तथा च एतां जनजातिं स्वाधीनम् अकरोत् । अस्मिन् क्षेत्रे निवत्स्यमानेषु महत्त्वपूर्णासु जनजातिषु मुण्डाजनजातिः तथा च सन्तालाः आसन् । यद्यपि एते उडीसायां तथा च बङ्गाले अपि निवसन्ति स्म ।

कुलम्

कुटुम्बानाम् अथवा गृहाणां किञ्चन तादृशः समूहः कुलम् उच्यते । ये एकस्य एव पूर्वजस्य सन्ततयः आसन् इति अधिकारं प्रकटयन्ति । जनजातीय-सङ्घटनानि प्रायः सगोत्रतायाम् अथवा कुलसम्बद्धायां निष्ठायाम् आधारिताः भवन्ति ।



चित्रम् 2: रात्रौ भीलजनाः हिरणस्य आखेटं कुर्वन्ति ।



कर्णाटकस्य तथा च महाराष्ट्रस्य पर्वताः – कोली-बेरादजनजात्योः अन्यासां च जनजातीनां निवासस्थानानि आसन् । कोलीजनाः गुजरातस्य अन्येषु क्षेत्रेषु अपि निवसन्ति स्म । केचन च दक्षिणे कोरागा-वेतर-मारवाराणाम् अन्यजनजातीनां च विशाला जनसङ्ख्या आसीत् ।

भीलानां बृहती जनजातिः पश्चिमभारते मध्यभारते च प्रसृता आसीत् । षोडशशताब्दस्य समाप्तिकालः यथा आगतः तथा तेषु बहुषु स्थानेषु एकत्र वासं कुर्वन्तः जनाः कृषकाः तथा च भूस्वामिनः जाताः आसन् । तदा अपि भीलानाम् अनेकानि कुलानि आखेट-सङ्ग्राहकाः एव अतिष्ठन् । विद्यमाने छत्तीसगढे मध्यप्रदेशे महाराष्ट्रे आन्ध्रप्रदेशे च गोण्डजनाः अधिकसङ्ख्यायां विस्तीर्णाः आसन् ।

अस्थानिनः तथा च भ्रमणशीलाः जनाः कथं निवसन्ति स्म-

अस्थानिनः चरवाहजनाः च स्वीयैः जन्तुभिः सह सुदूरं यावत् भ्रमन्ति स्म । तेषां जीवनं दुग्धेषु तथा च अन्येषु पशुचारिषु उत्पादेषु निर्भरम् आसीत् । ते कृषकैः गृहस्थैः च सह अन्नस्य वस्त्रस्य पात्राणाम् अपि च एतादृशाणां वस्तूनां कृते ऊर्णस्य घृतस्य च विनिमयम् अपि कुर्वन्ति स्म । केचन अस्थानिनः स्वकीयेषु जन्तुषु वस्तूनां नयनस्य कार्यम् अपि कुर्वन्ति स्म । एकस्मात् स्थानात् अपरं स्थानं गच्छन् वस्तूनां क्रयणं विक्रयणं कुर्वन्ति स्म ।

चित्रम् – 3

भ्रमणशीलानां व्यापारिणां शृङ्खलाः भारतं बाह्यसंसारेण योजयन्ति स्म । अत्र शुष्कफलानि एकत्रीकृत्य उष्ट्रेषु स्थापनं क्रियमाणं वर्तते । मध्य-एशियायाः व्यापारिणः ईदृशानि वस्तूनि भारतं प्रति आनयन्ति स्म । तथा च व्यवसायिनः एवं च अन्ये व्यापारिणः तान् स्थानीय-विपणिं पर्यन्तं प्रापयन्ति स्म ।

व्यवसायिजनाः सर्वाधिकाः महत्त्वपूर्णाः व्यापारि-अस्थानिनः आसन् । तेषां जीवनशैली 'टाण्डा' इति कथ्यते स्म । सुलतान-अलाउद्दीन-खलजी (अध्यायः 3) व्यवसायिजनानाम् उपयोगं नगरस्य विपणिः यावत् अन्नस्य भारवहनाय कुर्वन्ति स्म । बादशाहः जहाँगीरः स्वस्य संस्मरणेषु अलिखत् यत् व्यवसायिजनाः विभिन्नेभ्यः क्षेत्रेभ्यः स्वस्य वृषभस्य उपरि अन्नं नीत्वा नगरेषु विक्रयणं कुर्वन्ति स्म । सैन्य-अभियानानां काले ते मुगलसेनायाः कृते खाद्यान्नानां वहनस्य कार्यं कुर्वन्ति स्म । कस्यापि विशालसैन्यस्य कृते 1,00,000 वृषभाः अन्नस्य वहनं कुर्वन्तः स्युः।

व्यवसायिनः

सप्तदशशताब्दस्य आरम्भे भारतम् आगतवता एकेन आङ्ग्लव्यापारिणा पीटर-मण्डी-नामकेन व्यवसायिनां वर्णनं कृतं वर्तते :

प्रातः अस्माकं मेलनं व्यवसायिनां केनचित् टाण्ड्या अभवत्, यस्यां 14,000 वृषभाः आसन् । ....एते व्यवसायिजनाः स्वस्य सम्पूर्णं गृहं -- पत्नी-पुत्रान् च सह एव नीत्वा चलन्ति । एकस्यां टाण्डायां बहवः कुटुम्बाः भवन्ति । तेषां जीवनस्य शैली तैः भारवाहकैः सह मिलति स्म ये निरन्तरम् एकस्मात् स्थानात् अपरं स्थानं प्रति गमनं कुर्वन्ति । धेनवः वृषभाः तेषां स्वकीयाः भवन्ति स्म । बहुधा ते व्यापारिभिः भाटकत्वेन नियुक्ताः क्रियन्ते । परन्तु बहुशः स्वयं व्यापारिणः भवन्ति । अन्नं यत्र अल्पमूल्येन प्राप्यते, ततः ते क्रीणन्ति तथा च तत्र नयन्ति यत्र एतत् अधिकमूल्येन प्राप्यते । ततः ते एतादृशं वस्तु स्वीकुर्वन्ति यत् कुत्रचित् अन्यत्र लाभरूपेण विक्रेतुं शक्येत । ..... टाण्डायां षड्शततः सप्तशतं यावत् जनाः भवितुं शक्नुवन्ति । ....ते दिने 6 तः 7 मीलपरिमितात् अधिकं दूरं न चलन्ति स्म । एतावत् यत् शीतकाले अपि न । स्वस्य धेनोः वृषभात् वा वस्तूनि अवतारणस्य अनन्तरं तान् ते मुक्तरूपेण चरणाय त्यजन्ति । यतोहि अत्र भूमिः पर्याप्ता वर्तते अपि च तेषाम् अवरोधकः कश्चन अपि न वर्तते ।

? ज्ञानं कुर्वन्तु यत् अद्यत्वे ग्रामात् नगराणि यावत् अन्नस्य नयनस्य कार्यं कथं भवति । व्यवसायिनां कार्यशैल्या एतत् केन प्रकारेण भिन्नः अथवा समानः आस्ति ?

अस्थानिनः तथा च भ्रमणशीलः समूहः

अस्थानिनः भ्रमणशीलाः भवन्ति । तेषु केचन पशुचारिणः भवन्ति ये स्वस्य अजमेषसमूहेन पशुवृन्देन च सह द्वितीये चरागाहे भ्रमणं कुर्वन्ति । एवम् एव व्यापारिणः भाण्डवाहाः नर्तक-गायकाः एवं च अन्ये मनोरञ्जकदर्शकाः भ्रमणशीलसमूहाः स्वस्य कार्यं कुर्वन्तः एकस्मात् स्थानात् अन्यस्थानस्य यात्रायां भवन्ति । अस्थानिनः तथा च भ्रमणशीलसमूहः द्वौ अपि प्रायः तत्र प्रत्यागमनं कुर्वन्ति । यत्र तैः गतवर्षे अपि भ्रमणं कृतम् आसीत् ।

चित्रम् – 4

कांस्यनिर्मिता मकरकुटी कोण्ड-जनजातिः, उडीसा

बहवः पशुचारिण्यः जनजातयः पशून् अश्वान् च सदृशान् जन्तून् पालयन्ति तथा च सम्पन्नजनानां हस्ते तान् विक्रीणन्ति स्म । सामान्यतराणां व्यापारिणां विभिन्नजातयः अपि एकस्मात् ग्रामात् अन्यं ग्रामं प्रति भ्रमणं कुर्वन्ति स्म । एते जनाः रज्जुं, शरकाण्डस्य वस्तूनि, पलालस्य कटान्, स्थूलस्यूतान् निर्मान्ति विक्रयणं च कुर्वन्ति । यदाकदाचित् भिक्षुकाः अपि भ्रमणशीलानां वाणिज्यं कुर्वन्ति स्म । नर्तकानां गायकानाम् अन्यदर्शकाणां च अपि जातयः आसन् याः विभिन्नेषु नगरेषु ग्रामेषु अर्जनाय स्वस्य कलानां प्रदर्शनं कुर्वन्ति स्म ।

परिवर्तमानः समाजः – नूतनजातयः एवं च श्रेण्यः

यथा यथा अर्थव्यवस्था समाजस्य आवश्यकताः च वर्धमानाः अभवन्, नूतनकौशलवतां जनानाम् आवश्यकता अभवत् । वर्णानाम् अन्तः लघ्वीनां जातीनां प्राकट्यम् अपि अभवत् । उदाहरणार्थं ब्राह्मणानां मध्ये नवीनाः जातयः प्रकटिताः अभवन् । अपरस्मिन् पक्षे अनेकेषां जनजातीनां सामाजिकसमूहानां च जातिविभाजिते समाजे सम्मेलनं कृतम् । अपि च तेषां जातीनां स्थानं निर्धारितम् । विशेषज्ञता-प्राप्तशिल्पिनः सुवर्णकारं, लोहकारं, तक्षकान् राजतक्षकान् अपि ब्राह्मणैः जातीनां रूपेण मान्यता प्रदत्ता । वर्णानाम् अपेक्षया जातिः समाजस्य सङ्गठनस्य आधाररूपा अभवत् ।

जात्यां विचार-विमर्शः

वर्तमान-तमिल्नाडोः तिरूचिरापल्ली-सम्बन्धे स्थितस्य उईयाकोण्डन-उदेयारस्य द्वादशशताब्दस्य अभिलेखे ब्राह्मणानाम् एकस्याः सभायाः (द्वितीये अध्याये) विचारविमर्शं कुर्वन्तः आसन् । तैः तेषां जातीनां कार्याणि निर्धारितानि येषु वास्तुकला, रथनिर्माणं याननिर्माणम्, मन्दिरनिर्माणम्, मूर्तिस्थापनम्, बलिनिमित्तं काष्ठनिर्मितानां वस्तूनां सज्जीकरणम्, मण्डपनिर्माणं तथा च राज्ञः कृते आभूषणनिर्माणम् इत्यादयः सम्मिलिताः आसन् ।

एकादशशताब्दं तथा च द्वादशशताब्दं प्रति आगच्छन् क्षत्रियाणां मध्ये नूतनानां राजपूतगोत्राणां शक्तौ अधिका वृद्धिः अभवत् । ते हूण-चन्देल-चालुक्येभ्यः तथा च केचन अन्याभ्यः वंशपरम्पराभ्यः आयान्ति स्म । एतेषु केचन प्रथमजनजातिषु आयान्ति स्म तथा च अनन्तरकाले केचन आहत्य राजपूताः इति एव मताः अभवन् । शनैः शनैः तैः पुरातनशासकानां स्थानं स्वीकृतम् । विशेषतः कृषिक्षेत्रेषु । अत्र बहुविधानि परिवर्तनानि

जायमानानि आसन् तथा च शासकैः शक्तिशालिराज्यानां निर्माणे स्वस्य सम्पदायाः उपयोगः कृतः।

शासकरूपेण राजपूतगोत्राणाम् उदयस्य उदाहरणस्य जनजातीयजनाः अनुसरणम् अकुर्वन्। मन्दं मन्दं ब्राह्मणानां समर्थनात् अनेकाः जनजातयः, जातिव्यवस्थायाः भागाः अभवन्। परन्तु केवलं प्रमुखाः जनजातीय-कुटुम्बाः एव शासकवर्गे सम्मेलितुं शक्तवन्तः । तेषां बहुसङ्ख्यका जनसङ्ख्या, समाजस्य लघुषु जातिषु एव स्थानं निर्मातुं शक्तवान्। अपरस्मिन् पक्षे पञ्चनदस्य सिन्धस्य तथा च उत्तर-पश्चिम-सीमायाः प्रभुत्वशालिन्यः जनजातयः बहुपूर्वम् इस्लामं स्वीकृतवत्यः आसन्। ते जातिव्यवस्थां निषेधयन्तः आसन्। सनातनी-हिन्दुधर्मेण प्रस्ताविता विरोधि-असमाना सामाजिकीव्यवस्था एतेषु क्षेत्रेषु उचितमानदण्डे न स्वीकृता।

राज्यानाम् उत्पत्तिः, जनजातीयजनानां मध्ये जातेन सामाजिक-परिवर्तनेन गभीरतया च सम्बद्धा वर्तते। अस्माकम् इतिहासस्य अस्य महत्त्वपूर्णस्य भागस्य उदाहरणद्वयम् अधोलिखितं वर्तते।

चित्रम् 5
गोण्डमहिला

स्थानान्तरीया कृषिः

कस्यचित् वनप्रान्तस्य वृक्षाणां स्तम्बकानां च कर्तनं कृत्वा ज्वालनं क्रियते। तेषां भस्मनि एव सस्यस्य वपनं क्रियते। यदा इयं भूमिः स्वीयाम् उर्वरां नाशयति, तदा भूमेः द्वितीयः खण्डः स्वच्छः क्रियते तथा च एवं प्रकारेण सस्यस्य उत्पादनं क्रियते।

समीपतः एका दृष्टिः

गोण्डजनजातिः

गोण्डजनाः गोण्डवाना-नामक-विशाले वनप्रदेशे निवसन्ति स्म । ते स्थानान्तरीयां कृषिम् अर्थात् स्थानस्य वारं वारं परिवर्तनं कृत्वा कृषिं कुर्वन्ति स्म। विशाला गोण्डजनजातिः अनेकेषु लघुषु कुलेषु अपि विभक्ता आसीत्। प्रत्येकं कुलस्य स्वस्य राजा अथवा रायः भवति स्म। यस्मिन् समये देहल्याः सुलतानानां शक्तिः क्षीयमाणा आसीत्, तस्मिन्नेव समये कानिचन विशालानि गोण्डराज्यानि गोण्डसरदारेषु प्रबलानि जायमानानि आसन्। अकबरस्य शासनकालस्य एकः इतिहासः अकबरनामायाम् उल्लिखितः वर्तते यत् गढ-कटङ्गाया- गोण्डराज्ये 70,000 ग्रामाः आसन्।

एतेषां राज्यानां प्रशासनिकी व्यवस्था केन्द्रीकृता जायमाना आसीत्। राज्यानि गढेषु विभक्तानि जायमानानि आसन्। प्रत्येकम् अपि गढं कस्यचित् विशेषकुलस्य नियन्त्रणे आसीत्। एते पुनः चतुरशीत्याः ग्रामाणाम् एककेषु विभक्ताः भवन्ति स्म, एते चतुरशीतिः इति कथ्यन्ते स्म। चतुर्शीतिग्रामाणाम् उपविभाजनं बरहोतेषु भवति स्म। ये द्वादशग्रामान् मेलयित्वा निर्मीयन्ते स्म।

बृहद्-राज्यानाम् उदयः गोण्डसमाजस्य चरित्रं पर्यावर्तयत् । तेषां मूलतः समानसमाजः शनैः शनैः असमानेषु सामाजिकेषु वर्गेषु विभाजितः अभवत् । ब्राह्मणाः गोण्डराजभ्यः अनुदानरूपेण भूमिं प्राप्नुवन् तथा च अधिकाः शक्तिशालिनः अभवन् । गोण्डसरदाराणाम् इच्छा अधुना राजपूतरूपेण मान्यताप्राप्तेः अभवत् । एतदर्थं गढकटङ्गायाः गोण्डराज्ञा अमनदासेन सङ्ग्रामशाहस्य उपाधिः धारितः । तस्य पुत्रेण दलपतेन महोबायाः चन्देल-राजपूत-राज्ञः सालबाहनस्य पुत्र्या राजकुमार्या दुर्गावत्या सह विवाहः कृतः ।

मानचित्रम् – 2

गोण्डवाना

दलपतस्य मृत्युः अल्पे वयसि एव अभवत् । रानी दुर्गावती अतीव योग्या आसीत् । तथा च सा स्वस्य पञ्चवर्षीयस्य पुत्रस्य वीरनारायणस्य नाम्नि शासनस्य दायित्वं स्वीकृतम् । तस्य कार्यकाले राज्यस्य अधिकः विस्तारः अभवत् । 1565 मध्ये आसिफखानस्य नेतृत्वे मुगलसेन्यैः गढकटङ्गायाः उपरि आक्रमणं कृतम् । रानी दुर्गावती एतस्य दृढतया समक्षीकरणं
कृतवती । तस्याः पराजयः अभवत् । अपि च सा समर्पणस्य अपेक्षया मरणम् एव वरम् इति अचिन्तयत् । तस्याः पुत्रः अपि तत्क्षणम् एव युद्धं कुर्वन् मरणं प्राप्नोत् ।

चित्रम् – 6

एकं नक्काशीदार-द्वारम्, गोण्डजनजातिः, बस्तरक्षेत्रम्, मध्यप्रदेशः

गढकटङ्गा किञ्चन समृद्धं राज्यम् आसीत् । अनेन गजानां ग्रहणस्य तथा च अन्यराज्येषु तेषां निर्यातकरणस्य वाणिज्ये बहुधनम् अर्जितम् । यदा मुगलाः गोण्डान् पराजितवन्तः तदा ते बहुमूल्यानि नाणकानि तथा च गजान् अधिकमात्रायाम् अपहृतवन्तः । ते राज्यस्य एकं भागं स्वाधीनम् अकुर्वन् तथा च अवशिष्टं भागं बीरनारायणस्य पितृव्यं चन्दरशाहं दत्तवन्तः । गढकटङ्गायाः पतनम् अभवत् तदा अपि गोण्डराज्यं किञ्चित् कालं यावत् प्रचलत् आसीत् । परन्तु ते अतीव क्षीणाः जाताः आसन् । तथा च अनन्तरकाले अधिकशक्तिशालीनां बुन्देलानां तथा च मराठानां विरुद्धं तेषां सङ्घर्षाः असफलाः जाताः ।

?

चर्चयन्तु

मुगलाः गोण्डप्रदेशे अधिग्रहणं किमर्थं कर्तुम् इच्छन्ति स्म ?

अहोमः

अहोमजनाः म्यान्मारात् आगत्य त्रयोदश्यां शताब्द्यां ब्रह्मपुत्र-उपत्यकायाम् आगत्य वासम् कृतवन्तः । ते भूस्वामिजनानां पुरातन-राजनीतिक-व्यवस्थायाः दमनं कृत्वा नूतनराज्यस्य स्थापनां कृतवन्तः । षोडशशताब्दस्य काले तैः चुटीनां (1523) तथा च कोच-हाजोजनानां (1581) राज्यानि स्वस्य राज्ये मेलितानि । ते बह्वीः अन्याः जनजातीः अपि स्वाधीनं कृतवन्तः । अहोमाः अपि एकस्य विशालस्य राज्यस्य निर्माणम् अकुर्वन् तथा च एतदर्थं 1530 तमस्य दशके एव एतावन्ति वर्षाणि पूर्वम् आग्नेय-अस्त्राणाम् उपयोगम् अकुर्वन् । 1660 पर्यन्तं तु ते उच्चस्तरीय-विस्फोटचूर्णस्य तथा च अग्न्यस्त्राणां निर्माणकरणे सक्षमाः अभवन् ।

परन्तु अहोमजनैः दक्षिण-पश्चिमात् बहूनाम् आक्रमणानां सम्मुखीकरणं करणीयम् अभवत् । 1662 तमे वर्षे मीर-जुमलायाः नेतृत्वे मुगलाः अहोमराज्ये आक्रमणम् अकुर्वन् । शूरतापूर्वकं सम्मुखीकरणं कृत्वा अपि अहोमजनाः पराजयं प्राप्नुवन् । परन्तु तस्मिन् क्षेत्रे मुगलानां प्रत्यक्षनियन्त्रणम् अधिकं कालं यावत् स्थातुं न अशक्नोत् ।

मानचित्रम् 3

पूर्वीभारतस्य जनजातयः

अहोमराज्यं भूम्यधिपतिषु आश्रितम् आसीत् । राज्याय येभ्यः जनेभ्यः बलात् कार्यं स्वीक्रियते स्म, ते 'पाइक' कथ्यन्ते स्म । अहोमराज्ये एका जनगणना कृता आसीत् । प्रत्येकम् अपि ग्रामं स्वक्रमस्य आगमनपर्यन्तं निश्चितसङ्ख्यायां 'पाइक' इति प्रेषणीयाः भवन्ति स्म । एतदर्थं जनगणनायाः अनन्तरं

चित्रम् 7

कर्णाभरणम्, कबोईनागाजनजातिः मणिपुरम्

?

भवतां विचारानुसारं मुगलाः अहोमप्रदेशं जेतुं किमर्थं प्रयत्नवन्तः ?

सघन-जनसङ्ख्यात्मकेषु क्षेत्रेषु जनानां स्थानान्तरणं कृतम् आसीत् । अनेन प्रकारेण अहोमकुलानि नष्टानि अभवन् । सप्तदशशताब्दस्य पूर्वार्धस्य पूर्णतां यावत् प्रशासनम् उत्तमरीत्या केन्द्रीभूतं जातम् आसीत् ।

प्रायेण सर्वे वयस्कपुरुषाः युद्धकाले सेनायां स्वीयां सेवां प्रयच्छन्ति स्म । द्वितीयेषु कालेषु ते बन्धनिर्माणे सेचन-व्यवस्थादीनां निर्माणे अथवा अन्येषु सार्वजनिकेषु कार्येषु संलग्नाः भवन्ति स्म । अहोमजनाः तण्डुलानां कृषिनिमित्तं नूतनानाम् उपायानाम् अपि प्रयोगम् अकुर्वन् ।

अहोमसमाजः कुलेषु विभाजितः आसीत् । यः 'खेल' इति कथ्यते स्म । तत्र शिल्पकारिणां न्यूनतमाः जातयः आसन् । एतदर्थम् अहोमक्षेत्रे शिल्पकाराः निकटवर्तिभ्यः क्षेत्रेभ्यः आगताः आसन् । एकस्य खेलस्य नियन्त्रणे प्रायेण बहवः ग्रामाः भवन्ति स्म । कृषकान् स्वस्य ग्रामसमुदायेन भूमिः प्रदीयते स्म । समुदायस्य सहमतिं विना राजा अपि एतां प्रति न स्वीकर्तुं शक्नोति स्म ।

आरम्भे अहोमजनाः, स्वस्य जनजातीयानां देवतानाम् उपासनां कुर्वन्ति स्म । परन्तु सप्तदशशताब्दस्य पूर्वार्द्धे ब्राह्मणानां प्रभावे वृद्धिः अभवत् । मन्दिराणां कृते ब्राह्मणानां कृते च राज्ञा भूमिः अनुदानरूपेण प्रदत्ता । शिवसिंहस्य (1714-44) काले हिन्दूधर्मः तत्रत्यः प्रधानधर्मः जातः। परन्तु अहोमराजानः हिन्दूधर्मस्य आत्मसात्करणात् पश्चात् स्वस्य पारम्परिकाः आस्थाः पूर्णतया न अत्यजन् ।

अहोमसमाजः कश्चन अत्यन्तं परिष्कृतः समाजः आसीत् । कवीन् तथा च विदुषः अनुदानरूपेण भूमिः प्रदीयते स्म । नाट्य-कर्मणः कृते प्रोत्साहनं प्रदीयते स्म । संस्कृतस्य महत्त्वपूर्णानां कृतीनाम् अनुवादः कृतः आसीत् । बुरञ्जीनामिकाः ऐतिहासिकीनां कृतीनां लेखनं पूर्वम् अहोमभाषया पश्चात् च असमभाषया कृतम् आसीत् ।

निष्कर्षः

यस्य युगस्य चर्चा अस्माभिः क्रियते, तस्य युगस्य काले उपमहाद्वीपे महत् सामाजिकं परिवर्तनम् अभवत् । वर्णाधारितः समाजः जनजातीय-जनाः परस्परं निरन्तरं सम्पर्के आगच्छन्तः आसन् ।

अनेन आदानेन प्रदानेन उभयविधे समाजे अनुकूलनस्य परिवर्तनस्य च प्रक्रिया चालिता । अनेकाः विविधप्रकारिकाः जनजातयः आसन्, तथा च तैः विभिन्नप्रकारिकाः जीविकाः अङ्गीकृताः । कालान्तरे तेषु बह्व्यः जात्याधारिते समाजे सम्मिलिताः अभवन् । परन्तु कैश्चित् जातिव्यवस्था सनातनी-हिन्दू-धर्मः च द्वयोः अपि अङ्गीकरणं न कृतम् । कैश्चित् जनजातिभिः सुसङ्गठित-प्रशासनिक-व्यवस्थापकानां विस्तृतराज्यानां स्थापना कृता । एवं प्रकारेण ते राजनैतिकरूपेण शक्तिशालिनः अभवन् । अनेन तेषां बृहत्तरैः अधिकजटिलैः साम्राज्यैः च सह सङ्घर्षस्य स्थितौ आनीय स्थिरीकरणं कृतम् ।

अन्यत्र

मङ्गोलः

स्वस्य मानचित्रे मङ्गोलियाम् अन्वेषयन्तु । इतिहासे सर्वाधिकं प्रसिद्धं पशुचारिणी तथा च आखेटसङ्ग्राहिका जनजातिः मुगलानाम् आसीत् । ते मध्य-एशियायाः घासक्षेत्रेषु तथा च किञ्चित् उत्तरभागं प्रति वनप्रान्तेषु निवत्स्यमानाः आसन् । 1206 तमे वर्षे चङ्गेज-खानः मङ्गोलेषु तथा च तुर्की-जनजातिषु ऐक्यम् उत्पाद्य तान् एकस्मिन् शक्तिशालिनि सैन्यबले पर्यवर्तयत् । स्वस्य मृत्योः पश्चात् (1227) सः एकस्य सुविस्तृतप्रदेशस्य शासकः आसीत् । तस्य उत्तराधिकारिणः एकस्य विशालस्य साम्राज्यस्य स्थिरीकरणम् अकुर्वन् । काले काले अस्मिन् रूसस्य, पूर्वीयूरोपस्य, चीनस्य तथा च मध्य-पूर्वस्य बृहद्-भागः सम्मिलितः आसीत् । मङ्गोलानां पार्श्वे सुसङ्गठितं सैन्यं तथा च प्रशासनिक्यः व्यवस्थाः आसन् । एताः विभिन्नजातीयेषु एवं च धार्मिक-समूहानां समर्थने आधारिताः आसन् ।

कल्पनांकुर्व

भवन्तः कस्यचित् एतादृशस्य अस्थानिनः समुदायस्य सदस्याः सन्ति, यः प्रत्येकं मासत्रयानन्तरं निवासस्थानं परिवर्तयति । अस्य भवतां जीवनस्य उपरि कः प्रभावः भविष्यति ?

पुनः स्मरन्तु

1. *निम्नलिखितानां मेलनं कुर्वन्तु-*

गढः	*खेलः*
टाण्डा	*चतुरशीतिः*

श्रमिकः	*जीवनशैली*
कुलम्	*गढ-कटङ्गा*
शिव-सिंहः	*आहोम-राज्यम्*
दुर्गावती	*पाइकः*

बीजशब्दः

वर्णः

जातिः

टाण्डा

गढम्

चतुराशीतिः

बरहोतः

भुईयाँ

पाइकः

खेलः

बुरञ्जी

जनगणना

2. *रिक्तस्थानानां पूर्तिं कुर्वन्तु –*
   - *(क) वर्णानाम् अन्तः उत्पद्यमानाः नवीनाः जातयः---------कथ्यन्ते स्म ।*
   - *(ख) ----------अहोमजनैः लिखिताः ऐतिहासिक्यः कृतयः आसन् ।*
   - *(ग) ---अस्य विषयस्य उल्लेखः कृतः यत् गढ-कटङ्गायां 70,000 ग्रामाः आसन् ।*
   - *(घ) विशालाः तथा च शक्तिशालिनः भूते सति जनजातीयैः राज्यैः --------च----------भूमि-अनुदानानि प्रदत्तानि ।*
3. *सम्यक् असम्यक् वा इति सूचयन्तु---*
   - *(क) जनजातीयानां समाजानां समीपं समृद्ध-वाचकपरम्पराः आसन् ।*
   - *(ख) उपमहाद्वीपस्य उत्तर-पश्चिमभागे कश्चन जनजातीयः समुदायः न आसीत् ।*
   - *(ग) गोण्डराज्येषु अनेकेषां नगराणां निर्माणं कृत्वा चतुरशीतिः भवति स्म ।*
   - *(घ) भीलस्य उपमहाद्वीपस्य उत्तर-पूर्वीभागे निवसन्ति स्म ।*
4. *अस्थानिनां पशुचारकाणाम् एकस्मिन् स्थाने वासं कुर्वतां कृषकाणां च मध्ये कीदृशः विनिमयः भवति स्म ?*

आगच्छन्तु अवगच्छामः

5. *अहोम-राज्यस्य प्रशासनं कथं सङ्घटितम् आसीत् ?*
6. *वर्ण-आधारिते समाजे कानि परिवर्तनानि अभवन् ?*
7. *एकस्य राज्यस्य रूपेण सङ्घटनानन्तरं जनजातीयः समाजः कथं परिवर्तितः?*

आगच्छन्तु विचारयामः

8. *किं बञ्जारजनाः अर्थव्यवस्थायै महत्त्वपूर्णाः आसन् ?*
9. *गोण्डजनानाम् इतिहासः, अहोमजनानाम् इतिहासात् केन प्रकारेण भिन्नः आसीत् ? किं काचिद् समानता अपि आसीत् ?*

आगच्छन्तु कृत्वा

10. *मानचित्रे अस्मिन् अध्याये उल्लिखितानां जनजातीनां क्षेत्राणि चिह्नितानि कुर्वन्तु । कयोश्चित् द्वयोः सम्बन्धयोः चर्चां कुर्मः यत् किं तेषां जीविकोपार्जनस्य विधिः स्वस्य क्षेत्राणां भौगोलिकीनां विशेषतानां तथा च पर्यावरणस्य अनुरूपम् आसीत् ?*

11. *जनजातीय-समूहसम्बद्धानां वर्तमानानां सर्वकारीयाणां नीतीनां ज्ञानं कुर्वन्तु तथा च तेषां विषये चर्चायाः आयोजनं कुर्वन्तु ।*
12. *उपमहाद्वीपे वर्तमानानाम् अस्थानिनां पशुचारिणां समूहानां विषये ज्ञानं कुर्वन्तु । ते कान् जन्तून् स्थापयन्ति ? ते प्रायः केषु क्षेत्रेषु गमनं कुर्वन्ति ?*

8 ईश्वरे अनुरागः

भवन्तः पूजां कुर्वतः अथवा भजनं कुर्वतः, कीर्तनं कुर्वतः अथवा काव्यावलीं गायतः अथवा मौनेन ईश्वरस्य नाम जपतः च जनान् दृष्टवन्तः स्युः । भवद्भिः एतत् अपि अवधारितं स्यात् यत् तेषु केचन तु एतावन्तः मग्नाः भवन्ति यत् तेषां नेत्रयोः अश्रूणि आयान्ति । ईश्वरं प्रति एतादृशः प्रेमभावः अथवा अगाधभक्तिः तेषां विविधप्रकारकाणां भक्तिआन्दोलनानां तथा सूफी-आन्दोलनानां च योगदानेन वर्तते, येषाम् अष्टमशताब्दीतः उद्भवः आरब्धः आसीत् ।

परमेश्वर-सम्बद्धः विचारः

विशालतमानां राज्यानाम् उद्भवात् प्राक् विभिन्नानां समूहानां जनाः स्वस्य देवीनां देवतानां च पूजां कुर्वन्ति स्म । यदा जनाः नगराणां विकासानां व्यापाराणां साम्राज्यानां वा माध्यमेन निकटे जाताः, तदा नूतनानां विचाराणां विकासः आरब्धः । अयं विषयः व्यापकरूपेण अङ्गीक्रियमाणः आसीत् यत् सर्वे जीवधारिणः उत्तमानि तथा च अनुत्तमानि कर्माणि कुर्वन्तः जीवन-मरणस्य तथा च पुनर्जीवनस्य अनन्तचक्रेभ्यः गमनं कुर्वन्ति । एवं प्रकारेण अयं विचारः अपि क्वचित् उपविष्टः आसीत् यत् सर्वे जनाः जन्मसमये समानाः न भवन्ति । इयं धारणा आसीत् यत् सामाजिक-विशेषाधिकाराः कस्मिंश्चित् उच्चकुटुम्बे अथवा उच्चजात्याम् उत्पन्नतायाः कारणेन लभ्यन्ते, अनेकेषां पाण्डित्यपूर्णानां ग्रन्थानां विषयः आसीत् ।

अनेके जनाः ईदृशैः विचारैः भ्रमिताः आसन् । अतः ते बुद्धस्य तथा च जैनानाम् उपदेशान् प्रति उन्मुखाः अभवन् । येषाम् अनुसारेण व्यक्तिगत-प्रयासैः सामाजिकम् अन्तरं दूरीकर्तुं शक्यते । तथा च पुनर्जन्मनः चक्रात् मुक्तिः प्राप्तुं शक्यते । केचन अन्ये जनाः परमेश्वर-सम्बद्धात् अस्मात् विचारात् आकर्षिताः अपि अभवन् यत् यदि मनुष्यः भक्तिभावेन परमेश्वरस्य शरणं गच्छेत्, तर्हि परमेश्वरः व्यक्तिम् एतस्मात् बन्धनात् मुक्तिं दातुं शक्नोति । श्रीमद्भगवद्गीतायां व्यक्तः अयं विचारः सामान्यतया 'सन्' (ईसवी-सन्) इत्यस्य प्रारम्भिक-शताब्देषु लोकप्रियः अभवत् । विशदां धार्मिकानाम् अनुष्ठानानां माध्यमेन शिवं विष्णुं तथा च दुर्गां परं देवी-देवतानां च रूपेण पूजनस्य आरम्भः अभवत् । सह एव विभिन्नेषु क्षेत्रेषु पूज्यमानाः देवीः देवताः शिव-विष्णु-दुर्गादीनां च रूपाणि इति मन्तव्यम् अभवत् । अनया प्रक्रियया स्थानीयानि मिथ्यानि तथ्यानि कथाः

च पौराणिक-कथानाम् अङ्गानि अभवन् । पुराणेषु पूजायाः यासां पद्धतीनाम् अनुशंसा कृता आसीत्, तासाम् आचरणं स्थानीयस्तरे अपि आरभत । अग्रे पुराणेषु अपि अस्य विषयस्य उल्लेखः कृतः वर्तते यत् भक्तः स्यात् नाम कस्यापि जातेः, सः यथार्थभक्त्या ईश्वरस्य कृपां प्राप्तुं शक्नोति । भक्तेः विचारधारा एतावती अधिका लोकप्रिया आसीत्, यत् बौद्धाः तथा च जैनमतानुयायिनः अपि एतान् विश्वासान् अपालयन् ।

चित्रम् 1

भगवद्गीतायाः कस्याश्चित् दक्षिण-भारतीय-पाण्डुलिप्याः स्वीकृतं पृष्ठम्

क्षिणभारते भक्त्याः कश्चन नूतनः प्रकारः- नयनारः तथा च अलवारः

सप्तमशताब्दीतः नवमशताब्द्याः मध्ये केषाञ्चित् नूतनानां धार्मिकस्य आन्दोलनस्य प्रादुर्भावः अभवत् । एतेषाम् आन्दोलनानां नेतृत्वं नयनारैः (शिवोपासकैः) तथा च अलवारैः (विष्णवोपासकैः) कृतम् । एते उपासकजनाः सर्वासां जातीनाम् आसन् । यासु पुलैया तथा च पनारसदृशाः 'अस्पृश्या' मन्यमानानां जातीनां जनाः अपि सम्मिलिताः आसन् । ते बौद्धानां जैनानां च कटु-आलोचकाः आसन् । तथा च शिवं तथा च विष्णुं प्रति यथार्थप्रेम मुक्तेः मार्गं कथयन्ति । तैः सङ्गमसाहित्ये (तमिल-साहित्यस्य प्राचीनतमम् उदाहरणं तथा च सामान्यतया सन् अर्थात् ईसवी-सन् इत्यस्य प्रारम्भिक-शताब्दे रचितम्) समाहितस्य स्नेहस्य शूरवीरतायाः च आदर्शान् अङ्गीकृत्य भक्तेः मूल्येषु तेषां समावेशः कृतः आसीत् । नयनाराः तथा च अलवाराः भ्रमणशीलाः साधवः सन्यासिनः च आसन् । ते यत्किमपि वा स्थानं ग्रामं च गच्छन्ति स्म, तत्रत्यानां स्थानीयानां देवीनां देवतानां च प्रशंसायां सुन्दरकविताः च रचयित्वा तान् सङ्गीतबद्धं कुर्वन्ति स्म ।

?

अद्य अपि भवन्तः स्थानीय-मिथकानां तथा च तथ्यानां कथानां च एतस्याः प्रक्रियायाः कृते व्यापकीं स्वीकृतिं प्राप्नुवन्तः द्रष्टुं शक्नुवन्ति । किं भवन्तः स्वस्य समीपम् एतादृशानि कानिचन उदाहरणानि अन्वेष्टुं शक्नुवन्ति ।

धार्मिक-जीवनपरिचय-सन्त- जीवनपरिचय-लेखनं च

नयनारः तथा च अलवारः

आहत्य 63 नयनाराः एतादृशाः आसन्, ये कुम्भकारीयायाम् 'अस्पृश्यायाम्' कर्मकरीजात्यां, कृषकजात्याम्, आखेटकजात्यां सैनिकजात्यां, ब्राह्मणजात्यां तथा च ग्रामप्रधानसदृशेषु विविधायां जात्याम् उत्पन्नाः जाताः आसन् । तेषु सर्वाधिकाः प्रसिद्धाः आसन्- अप्पार-संबन्दर-सुन्दरार-माणिक्कवसागाराश्च । तेषां गीतानां सङ्कलनद्वयम् आसीत् । – तेवरं तथा च तिरुवाचकम् ।

अलवार-भक्ताः सङ्ख्यायां 12 आसन् । ते अपि भिन्न-भिन्नप्रकारस्य पृष्ठभूमितः आगताः आसन् । तेषु सर्वाधिकाः प्रसिद्धाः आसन्-पेरियअलवारः, तस्य पुत्री अण्डाला, तोण्डरडिप्पोडी अलवारः तथा च नम्मालवारः । तेषां गीतानि दिव्यप्रबन्धे सङ्कलितानि आसन् ।

दशमीतः द्वादशशताब्द्याः मध्ये चोलैः तथा च पाण्डयन-राजभिः तेषु अनेकेषु धार्मिकेषु स्थलेषु विशालानि मन्दिराणि निर्मापितानि, यत्र भक्तैः कविभिः च यात्रा कृता । एवं प्रकारेण भक्तिपरम्परायाः तथा च मन्दिरपरम्परायाः मध्ये दृढसम्बन्धाः स्थापिताः अभवन् । अयम् एव सः कालः आसीत् । यदा तेषां कवितानां सङ्कलनं सज्जीकृतम् आसीत् । एतत् अतिरिच्य अलवाराणां तथा च नयनार-भक्तानां **धार्मिक-जीवनरचनाः** अपि रचिताः अभवन् । अद्य वयं भक्तिपरम्परायाः इतिहासलेखने एतासां जीवनरचनानां स्रोतसः रूपेण उपयोगं कुर्मः।

चित्रम् 2

माणिक्कवसागारस्य कांस्य-प्रतिमा

भक्तः भगवान् च

माणिक्कवसागारस्य एका रचना :

मम अस्थि-मासयुतायाम् अस्यां घृणित-प्रतिकृतौ
त्वम् आयातः यथा किञ्चन सुवर्णमन्दिरं भवेत्,
मम कृपालुः प्रभुः मम विशुद्धरत्नम्,
त्वं मां सान्त्वनां प्रदाय अरक्षत् ।
त्वया मम दुःखम्, मम जन्ममृत्योः कष्टं माया मोहः च
अपाकृतः अहं च मोचितः ।
हे ब्रह्मानन्द, हे प्रकाशमय मया तव शरणं स्वीकृतम्
अहं च त्वत्तः कदापि दूरं भवितुं न शक्नोमि ।

?

कविना भगवता सह स्वस्य संबन्धस्य कीदृशं वर्णनं कृतम् अस्ति ?

दर्शनं भक्तिः च

भारतस्य सर्वाधिकेषु प्रभावशालिषु दार्शनिकेषु अन्यतमस्य शङ्करस्य जन्म अष्टमशताब्द्यां केरलप्रदेशे अभवत् । असौ अद्वैतवादस्य समर्थकः आसीत् । यस्य अनुसारं जीवात्मा तथा च परमात्मा (यत् परं सत्यं वर्तते) द्वौ अपि एकरूपम् एव वर्तेते । असौ इमाम् एव शिक्षाम् दत्तवान् यत् ब्रह्म यत् एकमात्रम् अथवा परं सत्यम् अस्ति । सः निर्गुणः तथा च निराकारः वर्तते । शङ्करः अस्मान् परितः यः संसारः सः मिथ्या अथवा माया अस्ति इति मत्तवान् । तथा च संसारस्य परित्यागकरणाय अर्थात् संन्यासस्वीकरणाय तथा च ब्रह्मणः समुचितां प्रकृतिम् अवगन्तुं मोक्षप्राप्तकरणाय ज्ञानमार्गस्य आचरणाय उपदेशम् अकरोत् ।

रामानुजः एकादश्यां शताब्दौ तमिल्नाडुराज्ये उत्पन्नः अभवत् । असौ विष्णुभक्तेभ्यः अलवारभक्तेभ्यः अतीव प्रभावितः आसीत् । तेषाम् अनुसारं मोक्षप्राप्तेः उपायः विष्णुं प्रति अनन्यभक्ति-भावस्य स्थापनं वर्तते । भगवतः विष्णोः कृपादृष्ट्या भक्तः तेन सह एकाकारस्य परमानन्दं प्राप्तुं शक्नोति । रामानुजः विशिष्टताद्वैतस्य सिद्धान्तं प्रतिपादितवान् । यस्य अनुसारम् आत्मा परमात्मना सह युक्तेः परम् अपि पृथक् सत्तां धारयति । रामानुजस्य सिद्धान्तः भक्तेः नवीनां धाराम् अतीव प्रेरिताम् अकरोत् । या परवर्तिकाले उत्तरभारते विकसिता अभवत् ।

?

शङ्करस्य अथवा रामानुजस्य विचाराणां विषये किञ्चित् अधिकं ज्ञातुं प्रयत्नं कुर्वन्तु ।

बसवन्नायाः वीरशैववादः

अस्माभिः पूर्वं पठितं यत् तमिल-भक्ति-आन्दोलनस्य तथा च मन्दिरपूजायाः मध्ये के सम्बन्धाः आसन् । एतस्य परिणामतः या प्रतिक्रिया अभवत्, सा बसवन्ना तथा च अल्लमाप्रभो तथा च अक्कमहादेवीसदृशैः तस्य सहचरैः आरब्धे वीरशैव-आन्दोलने स्पष्टतः दृश्यते । एतत् आन्दोलनं द्वादशशताब्द्याः मध्ये कर्णाटके प्रारब्धम् आसीत् । वीरशैवैः सर्वेषां जनानां समानतायाः पक्षे एवं च जातिं तथा च नारीं प्रति व्यवहारस्य विषये ब्राह्मणवादीन्याः विचारधारायाः विरुद्धं स्वस्य प्रबलाः तर्काः प्रस्तुताः आसन् । किञ्च ते सर्वविधानां कर्मकाण्डानां तथा च मूर्तिपूजायाः विरोधिनः आसन् ।

वीरशैवानां वचनानि

अधः कतिचन वचनानि कथनानि च प्रदत्तानि सन्ति, यानि बसवन्नायाः सन्ति इति सूच्यन्ते :

धनिकाः जनाः
शिवाय मन्दिरं निर्मान्ति ।
अहम्
निर्धनः जनः किं करिष्यामि ?

मम जङ्घा स्तम्भाः- सन्ति,
शरीरं तीर्थ मन्दिरं वर्तते,
शिरः तस्य छत्रं वर्तते सुवर्णनिर्मिता ।
किञ्चिद् शृण्वन्तु, नदीसङ्गमस्य प्रभुः, स्थितानि वस्तूनि कदाचित् पतिष्यन्ति, परन्तु चलन्ति वस्तूनि सदा चलिष्यन्ति ।

?

वसन्ना, ईश्वरं किं मन्दिरम् अर्पयन् वर्तते ?

महाराष्ट्रस्य महात्मानः

त्रयोदशशताब्दीतः सप्तदशशताब्दीं यावत् महाराष्ट्रे अनेके महात्मकवयः अभवन्, येषां सरलमराठीभाषया लिखितानि गीतानि अद्य अपि जनमनांसि प्रेरयन्ति । तेषु महात्मसु सर्वाधिकाः महत्त्वपूर्णाः आसन् – ज्ञानेश्वरः नामदेवः एकनाथ तुकारामः तथा च सखूबायीसदृश्यः स्त्रियः तथा च चोखामेलायाः कुटुम्बः यः अस्पृश्याः इति मन्यमानायाः महार इति जात्याः आसीत् । भक्तेः इयं क्षेत्रीयपरम्परा पण्ढरपुरे विठ्ठले (विष्णोः एकं रूपम्) एवं च जनानां हृदये विराजमानेषु व्यक्तिगतेषु देवसम्बद्धेसु विचारेषु केन्द्रितम् आसीत् ।

एतैः सन्यासिभिः कविभिः सर्वविधकर्मकाण्डस्य, पवित्रतायै क्रियमाणानाम् आडम्बराणां जन्मसु आधारितानां सामाजिकानां विभेदानां च विरोधः कृतः । न केवलम् एतावत् एव अपि तु एतैः संन्यासस्य विचाराः अपि उपेक्षिताः तथा च कस्यचित् अपि अन्यव्यक्तेः इव दैनिकान्नं सम्पादयन् कुटुम्बेन सह विनम्रतापूर्वकम् अपेक्षितसाहाय्यकानां जनानां सेवां कुर्वन् जीवनयापनम् अधिकं वरम् इति अङ्गीकृतम् । तैः एतस्मिन् विषये बलं प्रदत्तं यत् यथार्थभक्तिः अपरेषां दुःखानां वण्टनं वर्तते । अनेन एकस्य नूतनस्य मानवतावादी-विचारस्य उद्भवः अभवत् । यथा सुप्रसिद्धः गुजराती-महात्मा नरसीमेहता अकथयत् – "वैष्णवजन तो तेने कहिए पीर पराई जाने रे" अर्थात् वैष्णवजनाः ते भवन्ति ये अन्येषां दुःखं स्वस्य दुःखम् इव मन्यन्ते तथा च दुःखसमये तेषां साहाय्यं कुर्वन्ति ।

सामाजिक-व्यवस्थायां प्रश्नचिह्नम्

एतत् महात्मनः तुकारामस्य 'अभङ्गम्' (मराठि-भक्तिगीतम्) वर्तते :

यः दीनान् दुःखितान् च
स्वीयान् मन्यते
सः एव महात्मा वर्तते
यतोहि ईश्वरः तेन सह वर्तते ।
सः परित्यक्तां प्रतिव्यक्ति
हृदयेन संस्थाप्य संरक्षति
सः एकेन दासेन सह अपि
पुत्रम् इव व्यवहरति ।
तुकारामस्य कथनं वर्तते
अहम् एतत् कथयन्
कदापि न श्रान्तः भविष्यामि
एतादृशः जनः
स्वयम् ईश्वरः वर्तते ।

अत्र चोखामेलायाः पुत्रेण रचितम् एकम् अभङ्गं दीयमानं वर्तते :

त्वया वयं निम्नजातिकाः निर्मिताः
मम महाप्रभो, त्वं स्वयम् एतां स्थितिम् अङ्गीकृत्य तु पश्य
अस्माभिः आजीवनम् उच्छिष्टं खादनीयं भवति
एतदर्थं मम प्रभो त्वयि लज्जा भवितव्या
त्वं तु अस्माकं गृहे अखादः
त्वम् एतस्मात् कथं निषेधं कर्तुं शक्नोषि ?
चोखायाः (पुत्रः) करमामेला पृच्छति
त्वया मह्यं जीवनं किमर्थं प्रदत्तम् ?

?

एतासु रचनासु अभिव्यक्तायाः सामाजिक-व्यवस्थायाः विचाराणां विषये चर्चां कुर्वन्तु ।

चित्रम् 3

अग्रेः समीपं तपस्विनां समूहः

नाथपन्थिनः सिद्धाः एवं च योगिनः

अस्मिन् काले अनेके एतादृशाः धार्मिकाः समूहाः प्रकटिताः अभवन्, यैः साधारणं तर्कं वितर्कं च आश्रित्य रूढिवादिधर्मस्य कर्मकाण्डस्य एवं च कृत्रिमपक्षाणां तथा च समाज-व्यवस्थायाः आलोचना कृता। तेषु नामपन्थिनः सिद्धाचारिणः योगिजनाः च उल्लेखनीयाः सन्ति। तैः संसारत्यागस्य समर्थनं कृतम्। तेषां विचारेण निराकार-सत्यस्य चिन्तनं मननं तथा च तेन सह एकीभवनस्य अनुभूतिः एव मोक्षस्य मार्गः वर्तते। एतदर्थं तैः योगासन-प्राणायाम-चिन्तन-मननसदृशीनां च क्रियाणां माध्यमेन मनसः एवं च शरीरस्य कठोरतया शिक्षणस्य आवश्यकतायाः उपरि बलं प्रदत्तम्। एते समूहाः विशेषतया 'निम्ना' इति कथ्यमानासु जातिषु अतीव लोकप्रियाः अभवन्। तैः कृतायाः रूढीवादिधर्मस्य आलोचनया भक्तिमार्गीयधर्माय आधारः निर्मितः, यः अग्रे गत्वा उत्तरभारते लोकप्रिया शक्तिः अभवत्।

इस्लामः तथा च यवनसम्प्रदायविशेषः

महात्मसु तथा च सूफी-सम्प्रदाय-विशेषेषु अधिका समानता आसीत्, एतावति समानता आसीत् यत् तैः परस्परं बहूनां विचाराणाम् आदानं प्रदानं च कृतं तथा च तान् अनुसृतवन्तः अपि इति अपि मन्यते। सूफीमुस्लिमाः रहस्यवादिनः आसन्। ते धर्मस्य बाह्यानि आडम्बराणि अस्वीकुर्वन्तः ईश्वरं प्रति प्रेम तथा च भक्तिः तथा च सर्वान् मनुष्यान् प्रति दयाभावं संस्थापयितुं बलं प्रददति स्म।

इस्लामेन एकेश्वरवादस्य अर्थात् अल्लाहं प्रति पूर्णस्य समर्पणस्य प्रचारः कृतः। इस्लामेन मूर्तिपूजा न अङ्गीकृता तथा च उपासनापद्धतीः सामूहिक-प्रार्थना-नमाजस्य च रूपं प्रदाय ताः अतीव सरलाः कृताः। तेन एव सह एव मुस्लिम-विद्वद्भिः (उलेमा) 'शरियत' इति नाम्ना एकः धार्मिकः अधिनियमः निर्मितः। सूफीजनाः मुस्लिम-धार्मिक-विद्वद्भिः निर्धारित-विशद्-कर्मकाण्डस्य आचार-संहितायाः च बहून् अंशान् न अङ्गीकृतवन्तः। ते ईश्वरेण सह तथा एव युक्ताः भवितुम् इच्छन्ति स्म, यथा कश्चन प्रेमीजनः संसारस्य चिन्ताम् अकृत्वा स्वीयया प्रियतमया सह स्थातुम् इच्छति। संन्यासि-कवीनाम् इव सूफीजनाः अपि स्वीयां भावनां व्यक्तीकर्तुं काव्यरचनां कुर्वन्ति स्म। गद्ये किञ्चन विस्तृतसाहित्यं तथा च बहूनि तथ्यानि कथाः च प्रायः प्रायः एतेभ्यः सूफी-महात्मभ्यः विकसिताः अभवन्।

मध्य-एशियायाः महत्सु सूफीमहात्मसु गज्जाली-रूसी-सादीनामानि च उल्लेखनीयानि आसन्। नाथपन्थिनः, सिद्धान् योगिनः च इव सूफीजनाः अपि एवम् एव मन्यन्ते यत् संसारं

प्रति पृथग् दृष्टिधारणाय अन्तःकरणस्य शिक्षणं पाठनं च शक्यं वर्तते । तैः कस्यचित् औलियायाः तथा च पीरस्य संरक्षणे नामजपः, चिन्तनम्, समा अर्थात् गानम्, रक्स अर्थात् नृत्यम्, नीतिचर्चा, श्वासनियन्त्रणादिभिः प्रशिक्षणस्य विस्तृत-रीतीनां विकासः कृतः । एवं प्रकारेण सूफी-गुरूपरम्पराणां प्रादुर्भावः अभवत् । एतेषु प्रत्येकं परम्पराक्रमः निर्देशानां तथा च धार्मिकक्रियाणां किञ्चित् भिन्नां विशिष्टां विधिम् अनुसरति स्म ।

चित्रम् 4

आनन्दिताः यवन-सम्प्रदाय-विशेषाः

चित्रम् – 5

कुरानस्य पाण्डुलिपिभ्यः स्वीकृतं पृष्ठं शरावः, परवर्तिनी पञ्चदश- शताब्दी

एकादशशताब्दीतः अनेके यवन-सम्प्रदाय-विशेषजनाः मध्य-एशियायाः आगत्य हिन्दुस्ताने वासम् आरब्धवन्तः । देहलीसाम्राज्यस्य स्थापनया सह इयं प्रक्रिया तस्मिन् समये इतोऽपि दृढा अभवत्, यदा उपमहाद्वीपे सर्वत्र विशालाः अनेके सूफी-केन्द्राणि विकसितानि अभवन् । चिश्ती-परम्परा एतासु सर्वासु परम्परासु सर्वाधिकी प्रभावशालिनी आसीत् । एतासु औलियायानां काचित् दीर्घपरम्परा आसीत् । यथा अजमेरस्य ख्वाजा-मुइनुद्दीन-चिश्ती, देहल्याः कुत्बउद्दीन-बख्तियार-काकी, पञ्जाबप्रदेशस्य बाबा-फरीदः, देहल्याः ख्वाजा-निजामुद्धीन-औलिया तथा च गुलबर्गस्य बन्दानवाज-गिसुदराजः इत्यादयः।

खानकाहः

सूफी-संस्था यत्र सूफी-महात्मानः प्रायेण निवसन्ति अपि।

सूफी-महात्मानः स्वस्य यवन-भिक्षुविहारेषु विशेषाणां गोष्ठीनाम् आयोजनं कुर्वन्ति स्म । यत्र सर्वविधाः भक्तगणाः, येषु राजकीयगृहाणां जनाः तथा च अभिजाताः सामान्यजनाः च सम्मिलिताः भवन्ति स्म । ते आध्यात्मिक-विषयेषु चर्चां कुर्वन्ति स्म । स्वस्य सांसारिकीणां समस्यानां समाधानं कर्तुं महात्मभ्यः आशीर्वादं याचन्ते स्म अथवा सङ्गीतस्य तथा च नृत्यस्य उत्सवेषु सम्मिलिताः भूत्वा गच्छन्ति स्म।



प्रायेण जनाः एवम् अवगच्छन्ति स्म यत् यवन-सम्प्रदाय-विशेषाः औलियानां समीपं चमत्कारिक-शक्तयः भवन्ति, याभ्यः सामान्यजनाः रोगेभ्यः कष्टेभ्यः च मुक्तिं प्राप्तुं शक्नुवन्ति स्म । सूफी-महात्मनां दरगाहः (मन्दिरं) किञ्चन तीर्थस्थलं निर्मितं भवति स्म, यत्र सर्वेषां धर्माणां जनाः सहस्र-सङ्ख्यासु एकत्रिताः भवन्ति स्म।

चित्रम् 6

सर्वेषां पृष्ठभूमीनां भक्ताः, सूफी-मन्दिरेषु गमनं कुर्वन्ति।

स्वामिनः(प्रभोः) अन्वेषणम्

जलालुद्दीन-रूमी त्रयोदशशताब्द्याः महान् यवन-सम्प्रदाय-विशेषस्य कविः आसीत् । सः ईरानवासी आसीत् । तथा च फारसीकाव्यानां रचनाम् अकरोत् । तस्य कृतीनाम् एकम् उद्धरणं प्रस्तुतं वर्तते -

सः ईसायीनां शूले न आसीत् । अहं हिन्दुमन्दिराणि गतवान् । तत्र अपि तस्य नामचिह्नं किमपि न आसीत् । न तु सः उन्नतेषु स्थानेषु प्राप्तः, न एव उपत्यकासु ...अहं मक्कायाः काबाम् अपि गतवान् । सः तत्र न आसीत् । अहं तस्य विषये दार्शनिकम् एविसेन्नाम् अपृच्छम् । सः एविसेन्नायाः प्राप्तेः दूरम् आसीत्.....अहं स्वस्य हृदि ईक्षणम् अकरवम् । अयम् एव तस्य स्थानम् आसीत् । तत्र एव अहं तं प्राप्नुवम् । सः अन्यत्र कुत्रापि न आसीत् ।

चित्रम् 7

चैतन्यदेवः षोडशशताब्द्याः बङ्गालस्य कश्चन भक्तिमहात्मा आसीत् । असौ राधाकृष्णौ प्रति निष्कामस्य भक्ति-भावस्य उपदेशम् अकरोत् । अस्मिन् चित्रे भवन्तः तेषाम् अनुयायिनः एकसमूहे आनन्दे नृत्यन्तः गायन्तः च द्रष्टुं शक्नुवन्ति ।

उत्तरभारते धार्मिकं परिवर्तनम्

उत्तरभारते धार्मिकपरिवर्तनम्

त्रयोदशशताब्द्याः अनन्तरम् उत्तरभारते भक्ति-आन्दोलनस्य एका नवीना लहरी आगता । इदं किञ्चन एतादृशं युगम् आसीत्, यदा इस्लाम-ब्राह्मणवादि-हिन्दुधर्म-सूफीमतं भक्तेः विविधधाराः नामपन्थि-सिद्ध-योगिनः च परस्परं अन्योन्यं प्रभावितान् अकुर्वन् । अस्माभिः दृष्टं यत् नवीननगराणां तथा च राज्यानाम् (अध्यायः 2, 3 तथा च 4) उद्भवः जायमानः आसीत् । जनाः च स्वस्मै विनूतनान् व्यवसायान् विनूतनाः भूमिकाः च गवेषयन्तः आसन् । एतादृशाः जनाः विशेषतया शिल्पिनः, कृषकाः, व्यापारिणः, कर्मकराः च एतेषां नवीनानां महात्मनां विचारान् श्रोतुम् एकत्रिताः भवन्ति स्म । पुनः ते तेषां प्रचारं कुर्वन्ति स्म ।

तेषु कबीरसदृशैः तथा च बाबागुरुनानकसदृशैः कैश्चित् महात्मभिः सर्वे आडम्बरपूर्णाः रूढीवादिधर्माः न अङ्गीकृताः । तुलसीदासदृशैः तथा च सूरदाससदृशैः कैश्चित् अन्यैः महात्मभिः तस्मिन् समये विद्यमानान् विश्वासान् पद्धतीः च स्वीकुर्वद्भिः तान् जनसामान्यं यावत् प्रापणस्य प्रयत्नः कृतः । तुलसीदासः ईश्वरं रामरूपेण अधारयत् । अवधीभाषया लिखिता तुलसीदासस्य *'रामचरितमानसम्'* इति रचना तेषां भक्ति-भावस्य अभिव्यक्तिः साहित्यिकी कृतिः च उभयदृष्ट्या अपि महत्त्वपूर्णा वर्तते । सूरदासः श्रीकृष्णस्य अनन्यः भक्तः आसीत् । तस्य रचना सूरसागरे सूरसारावल्यां साहित्यलहर्यां च सङ्गृहीताः सन्ति । एवं च तेषां भक्तिभावम् अभिव्यञ्जयन्ति ।

मानचित्रम् 1

मुख्य-भक्ति-महात्मानः तथा च तैः सम्बद्धानि क्षेत्राणि

असमस्य शङ्करदेवः (परवर्तः 15 शताब्द्याम्) यः एतेषां समकालीनः आसीत्, सः विष्णोः भक्त्यां बलम् अददात् असमियाभाषायां कविताः तथा च नाटकानि अलिखत्। असौ 'नामघर' (कवितापाठः तथा च प्रार्थनागृहम्) स्थापयितुं पद्धतिम् अचालयत्, या अद्यावधिः अपि प्रचलन्ती वर्तते।

अस्यां परम्परायां दादूदयालः, रविदासः मीराबायी च सदृशाः महात्मानः अपि सम्मिलिताः आसन्। मीराबायी काचित् राजपूत-राजकुमारी आसीत्। यस्याः विवाहः षोडशशताब्द्यां मेवाडस्य कस्मिंश्चित् राजगृहे जातः आसीत्। मीराबायी रविदासस्य अर्थात् यः 'अस्पृश्यजातेः' मन्यते स्म तस्य अनुयायिनी अभवत्। सा कृष्णं प्रति समर्पिता आसीत् तथा च सा स्वीयान् गभीरान् भक्तिभावान् भजनेषु अभिव्यक्तम् अकरोत्। तस्याः गीतैः 'उच्चजातीनाम्' रीति-नियमानां कृते मुक्ततया आह्वानं प्रदत्तम्। तथा च एतानि गीतानि राजस्थानस्य गुजरातस्य च साधारणजनानां कृते अत्यधिकानि लोकप्रियाणि अभवन्। एतेषु अधिकानां विशिष्टम् अभिलक्षणम् एतत् वर्तते यत् एतेषां कृतयः क्षेत्रीयभाषासु रचिताः तथा च एतासां गायनं सरलतया कर्तुं शक्यते स्म। एतदर्थम्

एताः अत्यधिकाः लोकप्रियाः अभवन् तथा च क्रमशः वंशात् वंशं प्रति मौखिकरूपेण प्राचलन् । प्रायेण एतासां गीतानां प्रसारणे सर्वाधिक-निर्धनानां सर्वाधिक-वञ्चितस्य समुदायस्य महिलानां भूमिका आसीत् । प्रसारणस्य अस्यां प्रक्रियायाम् एते सर्वे जनाः प्रायेण स्वस्य अनुभवान् अपि योजयन्ति स्म । एवम् अद्य प्राप्यमाणानि गीतानि महात्मनां रचनाः तु सन्ति एव, सह एव तेषां जनानां वंशस्य रचनाः अपि मन्तुं शक्यन्ते, ये एतान् गायन्ति स्म । ताः रचनाः अस्माकं जीवन्त्याः जनसंस्कृतेः अङ्गभूतानि अभवन् ।

राणः राजप्रासादात् परम्

मीराविरचितं गीतम् -

लोकप्रतिष्ठा 'कुलराँ मरजादाँ संसारे जेक णा राख्याँ री'

प्रासाद-अट्टाली त्यक्तं सर्वम्

भवतः हि त्यक्तं निवासनगरम्

राणावर्यः न जाने कस्मात् आचरति मयि वैरम्

विषचषकः राणा प्रेषितम्

हसन्त्या मीरया पीतम्

न किमपि जातं तदा यदा विषं मीरया पीतम्

राणा न जाने कस्मात् आचरति मयि वैरम्

?

भवतां विचारेण मीरा राणायाः राजभवनं किमर्थम् अत्यजत् ?

चित्रम् 8

मीराबायी

मानचित्रम् 1

मुख्य-भक्ति-महात्मानः तथा च तैः सम्बद्धानि क्षेत्राणि

कबीरस्य विषये किञ्चित् वर्णनम्

कबीरः सम्भवतः पञ्चदश्यां षोडश्यां वा शताब्द्याम् अभवत् । असौ कश्चन अत्यधिकः प्रभावशाली महात्मा आसीत् । तस्य पालनं पोषणं च वाराणस्याम् अथवा समीपस्थे कस्मिंश्चित् मुस्लिम-तन्तुवायस्य कुटुम्बे अभवत् । तेषां जीवनस्य विषये अस्माकं पार्श्वे न्यूनाः विश्वसनीयाः सूचनाः सन्ति । वयं तस्य विचाराणां विषये ज्ञानं प्रतिष्ठया पदानां विशालसङ्ग्रहैः च प्राप्नुमः, येषां विषये एतत् कथ्यते यत् एतेषां रचना तु कबीरेण कृता आसीत् परन्तु एते भ्रमणशीलैः भजन-गायकैः च गीयन्ते स्म । एतेषु कतिचन भजनानि गुरु-ग्रन्थ-साहबे, पञ्चवाण्यां बीजकेषु च सङ्गृहीतानि सुरक्षितानि च सन्ति ।

यथार्थस्य ईश्वरस्य अन्वेषणम्

कबीरस्य रचना



चित्रम् -9 पटनिर्माणगृहे कार्यं कुर्वन् कबीरः

अल्लाहः रामः च जीवन्तु भवतां जीवाः

भक्तोपरि दयां कुरु मम ईश्वरः

किं वा स्वीकुर्यां मृत्तिकायाः

किं वा कुर्यां देहस्नानम्

ये अस्मान् मसकीनः तुदति

गुणान् हि सः गोपयति

ब्राह्मणः चतुर्विंशतिम् एकादशीम् आचरति,

काजी मरहमः जाँन

एकादशमासपृथक् यत् कृतम्

एकस्मिन् मासे समानः

पूर्वदिशि हरेः वासः

पश्चिमदिशि अल्लाहस्य वासः

अन्तःकरणम् अन्तःकरणे एव अन्विषेत्

अत्र एव रामः रहीमः च

? *एतेषु पद्येषु प्रदत्ताः विचाराः केन प्रकारेण बसवन्ना तथा च जलालुद्दीन-रूमिणा विचारेण समानतां अथवा भिन्नतां भजन्ते ?*

कबीरस्य उपदेशाः प्रमुख-धार्मिक-परम्पराणां पूर्णायाम् एवं च प्रचण्डायाम् अस्वीकृत्याम् आधारिताः आसन्। तेषाम् उपदेशेषु ब्राह्मणवादि-हिन्दुधर्मस्य तथा च इस्लामस्य अनयोः द्वयोः अपि बाह्याडम्बरपूर्णायाः पूजायाः सर्वेषां रूपाणां परिहासः कृतः वर्तते। तस्य काव्यस्य भाषा व्यवहारिकी हिन्दीभाषा आसीत्। या सामान्यजनैः सरलतया अधिगन्तुं शक्यते स्म। असौ बहुधा रहस्यमयीभाषायाः प्रयोगम् अकरोत्, यस्य अवगमनं कठिनम् आसीत्।

कबीरः निराकारे परमेश्वरे विश्वसिति स्म। कबीरः इमम् उपदेशम् अकरोत् यत् भक्तेः माध्यमेन एव मोक्षः अर्थात् मुक्तिः प्राप्तुं शक्या आसीत्। हिन्दुसम्प्रदायः तथा च मुस्लिमसम्प्रदायः द्वौ अपि तयोः अनुयायिनः अभवन्।

बाबा-गुरुनानकस्य विषये किञ्चित् वर्णनम्

कबीरस्य अपेक्षया बाबा-गुरुनानकस्य (1469-1539) विषये वयं बहुः अधिकं जानीमः। तलवण्ड्यां (पाकिस्ताने ननकाना-साहबे) जन्मप्राप्तवता बाबा-गुरुनानकेन करतारपुरे (रावीनद्याः तटे डेरा-बाबा-नानके) कस्यचित् केन्द्रस्य स्थापनायाः पूर्वम् अनेकाः यात्राः कृताः। सः स्वस्य अनुयायिनां कृते करतारपुरे एकां नियमिताम् उपासनापद्धतिं निरमापयत्। यस्याः अन्तर्गतं तस्य एव शब्देषु गीयते स्म। तस्य अनुयायिनः स्वस्य पूर्वधर्मान् जातिं लिङ्गभेदं च अन्वीक्ष्य एकत्र एव पाकशालायां खादन्ति पिबन्ति स्म। एतत् 'लङ्गर' इति कथ्यते स्म। बाबागुरुनानकः उपासनायै तथा च धार्मिककार्याणां कृते यत् स्थानं निश्चितवान् आसीत् तत् 'धर्मसाल' इति कथितः। अद्य एतत् गुरुद्वारा इति कथ्यते।

1539 तमे वर्षे स्वस्य मृत्योः प्राक् गुरुनानकः एकम् अनुयायिनं स्वस्य उत्तराधिकारिरूपेण अचिनोत्। अस्य नाम 'लहणा' इति आसीत्। परन्तु अयं गुरु-अङ्गदनाम्ना प्रसिद्धः अभवत्। 'गुरु-अङ्गद'-नाम्नः महत्त्वम् एतत् आसीत् यत् गुरु-अङ्गदः बाबागुरुनानकस्य एव अङ्गम् इति अमन्यत। गुरु-अङ्गदः बाबा-गुरुनानकस्य रचनानां सङ्ग्रहम् अकरोत् तथा च तस्मिन् सङ्ग्रहे स्वीयाः रचनाः अपि अयोजयत्।

चित्रम् 10

धार्मिकैः महानुभावैः सह चर्चां कुर्वन् बाबा-गुरुनानकः यदा सः युवा आसीत्।





चित्रम् 11

गुरुग्रन्थसाहबस्य एका आरम्भिकी पाण्डुलिपिः

सङ्ग्रहः एकस्यां नूतनायाः लिप्यां गुरुमुख्यां लिखितः आसीत्। गुरोः अङ्गदस्य त्रीभिः उत्तराधिकारिभिः अपि स्वरचनाः 'नानक' इति नाम्ना लिखिताः आसन्। एतासां सर्वासां सङ्ग्रहः गुरुः अर्जुनः 1604 तमे वर्षे अकरोत्। अस्मिन् सङ्ग्रहे शेखफरीदस्य, महात्मनः कबीरस्य, भगतनामदेवस्य तथा च गुरुतेगबहादुरसदृशानां सूफीनां महात्मनां गुरूणां च वाण्यः योजिताः। 1706 तमे वर्षे इमं विशालं सङ्ग्रहं गुरोः तेगबहादुरस्य पुत्रः तथा च उत्तराधिकारी गुरुगोबिन्दसिंहः प्रामाणयत्। अद्य अयं सङ्ग्रहः सिखानां पवित्रग्रन्थः अर्थात् गुरुग्रन्थसाहबः इति रूपेण ज्ञायते।

षोडश्यां शताब्द्यां बाबागुरुनानकस्य उत्तराधिकारिणां नेतृत्वे तस्य अनुयायिनां सङ्ख्यायाः विस्तारः अभवत्। एते अनुयायिनः अनेकजातिकाः आसन्। परन्तु एतेषु व्यापारिणः कृषकाः शिल्पकाराः च अधिकाः आसन्। अस्य कारणम् एतत् भवितुं शक्यते यत् बाबा-गुरुनानकः अस्मिन् विषये बलं प्रददाति स्म यत् तेषाम् अनुयायिनः गृहस्थाः स्युः अपि च उपयोगिभिः उत्पादकैः व्यवसायैः च युक्ताः भवेयुः। अनुयायिभिः इयम् आशा अपि क्रियते स्म यत् ते नूतनसमुदायस्य सामान्यकोषे योगदानं करिष्यन्ति।

सप्तदशशताब्द्याः प्रारम्भे केन्द्रीय-गुरुद्वारा-हरमन्दरसाहबस्य (सुवर्णमन्दिरस्य) समीपं रामदासपुरनगरस्य (अमृतसरः) विकसनम् आरब्धम्। प्रशासने एतत् वस्तुतः स्वायत्तम् आसीत्। आधुनिकाः इतिहासकाराः अस्य युगस्य सिक्खसमुदायं 'राज्यस्य अन्तर्गतं राज्यम्' मन्यन्ते। मुगलसम्राट् जहाँगीरः एतं समुदायं सम्भावितं सङ्कटम् इति मन्यते स्म। सः 1606 तमे वर्षे गुरवे अर्जुनसिंहाय मृत्युदण्डम् आदिशत्। सप्तदशशताब्द्यां सिक्खान्दोलनस्य राजनीतिकरणं प्रारब्धम्। यस्य दूरगामी परिणामः अयम् अभवत् यत् 1699 तमे वर्षे गुरुगोबिन्दसिंहः खालसायाः संस्थायाः निर्माणम् अकरोत्। 'खालसापन्था' इति नाम्ना प्रसिद्धः सिक्खसमुदायः अधुना काचिद् राजनैतिकी सत्ता अजायत।

षोडशशतकस्य सप्तदशशतकस्य च परिवर्तमानाः ऐतिहासिक्यः परिस्थितयः सिक्ख-आन्दोलनस्य विकासं प्राभावितवत्यः। आरम्भात् एव बाबागुरुनानकस्य विचाराणां सिक्ख-आन्दोलने महान् प्रभावः अभवत्। सः एकस्य एव ईश्वरस्य उपासनायाः महत्त्वे बलं दत्तवान्। सः आग्रहम् कृतवान् यत् जाति-धर्माणां अथवा लिङ्ग-भेदानां मुक्तिप्राप्तये न किञ्चित् महत्त्वम् अस्ति। तस्य कृते मुक्तिः नाम काचिद् निष्क्रियस्य आनन्दस्य प्राप्तिः न आसीत्, अपितु सक्रियरूपेण जीवनयापनेन सह सामाजिक-प्रतिबद्धतायाः सततप्रयत्नेषु एव निहिता आसीत्। स्वस्य उपदेशस्य सारस्य व्यक्तीकरणाय तेन त्रयाणां शब्दानां प्रयोगः कृतः – नाम, दानम्,

स्नानम् । नाम्ना तस्य अभिप्रायः समुचिता उपासना । दानेन तात्पर्यम् आसीत् अन्येषां हितकरणम् । स्नानेन तात्पर्यम् आचार-विचाराणां पवित्रता । अद्य तेषाम् उपदेशाः नाम-जपनं, किर्त-करणम्, वण्ड-ग्रहणम् इतिरूपेण स्मर्यन्ते । एताः अवधारणाः अपि उचितं विश्वासं तथा च उपासनां विश्वसनीयतापूर्णं निर्वाहकरणम्, संसाधनानां सम्मिल्य प्रयोगकरणम् अर्थात् अन्येषां सहयोगस्य महत्त्वं रेखाङ्कितं कुर्वन्ति । एतादृशं बाबागुरुनानकस्य समानतायाः विचाराणां च सामाजिक-राजनैतिकं च महत्त्वम् आसीत् । प्रायेण अनेन एव अस्माकं कृते बाबागुरुनानकस्य तेषाम् अनुयायिनाम् इतिहासस्य तथा च कबीर-रविदास-दादूसदृशानां च महात्मनां तेषाम् अनुयायिनाम् (येषां विचाराः बाबागुरुनानकस्य विचाराणाम् अतीव समीपस्थाः आसन्) इतिहासे विद्यमानस्य अन्तरस्य अवगमने साहाय्यं प्राप्यते ।

मार्टिन-लूथरः तथा च धर्मपरिष्कार-आन्दोलनम्

षोडशशताब्द्याः कालः यूरोपे अपि धार्मिकस्य अन्तःक्षोभस्य अर्थात् ऊहापोहस्य कालः आसीत् । तदा ईसायी -धर्मे अनेकानि परिवर्तनानि अभवन् । येषाम् आनेतारः ये नेतारः आसन् तेषु अन्यतमः आसीत् – मार्टिन-लूथरः(1483-1546)। लूथरः एतत् अनुभूतवान् यत् रोमन-कैथौलिक-चर्चस्य अनेके आचाराः व्यवहाराः च बायीबिल-शिक्षायाः विरुद्धं गच्छन्ति । लूथरः लैटिनभाषायाः अपेक्षया सामान्यजनानां भाषायाः प्रयोगाय प्रोत्साहनं दत्तवान् तथा च बायबिलस्य जर्मनभाषायाम् अनुवादं कृतवान् । सः दण्डमोचनस्य तस्याः प्रथायाः विरोधी आसीत् । यस्य अन्तर्गतं पापकर्माणि क्षमयितुं चर्चाय (क्रिस्तमन्दिराय) दानं दीयते स्म । मुद्रणालयानां वर्धमानेन प्रयोगेण तस्य रचनानां व्यापकरूपेण प्रचारः प्रसारः च अभवत् । अनेके प्रोटेस्टैण्ट-ईसायी -सम्प्रदायाः स्वस्य उद्भवं लूथरस्य शिक्षायाम् एव अन्विष्यन्ति ।



चित्रम् – 12

मार्टिन-लूथरद्वारा जर्मनभाषायाम् अनूदितस्य बाइबेलस्य शीर्षक-पृष्ठम्

बीजशब्दः

वीरशैवमतम्,

भक्तिः, सूफीः,

सूफी-भिक्षुक-

विहारः

कल्पनां कुर्वन्तु

भवन्तः एकस्मिन् उपवेशने भागग्रहणं कुर्वन्तः सन्ति । यत्र कश्चन महात्मा जातिव्यवस्थायां चर्चां कुर्वन् अस्ति । अस्याः चर्चायाः वर्णनं कुर्वन्तु ।

पुनः स्मरामः -

1. *निम्नलिखितानां मेलनं कुर्वन्तु-*

बुद्धः	*नामगृहम्*
शङ्करदेवः	*विष्णुपूजा*
निजामुद्दीन-औलिया	*सामाजिक-अन्तरेषु प्रश्नाः उत्थापिताः*
नयनारः	*सूफी-महात्मा*
अलवारः	*शिवस्य पूजा*

2. *रिक्तस्थानानां पूर्तिं कुर्वन्तु -*

क. शङ्करस्य----------समर्थकाः आसन् ।

ख. रामानुजेन ----------प्रभाविताः अभवन् ।

ग. ---------,---------तथा च ---------- वीरशैवमतस्य समर्थकाः आसन् ।

घ. ---------- महाराष्ट्रे भक्तिपरम्परायाः एकं महत्त्वपूर्णं केन्द्रम् आसीत् ।

3. *नाथपन्थिनां सिद्धानां तथा च योगिनां विश्वासानां तथा च आचाराणां व्यवहाराणां वर्णनं कुर्वन्तु ।*
4. *कबीरेण अभिव्यक्ताः प्रमुखाः विचाराः के के आसन् ? सः एतान् विचारान् कथम् अभिव्यक्तवान् ?*

आयान्तु, अवगच्छामः

5. *यवन-सम्प्रदाय-विशेषस्य प्रमुखाः आचाराः व्यवहाराः के आसन् ?*
6. *भवतां विचारेण बहवः गुरवः तस्मिन् समये प्रचलितान् धार्मिकान् विश्वासान् तथा च प्रथाः किमर्थं न अङ्गीकृतवन्तः ?*
7. *बाबा-गुरुनानकस्य प्रमुखाः शिक्षाः काः आसन् ?*

आयान्तु पुनः

8. जातिं प्रति वीरशैवानां तथा च महाराष्ट्रस्य महात्मनां दृष्टिः कीदृशी आसीत् ?
9. भवतां विचारेण जनसाधारणः अपि मीरायाः स्मृतिं किमर्थं सुरक्षितम् अस्थापयत् ?

आयान्तु, कृत्वा

10. जानन्तु यत् किं भवतां पार्श्वे भक्तिपरम्परायाः महात्मभिः सम्बद्धं किमपि मुस्लिममन्दिरं, गुरुद्वारा अथवा मन्दिरं वर्तते । एतेषु किमपि एकं द्रष्टुं गच्छन्तु तथा च सूचयन्तु यत् तत्र भवद्भिः किं दृष्टं किं च श्रुतम् ।
11. अस्मिन् अध्याये अनेकेषां कवीनां रचनानाम् उद्धरणानि प्रदत्तानि सन्ति । तेषां कृतीनां विषये अधिकं जानन्तु तथा च तेषां ताः कविताः अभिलिखन्तु, याः अत्र न प्रदत्ताः सन्ति । जानन्तु यत् किम् एताः गीयन्ते । यदि आं तर्हि कथं गीयन्ते तथा च कवयः एताः कविताः कान् विषयान् अधिकृत्य लिखितवन्तः ।
12. अस्मिन् अध्याये अनेकेषां महात्मनां कवीनां नाम्नां च उल्लेखः कृतः वर्तते, परन्तु केषाञ्चित् रचनाः अस्मिन् अध्याये सम्मिलिताः न सन्ति । तस्याः भाषायाः विषये अधिकतया जानन्तु, यस्यां भाषायां कवयः स्वकृतीनां रचनाम् अकुर्वन् । किं तेषां रचनाः गीयन्ते स्म ? तेषां रचनानां विषयः कः आसीत् ?

9 क्षेत्रीय-संस्कृतीनाम् उद्भवः

? अन्विष्यन्तु यत् विगतदशवर्षेषु कियन्ति नूतनराज्यानि अभवन्, किम् एतेषु प्रत्येकं राज्यं किञ्चन स्वतन्त्रं क्षेत्रं वर्तते ?

जनानां वर्गीकरणस्य कश्चन सरलतमोपायः वर्तते, यत् तेषां व्यवहारिक्या भाषया तेषां परिभाषीकरणम् । यदा वयं कमपि जनं तमिलः अथवा बङ्गः इति व्यवहरामः, तदा अस्य सामान्यार्थः भवति अयं जनः तमिल्भाषाम् अथवा बङ्गभाषां वदति, तथा च तमिल्नाडुप्रदेशे अथवा बङ्गालप्रदेशे निवसति । अनेनैव प्रकारेण वयं प्रत्येकं क्षेत्रस्य कस्यचित् प्रमुखप्रकारस्य भोजनम्, वस्त्रम्, काव्यम्, नृत्यम्, सङ्गीतं तथा चित्रकला इत्यादिना सम्बध्यते । यदा-कदा वयम् एतादृशीं संस्कृतिं मत्वा चलामः, तथा च चिन्तयामः, यत् एताः संस्कृतयः युग-युगान्तरेभ्यः अस्तित्वे सन्ति । परन्तु भिन्न-भिन्नक्षेत्रस्य मध्ये विभाजक-सीम्नः निर्माणसमयस्य भूमिका आसीत् । यां वयम् अद्य क्षेत्रीयसंस्कृतिम् अवगच्छामः, सा (संस्कृतिः) कालप्रभावात् परिवर्तिता वर्तते (वस्तुतः एषा अद्यापि परिवर्तमाना वर्तते) इमाः क्षेत्रीय-संस्कृतयः जटिलप्रक्रियया विकसिता अभूवन् । अस्याः प्रकियायाः परिप्रेक्ष्ये स्थानीयपरम्पराणाम् उपमहाद्विपस्य अन्यभागस्थविचाराणाम् आदान-प्रदानेन पारस्परिकसाहाय्यम् अभवत् । यथा वयं पश्यामः काश्चित् परम्पराः तु केषाञ्चित् विशेषक्षेत्राणां स्वस्य सन्ति, तथा च काश्चित् अन्याः परम्पराः विभिन्नक्षेत्रेषु समानाः प्रतीयन्ते । परन्तु एतत् अतिरिच्य काश्चित् अन्याः परम्पराः कस्यचित् क्षेत्रविशेषस्य प्राचीनाभ्यः क्षेत्रीयपरम्पराभ्यः उत्पन्नाः, परन्तु अन्यस्मिन् क्षेत्रे गत्वा ताभिः किञ्चन नवीनं रूपं प्राप्तं भवति ।

चेरभाषायाः तथा च मलयालमभाषायाः विकासः

आगच्छन्तु, भाषाक्षेत्रयोः मध्ये अन्तःसम्बन्धस्य एकेन उदाहरणेन स्वकीयं विश्लेषणं कुर्मः । महोदयपुरम् इत्यस्य चेरराज्यप्रायद्वीपस्य दक्षिणपश्चिमभागे, यः अद्यतनस्य केरलराज्यस्य कश्चन सम्भागः वर्तते, नवमशताब्द्यां संस्थापितः अभवत् । संभवतः मलयालमभाषा अस्मिन् क्षेत्रे जनाः व्यवहरन्ति स्म । शासकाः मलयालमभाषायाः एवञ्च लिप्याः प्रयोगः स्वकीयाभिलेखे कृतवन्तः । वस्तुतः अस्याः भाषायाः प्रयोगः उपमहाद्वीपस्य सर्वकारीयाभिलेखे कस्याश्चित् क्षेत्रीयभाषायाः प्रयोगस्य सर्वप्रथमोदाहरणेषु अन्यतमः अस्ति ।

चित्रम् -1
मलयालमे विरचितः आरम्भिकः केरलस्य एकः विशिष्टाभिलेखः

सहैव चेरजनाः संस्कृतस्य परम्पराभ्यः अपि बहून् अंशान् गृहीतवन्तः। केरलस्य **मन्दिररंगमञ्चम्,** यस्यपरम्परा एतद्युगपर्यन्तम् अन्वेष्टुं शक्यते, संस्कृतस्य महाकाव्ये आधृता आसीत् । मलयालमभाषायाः प्रथमसाहित्यिककृतयः यासां कालः द्वादशशताब्दीं जनाः मन्यन्ते, प्रत्यक्षरूपेण संस्कृतस्य ऋणिन्यः वर्तन्ते । इदम् अपि किञ्चन अतीव रुचिकरं तथ्यं वर्तते यत् चतुर्दशशताब्द्याः एकः ग्रन्थः **लीलातिलकम्,** यः व्याकरणस्य तथा काव्यशास्त्रस्य च विषयसंम्बद्धः वर्तते, **मणिप्रवालम्** इत्यस्यां शैल्यां लिखितः आसीत् । मणिप्रवालस्य शाब्दिकार्थः- हीरकम्, तथा च प्रवालम् इति । यः अत्र द्वयोः भाषयोः संस्कृतक्षेत्रीयभाषयोः सहप्रयोगं प्रति संकेतं करोति ।

अन्विष्यन्तु यत् भवतः गृहे भवन्तः याः भाषाः वदन्ति, तासां लेखने सर्वप्रथमं प्रयोगः कदा जातः स्यात् ।

शासकाः तथा च धार्मिकपरम्पराः - जागन्नाथसम्प्रदायः

अन्यक्षेत्रेषु क्षेत्रीयसंस्कृतयः क्षेत्रीयधार्मिकपरम्परातः विकसिताः अभूवन् । अस्याः परम्परायाः सर्वोत्तमम् उदाहरणं वर्तते, पुरी इति । ओडिसाप्रदेशे जगन्नाथस्य सम्प्रदायः (जगन्नाथस्य शाब्दिकार्थः वर्तते, संसारस्य स्वामी यः विष्णोः पर्यायवाची अस्ति) । एतावत्कालपर्यन्तं जगन्नाथस्य काष्ठप्रतिमा स्थानीयजनजातिजनैः निर्मीयते, येन इदं तात्पर्यं भवति यत् जगन्नाथमूलतः एकः स्थानीयदेवता आसीत्, कालान्तरे तस्यैव मान्यता विष्णुरूपेण अभवत् ।

द्वादशशताब्द्यां गङ्गवंशस्य कश्चन अत्यन्तः प्रतापी राजा अनन्तवर्मनः पुर्यां पुरुषोत्तमजगन्नाथस्य कृते कस्यचित् मन्दिरस्य निर्माणार्थं निश्चयं कृतवान् । तदनन्तरं 1230 तमे राजा अनंगभङ्गतृतीयः स्वकीयं राज्यं पुरुषोत्तम-जगन्नाथाय अर्पितवान्, तथा च आत्मानं जगन्नाथस्य प्रति नियुक्तं समुदघोषयत् ।

चित्रम् -2
बलभद्र-सुभद्रा-जगन्नाथानां लघुमूर्तयःतालपत्रस्य पाण्डुलिपिः (ओडिसाप्रदेशः)

चित्रसंख्या- 3
जगन्नाथमन्दिरम्, पुरी

कालान्तरे यदा यदा इदं मन्दिरं प्रसिद्धतीर्थस्थलरूपेण विख्यातम् अभवत्, तदा सामाजिक-राजनैतिकदृष्ट्या अपि महत्त्वपूर्णम् अभवत् । येन केनापि ओडिसाप्रदेशः विजितः, यथा मुगलवंशीयेन, मराठासाम्राज्येन, ईस्ट-इण्डिया-कम्पनी इत्यनेन, सर्वे अस्मिन् मन्दिरे स्वकीयनियन्त्रण-संस्थापनार्थं प्रायतन्त । ते इदम् अनुभवं कुर्वन्ति स्म, यत् मन्दिरे नियन्त्रणे सति स्थानीयजनेषु तेषां शासनं स्वीकृतं भविष्यति ।

राजपुत्राः(राजपूत) तथा च शूरवीरतायाः परम्पराः

उनविंशशताब्द्यां ब्रिटिशजनाः तं क्षेत्रं "यत्र अद्यतनस्य राजस्थानस्य भूयान् भागः अवस्थितः अस्ति राजपूताना इति कथयन्ति स्म । एतेन एतज्ज्ञातुं शक्नुमः, यत् सः एकः एतादृशः प्रदेशः आसीत्, यत्र केवलम् अथवा प्रमुखरूपेण राजपुत्राः एव भवन्ति स्म, परन्तु इयं वार्ता आंशिकसत्यं वर्तते । एतादृशाः अनेके समूहाः आसन् (अद्यापि वर्तन्ते), उत्तरभारतस्य मध्यवर्तिभारतस्य च अनेकेषु क्षेत्रेषु ये आत्मानं राजपुत्रं मन्यन्ते । इदम् अपि सत्यं वर्तते, यत् राजस्थाने राजपुत्राणाम् अतिरिक्ताः अन्ये जनाः अपि निवसन्ति । तथापि, प्रायशः इदं मन्यते, यत् राजपुत्राः राजस्थानाय एकां विशिष्टसंस्कृतिं प्रदत्तवन्तः ।

एताः सांस्कृतिकपरम्पराः तत्रत्यानां शासकानाम् आदर्शैः सह तथा च अभिलाषाभिः सह सघनतया युक्ताः आसन् । प्रायः अष्टमशताब्द्याः आरभ्य अद्यतनराजस्थानस्य अधिकेषु भागेषु विभिन्नकुटुम्बानां राजपुत्रराज्ञां शासनम् आसीत् । पृथ्वीराजः (द्वितीयेऽध्याये) एकः एतादृशः एव शासकः आसीत् । एते शासकाः एतादृशानां शूरवीराणाम् आदर्शान् स्वहृदि संस्थापयन्ति स्म, ये वीराः रणक्षेत्रे वीरतापूर्वकं युध्यन्तः प्रायः पराजयस्य अपेक्षया मृत्योः वरणं कृतवन्तः ।



चित्रसंख्या-4,
बीकानेरस्य राजकुमार-राजसिंहः

राजपुत्रशूरवीराणां कथाः काव्येषु गीतेषु च सुरक्षितः वर्तते, इमानि गीतानि प्रायः प्रशिक्षित-चारणभटैः गीयन्ते । एतानि काव्यगीतानि एतादृशानां शूरवीराणां स्मृतिं संरक्षयन्ति, तथा च तैः काव्यगीतादिभिः आशास्यते यत् एतेन अन्ये जनाः अपि शूरवीराणाम् अनुकरणार्थं प्रेरिताः तथा च प्रोत्साहिताः भविष्यन्ति । सामान्यजनाः अपि एतया वीरगाथया आकर्षिताः भवन्ति । एतासु कथासु प्रायः नाटकीयतथ्यानां तथा च स्वामीभक्त-मित्रता-प्रेम-शौर्य-क्रोधादयः, प्रबल-संवेगानां चित्रणं भवति स्म ।

किम्, एतासु कथासु स्त्रीणाम् अपि स्थानं भवति स्म ? आम्, यदा कदा ताः स्त्रियः विवादकारणरूपेण विद्यमानाः सन्ति, यदा पुरुषाः स्त्रीणां जयार्थं तस्याः संरक्षणार्थं वा परस्परं युध्यन्ति स्म । कुत्रचित् इदमपि चित्रितं वर्तते, यत् स्त्रियः स्वकीयशूरवीरपतीनां जीविते मृते च उभयथा अनुसरणं कुर्वन्ति स्म । **सतीप्रथा** अर्थात् विधवास्त्रीभिः जीवितायां सत्याम् अपि स्वमृतकपतीनाम् अग्निचितायां स्वकीयः आत्मदाहः इत्यस्यापि उल्लेखः प्राप्यते । एतेन प्रकारेण जनाः शूरवीरतायाः आदर्शान् पालयन्ति, तैः प्रायः आदर्शार्थम् आत्मबलिः क्रियते स्म ।।

मानचित्रम् – 1 तत् क्षेत्रं यस्य विषये अस्मिन् अध्याये चर्चा कृता अस्ति ।



? जानन्तु यत् किं भवतां नगरे ग्रामे वा वीराणां वीराङ्गणानां च परम्परा आसीत् ? यदि आम्, तर्हि एताः परम्पराः राजपूतानां वीरतापूर्णादर्शैः कियन्तीं साम्यताम् अथवा भिन्नतां भजन्ते ?

क्षेत्रीयसीमान्तेभ्यः परे – कत्थकनृत्यस्य कथा

यदि शूरवीरतायाः परम्पराः विभिन्नक्षेषु विभिन्नरूपेण प्राप्तुं शक्यन्ते, तदा नृत्यस्य विषयेऽपि इदमेव सत्यं वर्तते । आगच्छन्तु, नृत्यस्य एकं रूपं **कत्थक** इत्यस्य इतिहासं पश्यामः । इयं नृत्यशैली उत्तरभारतस्य अनेकभागेषु प्रचलिता वर्तते । कत्थकशब्दः कथाशब्देन निष्पन्नः वर्तते, यस्य प्रयोगः संस्कृतादीषु भाषासु आख्यायिकायाः कृते भवति । कत्थकः मूलरूपेण उत्तरभारतस्य मन्दिरेषु आख्यायिकां वदतां जनानाम् एकः समुदायः आसीत् । एते कथाकाराः स्वकीयाभिनयसंङ्गीतैः कथां रोचयन्ति स्म । पञ्चदशशताब्द्यां तथा च षोडशशताब्द्यां भक्त्यान्दोलनस्य प्रसारेण सह कत्थकः एकस्याः विशिष्टनृत्यशैल्याः स्वरूपं लब्धवान् । राधाकृष्णयोः पौराणिकम् आख्यानं लोकनाट्यरूपेण प्रस्तुवन्ति स्म, यस्य नाम 'रासलीला' इति उच्यते । रासलीलायां लोकनृत्येन सह कत्थककथाकारस्य मूलाभिनयः अपि सम्बद्धः भवति ।

मुगलबादशाहानां तथा च तेषाम् अभिजातानां शासनकाले **कत्थकनृत्यं** राजभवने प्रस्तुवन्ति स्म, यत्र नृत्यमिदं स्वकीयं वर्तमानाऽभिलक्षणम् अर्जितवत्, तथा च तत् एकं विशिष्टशैलीरूपेण विकसितम् अभूत् । अग्रे गत्वा इदं द्विविधपरम्परायां विभक्तम् अभवत् । राजस्थानस्य जयपुरीयशैल्यां (जयपुरघराना) तथा च लक्ष्मणपुरीयशैल्यां (लखनऊ घराना) । अवधप्रान्तस्य अन्तिमशासकस्य वाजिदअलीशाहस्य संरक्षणे इदं प्रमुखकलारूपेण आगतवत् । 1850-1875 इत्यस्य मध्ये इदं नृत्यशैलीरूपेण जयपुरलक्ष्मणपुरयोः क्षेत्रे एव न अपितु अद्यतनानां पञ्जाब-हरियाणा-जम्बूकश्मीर-मध्यप्रदेशानां निकटवर्तिक्षेत्रेषु अपि दृढतया संस्थापितम् अभूत् । अस्य प्रस्तुतौ द्रुतपदसञ्चालने, उत्तमवेशभूषायाम्, तथा च कथायाः प्रस्तुतीकरणे, एवञ्च अभिनये शनैः शनैः श्रद्धाऽभूत् । अनेकविधाः सांस्कृतिकगतिविधयः इव कत्थकनृत्यम् अपि उनविंशतिशताब्द्यां तथा च विंशतिशताब्द्यां भूयांशः ब्रिटिशप्रशासकाः श्रद्धाभावं विज्ञापितवन्तः, तथापि इदं नृत्यं स्वास्तित्वं जीवयन् गणिकाभिः प्रस्तुता भवति स्म । स्वातन्त्र्योत्तरम् अस्य मान्यता षट्शास्त्रीय-नृत्यरूपेण अभूत् ।



नृत्यस्य कक्षा, लक्ष्मणमन्दिरम्, खजुराहो ।

शास्त्रीयनृत्यम्

कीदृशी कला शास्त्रीया भवेत् ? अस्य प्रश्नस्योत्तरदानं प्रायः अतीव क्लेशाय भवति। किं वयं तादृशं रूपं शैलीं वा शास्त्रीयम् इति वदामः, यस्य विषयः धार्मिकः भवेत् ? अथवा किम् एतत् शास्त्रीयम् एतदर्थं मन्यामहे, यत् यस्मिन् अत्यधिककौशलस्यावश्यकता भवति, यत् कौशलम् अनेकैः वर्षैः प्राप्यते । अथवा एतदर्थं शास्त्रीयं भवति यतोहि निर्धारितनियमस्य अनुगुणं प्रदर्शितं प्रस्तुतं च भवति, तथा च विवधतायै प्रोत्साहनं न दीयते ? एते एतादृशाः प्रश्नाः सन्ति, येषु विचारः परमावश्यकः, इदम् अपि स्मर्तव्यं वर्तते, यत् बहुषु नृत्येषु शास्त्रीयनृत्यवत् साम्यं दरीदृश्यते, तथापि तस्य स्थानं लोकनृत्येषु वर्तते। यद्यपि शास्त्रीयविशेषस्य प्रयोगः तस्याः कलारूपतायाः श्रेष्ठतायाः अभिज्ञापकं भवितुं शक्नोति, तथापि सर्वदा शब्दशः सत्यं न भवति।

अन्यानि नृत्यरूपाणि सम्प्रति एषां गणना शास्त्रीयनृत्येषु भवति, तेषां नामानि-

भरतनाट्यम् (तमिलनाडु)

कथाकली (केरलम्)

ओडिसी (उडिसा)

कुचिपुडि (आन्ध्रप्रदेशः)

मणिपुरी (मणिपुरम्)

? एतेषु कस्यचित् एकस्य नृत्यस्य विषये सम्पूर्णं ज्ञानं कुर्वन्तु।

संरक्षकेभ्यः चित्रकला- लघुचित्राणां परम्परा

एका अन्या परम्परा या विभिन्नरीतिभ्यः पुष्पिता पल्लविता च वर्तते, सा आसीत् लघुचित्राणां परम्परा। लघुचित्राणि (नाम्नैव अर्थबोधः भवति) लघ्वाकारस्य चित्राणि भवन्ति, येषां निर्माणं सामान्यतः जलयुक्तवर्णैः वस्त्रेषु अथवा कर्गदेषु भवति । प्राचीनतमलघुचित्राणि तालपत्रेषु अथवा काष्ठस्य फलकेषु चित्रितानि आसन्। एतेषु सुन्दरतमानि चित्राणि, यानि पश्चिमभारते प्राप्तजैनग्रन्थान् सचित्रीकर्तुं प्रयुक्तानि आसन्। मुगलशासकैः अकबरः, जहागीरः, शाहजहाः इत्यादिभिः अतिकुशलचित्रकारेभ्यः संरक्षणं दत्तम् आसीत्, ये प्राथमिकदृष्ट्या इतिहासानां काव्यानां च पाण्डुलिपीः चित्रयन्ति स्म। एताः पाण्डुलिपयः सामान्यतः गहनवर्णैः चित्रिताः क्रियन्ते स्म, तथा च तस्मिन् प्रासादस्य दृश्यम्, युध्यस्य तथा मृगयायाः (शिकार का) दृश्यम्, सामाजिकजीवनस्य अन्यान्यपि वस्तूनि चित्रयन्ति स्म। प्रायशः उपहाररूपेण एतेषां चित्राणाम् आदान-प्रदानं क्रियते स्म , तथा च एतानि चित्राणि राजभिः तथा च अन्तरङ्गजनैः एव द्रष्टुं शक्यन्ते स्म।

चित्रसंख्या - 7
मृगयायाः काले विश्रान्तिं कुर्वन् मुगलसम्राट् अकबरः



मुगलसाम्राज्यस्य पतनेन सह अनेके चित्रकाराः मुगलसाम्राज्यं परित्यज्य नवीनोदीयमान-क्षेत्रीय-राज्यानां साम्राज्यं गतवन्तः । परिणामस्वरूपं मुगलानां कलात्मकरुचिः दक्षिणस्य क्षेत्रीयसाम्राज्यं राजस्थानस्य राजपुत्रीय-साम्राज्यं प्रभावितं कृतवती । परन्तु एतेन सह ते स्वकीयविशिष्टतां संरक्षितवन्तः, तथा च तस्य विकासम् अपि कृतवन्तः। मुगलानाम् उदाहरणानि अनुसृत्य शासकानां तेषां राजभवनानां च चित्रणम् आरब्धम्। सहैव मेवाड-जोधपुर-बूंदी-कोटा-किशनगढ इत्यादिषु केन्द्रेषु पौराणिक-कथानां तथा च काव्यानां विषयस्य चित्रणं यथावत् चलत् आसीत्।

एतादृशम् एव एकम् अन्यद् अपि क्षेत्रम् आसीत्, आधुनिकहिमाचलप्रदेशस्य समीपं हिमालयस्य तलभूमेः (तलहटी) क्षेत्रम्।

चित्रसंख्या-8, होलीक्रीडन् महाराणारामसिंह द्वितीयः, राजपुत्रलघुचित्रम्, कोटा

सप्तदशशताब्द्याः अनन्तरेषु वर्षेषु, अस्मिन् क्षेत्रे लघुचित्रकलायाः कस्याश्चित् साहसपूर्णशैल्याः तथा च

भावप्रवण-शैल्याः विकासोऽभवत्, या **'बसोहली'** शैली इति उच्यते । अत्र लोकप्रियतमं पुस्तकं चित्रितम् आसीत् तत् च आसीत् **भानुदत्तस्य रसमञ्जरी** । 1739 तमे नादिशाहस्य आक्रमणं तथा च दिल्लीविजयस्य परिणामस्वरूपं मुगलकलाकाराः समतलक्षेत्रस्य अनिश्चितताभ्यः संरक्षणार्थं पर्वतीयक्षेत्रं प्रति पलायनं कृतवन्तः तेषां तत्र गमनानन्तरम् एव आश्रयदातारः मिलितवन्तः, फलतः चित्रकार्याः कांगडाशैली विकसिता अभूत्।

चित्रसंख्या-9 राधाकृष्णौ तथा च तयोः मित्राणि , पर्वतीयलघुचित्रम्, कागडा

अष्टादशशताब्द्याः मध्यभागपर्यन्तं कांगडायाः कलाकाराः काञ्चित् नवीनां शैलीं विकसितवन्तः, येन लघुचित्र-कारिषु नवीनप्राणाः आरोपिताः । तेषां प्रेरणायाः स्रोतः, तत्रत्या वैष्णवपरम्परा आसीत् । नील-हरित-मृदु-वर्णानां प्रयोगः तथा च विषयाणां काव्यात्मकनिरूपणं कांगडाशैल्याः विशेषता आसीत् ।

स्मरणं भवेत्, यत् सामान्यस्त्रीपुरुषाः अपि पात्रेषु, भित्तिषु, वस्त्रेषु, कुट्टिमेषु स्वकीयकलां चित्रयन्ति स्म । कलायाः एतदुदाहरणेषु कानिचन एव अवशिष्टानि भवन्ति । एतत्विपरीतं लघुचित्रं प्रासादेषु सावधानतया संरक्ष्यते स्म । येन शताब्दीः यावत् सुरक्षितानि भवेयुः ।

बङ्गप्रदेशः- समीपतः पर्यालोचनम्

एकस्याः क्षेत्रीयभाषायाः प्रभावः

यथा वयं प्रारम्भे दृष्टवन्तः, वयं प्रायशः क्षेत्रस्य नामकरणं तत्रत्यानां जनानाम् उपयुज्यमानभाषाम् आधृत्य निर्णयामः, वयम् एतत्तर्कयामः यत् तत्रत्याः निवासिनः अहर्निशं बङ्गभाषायामेव व्यवहरन्ति स्म । किन्तु इयम् एका मनोरमावार्ता वर्तते, यत् सम्प्रति संस्कृतभाषातः बङ्गभाषायाः उत्पत्तिं मन्यन्ते । प्रारम्भिक-(ई.पू. प्रथमशताब्द्याः मध्यभागस्य) संस्कृतग्रन्थानाम् अध्ययनेन ज्ञायते यत् बङ्गजनाः संस्कृतात् निष्पन्नाभिः भाषाभिः न व्यवहरन्ति स्म । पुनः तर्हि नवीनभाषायाः उत्पत्तिः कुतः अभवत् ?
ई.पू. चतुर्थ-तृतीयशताब्द्याः बङ्गालमगधयोः (आधुनिकदक्षिणविहारस्य भागः) वाणिज्यिकसम्बन्धाः स्थापिताः जायमानाः आसन्, येन कारणेन सम्भवतः संस्कृतस्य प्रभावः वर्धमानः स्यात् । चतुर्थशताब्द्यां गुप्तवंशीयशासकाः उत्तरबङ्गाले स्वकीय-राजनैतिकनियन्त्रणं स्थापितवन्तः, तथा च तत्र ब्राह्मणान् निवासितवन्तः । अनेन प्रकारेण गङ्गायाः मध्यतलस्य भाषाप्रभावः तथा च सांस्कृतिकप्रभावः प्रबलतरः अभवत्, सप्तमशताब्द्यां चीनीयात्री ह्यूनसांगः अन्विष्टवान् यत् बङ्गाले सर्वत्र संस्कृतेन सम्बद्धभाषायाः प्रयोगः आसीत् ।

अष्टमशताब्द्याः पालशासकानां संरक्षणे एकस्य क्षेत्रीयराज्यस्य उद्भवः अभवत् (द्वितीयाध्याये) । चतुर्दशषोडशशताब्द्योः मध्ये बङ्गप्रदेशे सुल्तानानां शासनम् आसीत्, ये



सर्वप्राचीनतं बङ्गालिरामायणस्य तालपत्रस्थपाण्डुलिपेः किञ्चित् पृष्ठम् ।

दिल्लीस्थितशासकेभ्यः स्वतन्त्राः आसन् (तृतीयाध्याये) । 1586 तमे यदा अकबरः एतं प्रदेशं विजितवान्, तदा तस्य नाम प्रान्तः (सूबा) अभवत् । तस्मिन् काले यद्यपि प्रशासनस्य भाषा फ़ारसी आसीत्, तथापि बङ्गभाषा क्षेत्रीयभाषारूपेण विकसिता आसीत् ।

वस्तुतः पञ्चदशशताब्दीपर्यन्तम् उपभाषा-क्षेत्रीयभाषयोः बङ्गसमूहः एकया सामान्यसाहित्यिकभाषया एकसूत्रितः अभवत् । एषा साहित्यिकभाषा तस्य क्षेत्रस्य पश्चिमभागस्य वार्तालापस्य भाषा आसीत्, यस्य वर्तमानं नाम **पश्चिमबङ्गाल** इति वर्तते । यद्यपि बङ्गभाषायाः उद्भवः संस्कृतभाषायाः एव अस्ति, परन्तु इयं स्वकीयक्रमविकासस्य अनेकसोपानतः अवतरिता वर्तते । तदतिरिक्तं संस्कृतशब्दानाम् एकः विशालः शब्दागारः वर्तते, यः जनजातीयभाषाभिः सह फ़ारसी-यूरोपीयाद्यनेकस्रोतोभ्यः संप्राप्तः वर्तते, आधुनिकबङ्गभाषायाः कश्चन भागभाग् जातः वर्तते ।

बङ्गभाषायाः प्रारम्भिकसाहित्यं द्विधा विभक्तुं शक्यते, एकः भागः संस्कृतभाषायाः ऋणी वर्तते, द्वितीयभागः स्वतन्त्रः वर्तते । प्रथमे भागे संस्कृतमहाकाव्यानाम् अनुवादः, यथा मङ्गलकाव्यम्, (अस्यार्थः माङ्गलिककार्यसम्पादनार्थं काव्यम्, यस्मिन् देवपूजनविधिः कथ्यते) तथा च भक्तिसाहित्यम् यथा –गौडीयवैष्णवान्दोलनस्य नेतुः श्रीचैतन्यदेवस्य जीवनकथाः (अष्टमाध्याये) इत्यादयः सन्ति ।

द्वितीयभागे नाथसाहित्यम् अस्ति, यथा मैनामती-गोपीचन्द्रस्य गीतम्, धर्मठाकुरस्य पूजासम्बन्धिकथाः, उपकथाः, लोककथाः गाथागीतानि च ।

मैनामती, गोपीचन्द्रः तथा च धर्मठाकुरः

नाथसम्प्रदायिनः संन्यासिनः भवन्ति स्म, ये विविधाः यौगिकक्रियाः कुर्वन्ति स्म ।
इदं गीतविशेषम्, यत् प्रायः अभिनीयते, इदं ज्ञापयति यत् राज्ञी मैनामती स्वकीयपुत्रं गोपीचन्द्रं नैकविधबाधान् अपसार्य संन्यासस्य मार्गम् अङ्गीकरणार्थं प्रोत्साहितवती ।
धर्मठाकुरः एकः लोकप्रियक्षेत्रीयदेवः वर्तते, यस्य पूजा प्रायशः पाषाणस्य अथवा काष्ठस्य मूर्तिं संस्थाप्य पूज्यते ।

प्रथमभागस्य ग्रन्थानां कालनिर्णयः सरलः वर्तते, यतोहि एतादृश्यः अनेकपाण्डुलिपयः समुपलब्धाः अभवन्, यस्मिन् इदं सङ्केतितं वर्तते यत् तस्य रचना पञ्चदशशताब्द्याः उत्तरार्धे अपि च अष्टादशशताब्द्याः मध्यभागे अभवत् । द्वितीयश्रेण्याः कृत्तीः मौखिकरूपेण कथ्यन्ते स्म श्रूयन्ते स्म च अतः तासां कालनिर्णयम् इदमित्थम् इति कर्तुं न शक्यते । ताः विशेषतया पूर्वबङ्गप्रान्ते लोकप्रियाः आसन्, यत्र ब्राह्मणानां प्रभावः कृतापेक्षया न्यूनम् आसीत् ।

पीर इति अर्थात् आध्यात्मिक-मार्गदर्शकः मन्दिराणि च

षोडशशताब्द्याः आरभ्य जनाः महत्या सङ्ख्यया पश्चिमबङ्गालस्य न्यूनानि उर्वरायुक्तक्षेत्राणि विहाय दक्षिण-पूर्वि-बङ्गालस्य वनक्षेत्रेषु पङ्कयुक्तक्षेत्रेषु प्रवासं कर्तुम् आरब्धवन्तः आसन् । यथाकालं ते पूर्वदिशां प्रति अग्रेसराः जाताः ते वनानि कर्तयित्वा तत्रत्यां भूमौ धान्यकृषिं कर्तुम् आरब्धवन्तः । शनैः शनैः स्थानीयाः मत्स्यग्राहकाः अपि च स्थानान्तरीयायाः कृषेः कर्तारः जनाः ये प्रायः जनजातीयसमुदायस्य आसन् ते कृषकाणां नूतनेषु समुदायेषु सम्मिलिताः जाताः ।

तेषु दिनेषु एव बङ्गालस्य उपरि मुगलानां नियन्त्रणं जातम् आसीत्, ये पौर्व-नदी-मुख-पुलिन-प्रदेशस्य केन्द्रियभागेषु स्थिते ढाकानगरे स्वराजधानीं स्थापितवन्तः । अधिकारिणः कर्मचारिणः च भूमिं प्राप्य तत्र प्रायः तस्यां यवनमन्दिराणां निर्माणं कुर्वन्ति स्म, यानि एतेषां क्षेत्राणां धार्मिकस्य रूपान्तरणस्य केन्द्राणां रूपेण कार्यं कुर्वन्ति स्म ।

? भवतां विचारेण द्वितीयश्रेण्यः कृतयः लिखितरूपेण किमर्थं न स्थाप्यन्ते स्म ?

प्रारम्भे बहिर्भागात् आगत्य अत्रत्याः वासिनः एतासु अस्थिरासु परिस्थितिषु वसितुं काञ्चित् व्यवस्थाम् आश्वासनं च इच्छन्ति स्म । एतानि सुखसौविध्यानि तथा आश्वासनानि तेभ्यः समुदायस्य नेतारः प्रदत्तवन्तः । एते नेतारः शिक्षकाणां निर्णायकानां च भूमिकायाः अपि कदाचित् निर्वहणं कुर्वन्ति स्म । कदाचित् एवमपि अनुमीयते स्म यत् एतेषां नेतॄणां पार्श्वे अलौकिक्यः शक्तयः सन्ति । स्नेहेन आदरेण च जनाः एतान् पीर इति कथयन्ति स्म ।

पीर

फारसीभाषायाः शब्दः अस्ति यस्य अर्थः अस्ति आध्यात्मिक-मार्गदर्शकः

अस्यां पीरश्रेण्यां साधवः अथवा सूफीजनाः अन्ये च धार्मिकाः महानुभावाः साहसिनः उपनिवेशिनः देवत्वप्राप्तसैनिकाः एवञ्च योद्धारः विभिन्नाः हिन्दुबौद्धदेवीदेवताः जीवात्मानः अपि सम्मिलिताः आसन् । पीराणां पूजापद्धतयः अतीव लोकप्रियाः अभवन् अपि च तेषां स्मारकाणि बङ्गाले सर्वत्र दृश्यन्ते ।

बङ्गाले पञ्चदशशताब्द्याः अनन्तरकालीनेषु वर्षेषु मन्दिरनिर्माणस्य कार्यं बाहुल्येन जातं यत् एकोनविंशतिशताब्द्याः अन्ते समाप्तिं गतम् । वयं दृष्टवन्तः द्वितीयाध्याये पञ्चमाध्याये च यानि मन्दिराणि अन्यानि धार्मिकाणि च भवनानि प्रायः तैः जनैः समूहैः च निर्मीयन्ते स्म ये शक्तिशालिनः जायमानाः आसन् । ते एतेषां माध्यमेन स्वशक्तेः भक्तिभावस्य च प्रदर्शनं कर्तुम् इच्छन्ति स्म । बङ्गप्रान्ते साधारणाभिः इष्टिकाभिः मृत्तिकाभिः च निर्मितानि अनेकानि मन्दिराणि निम्नसामाजिक-समूहैः यथा कालू (तैली) इत्यनेन कंसारी इत्यादिभिः (घण्टाधातोः शिल्पिनः) यत् समर्थनं कृतं तेन समर्थेन निर्मितानि आसन् । यूरोपीयेषु व्यापारिकसमूहेषु आगतेषु सति नूतनाः आर्थिकाः अवसराः उत्पन्नाः । एतैः सामाजिकसमूहैः सम्बद्धैः अनेकैः परिवारैः एतेभ्यः अवसरेभ्यः लाभः गृहीतः । यथा यथा जनानां सामाजिकार्थिकस्थितिः परिष्कृता ते एतेषां स्मारकाणां

निर्माणस्य माध्यमेन स्वस्थितेः प्रतिष्ठायाः च घोषणां कृतवन्तः । यदा स्थानीयाः देवीदेवताः ये पूर्वं ग्रामेषु पर्णकुटीरेषु पूज्यन्ते स्म तेषां देवीदेवतानां कृते ब्राह्मणाः मान्यतां प्रदत्तवन्तः । तदनन्तरं तेषां प्रतिमाः मन्दिरेषु स्थापिताः जाताः ।



जीववादः

इयं मान्यता यत् वृक्ष-पादपेषु जडवस्तुषु प्राकृतिकघटनासु च अपि जीवात्मा अस्ति ।

? अत्र प्रदत्तस्य मन्दिरस्य तु तुलनां द्वितीयाध्याये प्रदत्तेन मन्दिरेण सह कुर्वन्तु ।

11 चित्रम् (वामतः) कश्चित् पर्णकुटीरः

12 चित्रम् (दक्षिणतः) किञ्चित् चौचालामन्दिरम्



13 चित्रम्

गोपीभिः सार्धं कृष्णः, श्यामपुरमन्दिरस्य पक्वमृत्तिकायाः एका पट्टिका, विष्णुपुरम् ।

एतेषां मन्दिराणाम् आकृतिः बङ्गालस्य छदियुक्तपर्णकुटीराणां दोचाला अर्थात् छदिद्वययुक्तस्य कुटीरस्य अपि च चौचाला अर्थात् छदिचतुष्टययुक्तस्य कुटीरस्य च इव भवति स्म । पञ्चमाध्याये वर्णितं बङ्गालिमन्दिरशिखरं स्मरन्तु । यतः मन्दिराणां स्थापत्यकलायां विशिष्टबङ्गशैल्याः प्रादुर्भावः जातः । अपेक्षानुगुणम् अधिका जटिला चौचाला अर्थात् छदिचतुष्टययुक्ता, आकृत्या चतुरत्रिकोणीयछदयः भित्तिचतुष्टयेषु स्थाप्यन्ते स्म, याः उपरि तिर्यक्-रेखाम् अथवा बिन्दुं यावत् गच्छन्ति स्म । मन्दिराणि सामान्यतया एकस्मिन् वर्गाकारे मञ्चे निर्मीयन्ते स्म । तेषाम् अन्तर्भागेषु काचित् अपि सज्जा न भवति स्म, परन्तु अनेकमन्दिराणां बाह्याः भित्तयः चित्रकलाभिः अलङ्कृतपाषाणपट्टिकाभिः मृत्तिकायाः पट्टिकाभिः अलङ्कृताः भवन्ति स्म । केषुचित् मन्दिरेषु विशेषतया पश्चिमबङ्गालस्य बांकुरामण्डलस्थेषु मन्दिरेषु एतादृशं सज्जीकरणम् अत्यन्तम् उत्कृष्टकोटिं प्राप्तवत् आसीत् ।

मत्स्यः भोजनरूपेण

परम्परागताः भोजमसम्बद्धाः अभ्यासाः सामान्यतया स्थानीयरूपेण उपलभ्यमानेषु खाद्यपदार्थेषु आश्रिताः भवन्ति । बङ्गालः कश्चित् नादेयसम-क्षेत्रम् अस्ति ,यत्र मत्स्यानां धान्यस्य च उत्पादनं बाहुल्येन भवति । अतः एतत् स्वाभाविकम् अस्ति यत् एताभ्यां द्वाभ्याम् अपि वस्तुभ्यां निर्धन-बङ्गानां भोजनसूच्याम् अपि प्रमुखतया स्थानं प्राप्तम् अस्ति । मत्स्यग्रहणं तत्रत्यानां प्रमुखः व्यवसायः आद्यावधिः वर्तते अपि च बङ्गसाहित्ये मत्स्यस्य पदे पदे उल्लेखः उपलभ्यते । एतस्मात् अधिकं किं वा भवितुम् अर्हति यत् मन्दिराणां बौद्धविहाराणां च भित्तिषु याः मृण्मयाः पट्टिकाः संलग्नाः सन्ति तासु अपि मत्स्यान् स्वच्छीकुर्वन्तः अपि च तान् कण्डोलेषु पूरयित्वा आपणं प्रति नयन्तः जनाः दर्शिताः सन्ति ।

ब्राह्मणाः सामिषं भोजनं कर्तुम् अधिकारिणः न आसन् परन्तु स्थानीये आहारे मत्स्यस्य लोकप्रियतां दृष्टौ निधाय ब्राह्मणधर्मस्य विशेषज्ञैः बङ्गस्थब्राह्मणानां कृते एतस्मिन् निषेधे कामचारिता प्रदत्ता । "बृहद्धर्मपुराणम्" यत् बङ्गे रचितत्रयोदशशताब्द्याः संस्कृतग्रन्थः अस्ति अनेन ग्रन्थेन स्थानीयब्राह्मणाः विशिष्टप्रजातियुक्तान् मत्स्यान् खादितुम् आदिष्टाः ।

(14 चित्रम्) गृहस्य उपयोगाय मत्स्यान् सज्जीकुर्वत्, विशालक्ष्मीमन्दिरतः पक्वमृत्तिकायाः किञ्चित् पक्वमृण्मयफलकम्, आरामबागः इति

अन्यत्र

यूरोपे राष्ट्रराज्यानाम् उदयः

अष्टादशशताब्द्याः अन्तपर्यन्तं यूरोपीयाः जनाः आत्मानं साम्राज्यरूपेण मन्यन्ते स्म यथा आस्ट्रिया-हंगेरीसम्राज्ययोः प्रजाः अथवा कस्यचित् चर्चस्य यथा यूनानिरूढिवादिनः चर्चस्य सदस्याः मन्यन्ते स्म । परन्तु अष्टादशशताब्द्याः अन्तिमेषु दशकेषु जनाः आत्मानं एतादृशस्य समुदायस्य रूपेण अपि परिचेतुम् आरब्धवन्तः ये काश्चित् भाषां यथा फ्रेंच इत्येतां जर्मनभाषां वा वदन्ति स्म । एकोनविंशत्याः शताब्द्याः आरम्भे रोमानियायां विद्यालयीयपाठ्यपुस्तकानि ग्रीकभाषायाः स्थाने रोमानियाभाषायां लिखितानि अपि च हंगरीदेशे लैटिनभाषायाः स्थाने हंगेरियनभाष राजभाषायाः रूपेण स्वीकृता । एतया एतादृशीभिः अन्याभिः च प्रक्रियाभिः जनाः बोधिताः यत् प्रत्येकं भाषाभाषिसमुदायः पृथक् राष्ट्रम् आसीत् । एकोनविंशतिशताब्द्याः अन्तिमेषु दशकेषु इटलीजर्मन्योः एकीकरणस्य कृते जातान्दोलनैः एतस्याः भावनायाः द्राढ्यर्थम अधिकं बलं प्रदत्तम् ।

मूलशब्दाः

शास्त्रीयः

लघुचित्रम्

धर्मगुरुः

भाषा

कल्पनां कुर्वन्तु

भवान् कश्चन राजपूत-राजकुमारः वर्तते । भवान् स्वस्य कथाम् उत्तमतया केन प्रकारेण श्रावयितुम् एषिष्यति ।

पुनः स्मरन्तु

1. *निम्नलिखितान् मेलयन्तु :*

अनन्तवर्मनः	*केरलम्*
जगन्नाथः	*बङ्गालः*
महोदयपुरम्	*उडीसा*
लीला-तिलकम्	*काङ्गडा*
मङ्गलकाव्यम्	*पुरी*
लघुचित्रम्	*केरलम्*

2. *मणिप्रवालं किं वर्तते ? अस्यां भाषायां लिखितपुस्तकस्य नाम सूचयन्तु ?*
3. *कत्थकस्य प्रमुखाः संरक्षकाः के आसन् ?*
4. *बङ्गालस्य मन्दिराणां स्थापत्यकलायाः महत्त्वपूर्णं लक्षणं किं वर्तते ?*

आयान्तु विचारयामः

5. *चारण-भाटाः शूरवीराणाम् उपलब्धीनाम् उद्घोषणां किमर्थम् अकुर्वन् ?*
6. *वयं सामान्यजनानां तुलनायां शासकानां सांस्कृतिकीनां रीतीनां परम्पराणां विषये बहु अधिकं किमर्थं जानीमः ?*
7. *विजेतारः पुरीस्थितस्य जगन्नाथस्य मन्दिरे नियन्त्रणप्राप्तये प्रयत्नान् किमर्थं कृतवन्तः ?*
8. *बङ्गाले मन्दिराणि किमर्थं निर्मितानि ?*

आगच्छन्तु कृत्वा पश्यामः

9. *भवनानां प्रदर्शनकलानां चित्रकलानां विशेषसन्दर्भे स्वस्य क्षेत्रस्य संस्कृतेः सर्वाधिकमहत्त्वपूर्णानां लक्षणानां विशेषतानां वर्णनं कुर्वन्तु ।*
10. *किं भवन्तः (क) भाषणाय (ख) पठनाय (ग) लेखनाय च भिन्नानां भाषाणां*

प्रयोगं कुर्वन्ति ? एतेषु कस्याश्चित् एकस्याः भाषायाः कस्याश्चित् प्रमुखरचनायाः विषये लिखन्तु तथा च चर्चयन्तु यत् भवन्तः एतत् रुचिपूर्णम् इति किमर्थं भावयन्ति ?

11. *उत्तरात् पश्चिमात् दक्षिणात् पूर्वात् मध्यभारतात् च एकम् एकं राज्यं चिन्वन्तु । एतेषु प्रत्येकं राज्यस्य तेषां भोजनानां सूचीं कुर्वन्तु यानि सामान्यतया सर्वैः क्रियन्ते । भवन्तः तत्र किञ्चित् अन्तरं समानतां वा पश्यन्ति, तर्हि तद् विवेचयन्तु ।*
12. *एतेभ्यः प्रत्येकं क्षेत्रेभ्यः पञ्चानां पञ्चानां राज्यानां सूचीं पुनः निर्मान्तु तथा च एतत् सूचयन्तु यत् प्रत्येकस्मिन् राज्ये महिलाभिः तथा च पुरुषैः सामान्यतया कानि वस्त्राणि धृतानि सन्ति । स्वस्य निष्कर्षेषु चर्चयन्तु ।*

10 अष्टादश-शताब्द्यां नवीना राजनैतिकरचना

यदि भवन्तः प्रथमं मानचित्रं तथा च द्वितीयं मानचित्रम् अवधानेन द्रक्ष्यन्ति तर्हि भवन्तः ज्ञास्यन्ति यत् अष्टादशस्य शताब्दस्य पूर्वार्द्धकाले उपमहाद्वीपेषु काश्चन विशेषरूपेण उल्लेखनीयाः घटनाः जाताः । अवधानं कुर्वन्तु यत् अनेकेषां स्वतन्त्राणां राज्यानाम् उदयेन मुगलसाम्राज्यस्य सीमाः केन प्रकारेण परिवर्तिताः । भवन्तः एतत् अपि पश्यन्तु यत् 1765 पर्यन्तं कयाचित् अन्यया सत्तया अर्थात् ब्रिटिशसत्तया पूर्व-भारतस्य विशालतमाः भागाः सफलतापूर्वकं निग्रहिताः। एतानि मानचित्राणि अस्मान् सूचयन्ति यत् अष्टादशशताब्द्याः अवधिः कश्चन एतादृशः अवधिः आसीत्, यदा भारते राजनैतिकीनां परिस्थितीनां लघौ समयान्तराले सहसा एव परिवर्तनम् आरभत । अस्मिन् अध्याये वयम् अष्टादश-शताब्द्याः पूर्वार्द्धकाले (स्थूलतया 1707 तमे वर्षे यदा औरङ्गजेबस्य मृत्युः अभवत्, ततः 1761 पर्यन्तम्, यदा पानीपतस्य तृतीयं युद्धं जातम्) उपमहाद्वीपे उत्पन्नानां नूतन-राजनैतिकीनां शक्तीनां विषये पठिष्यामः ।

मानचित्रम् -1

अष्टादशे शताब्दे नूतनानां राज्यानां रचना



मानचित्रम् -2

अष्टादश-शताब्द्याः मध्यकाले ब्रिटिशक्षेत्रम्

मुगल-साम्राज्याय परवर्तिनां मुगलानां कृते च सङ्कटस्य स्थितिः

चतुर्थे अध्याये अस्माभिः दृष्टं यत् मुगलसाम्राज्यं स्वस्य सफलतायाः औन्नत्यं केन प्रकारेण प्राप्तवान् । तथा च सप्तदशशताब्द्याः अन्तिमेषु वर्षेषु तस्य समक्षे विविधप्रकारकाणि सङ्कटानि उत्पन्नानि अभवन् । एवम् अनेकैः कारणैः अभवत् । बादशाहेन औरङ्गजेबेन दक्कने (1679 तः) दीर्घं युद्धं कुर्वन् साम्राज्यस्य सैन्यानां तथा च वित्तीय-संसाधनानाम् अत्यधिकः व्ययः कृतः आसीत् ।

औरङ्गजैबस्य उत्तराधिकारिणां शासनकाले साम्राज्यस्य प्रशासनस्य कार्यकुशलतायाः समाप्तेः आरम्भः अभवत् । पदवीधारिणां शक्तिशालिवर्गाणां नियन्त्रणस्य संरक्षणं केन्द्रीयायाः सत्तायाः कृते कठिनम् अभवत् । प्रान्ताधिपतिरूपेण नियुक्तः अभिजातः प्रायेण राजस्वं सैन्यप्रशासनं च उभयकार्यालयौ नियन्त्रयति स्म । अनेन ते मुगलसाम्राज्यस्य विशालक्षेत्रेषु विस्तृताः राजनैतिकीः आर्थिकीः सैन्यशक्तीः च प्राप्तवन्तः । यथा यथा प्रान्ताधिपतयः प्रान्तेषु स्वीयं नियन्त्रणं सुदृढं कृतवन्तः तथा तथा राजधान्यां प्राप्तवतः राजस्वस्य मात्रायां न्यूनता आरब्धा ।

चतुर्थे अध्याये प्रथमाम् अनुक्रमणिकां पश्यन्तु । औरङ्गजेबस्य शासनकाले कैः कैः जनैः मुगलसत्तायाः कृते दीर्घं कालं यावत् आह्वानानि प्रदत्तानि ।

उत्तरभारतस्य पश्चिमभारतस्य च अनेकेषु भागेषु भूस्वामिनां कृषकाणां विद्रोहाः आन्दोलनानि च एतासां समस्यानां गभीरीकरणम् अकुर्वन् । यदा कदाचित् एते विद्रोहाः वर्धमानानां करभाराणां विरुद्धम् अपि कृताः आसन् तथा च कदाचित् एते शक्तिशालिनां सरदाराणां स्वस्य स्थितेः सुदृढीकरणाय प्रयत्नाः आसन् । अतीते अपि विद्रोहिसमूहेन मुगलसत्तायै आह्वानानि प्रदत्तानि । परन्तु अधुना ईदृशैः समूहैः क्षेत्रस्य आर्थिकानां संसाधनानां प्रयोगः स्वस्य स्थितीनां सुदृढतायै कृतम् । येन प्रकारेण शनैः शनैः राजनैतिकी आर्थिकी च सत्ता प्रान्तीयानां प्रान्ताधिपतीनां स्थानीयानां सरदाराणाम् अथवा समूहानां हस्तयोः आगच्छन्ती आसीत्, औरङ्गजेबस्य उत्तराधिकारिणः एतं परिवर्तनम् अवरोद्धुं न शक्तवन्तः ।

मानचित्रम् -2

अष्टादश-शताब्द्याः मध्यकाले ब्रिटिशक्षेत्रम्

सम्पूर्णं सस्यं रिक्ताः धनपेटिकाः

केनापि तत्कालीनेन लेखकेन साम्राज्यस्य वित्तीय-परिक्षीणस्य वर्णनम् एतेषु शब्देषु कृतं वर्तते।

श्रेष्ठाः भूस्वामिनः निस्सहायाः निर्धनाः च अभवन् । तेषां कृषकाः वर्षे सस्यद्वयम् उत्पादयन्ति, परन्तु ते उभयोरपि किमपि न प्राप्नोति । तेषां स्थानीयाः प्रतिनिधयः एकप्रकारेण कृषकाणां काष्ठपुत्तलिका एव तिष्ठन्ति । यथा स्वयं कृषकः स्वस्य ऋणदातुः वशीभूतः भवति । यावत् पर्यन्तं सः सार्थिकस्य ऋणं न प्रत्यर्पयति एवं प्रकारेण सम्पूर्णं प्रशासनं तथा च व्यवस्था एतावत् अव्यवस्थितं जातं वर्तते यत् यद्यपि कृषकः स्वकीयेन सस्येन मन्ये सुवर्णं संगृह्णन् स्यात् परन्तु तस्य स्वामी अर्थात् भूस्वामी तृणमात्रम् अपि न प्राप्नोति । ईदृश्यां स्थितौ भूस्वामिनः सशस्त्रसैन्यं कथं स्थापयितुं शक्नुवन्ति, येषां तेभ्यः आशा भवति ? ते स्वस्य सैनिकान् ये युद्धकाले तेषाम् अग्रतः चलन्ति तथा च अश्ववाहकान् ये तेषां साक्षात् पृष्टतः प्रचलन्ति धनं कुतः दास्यन्ति ?

अस्मिन् आर्थिके राजनैतिके च सङ्कटस्य अवधौ ईरानस्य शासकः नादीरशाहः 1739 तमे वर्षे देहल्याम् आक्रमणम् कृतवान् तथा च सम्पूर्णनगरं विलुण्ठ्य बृहन्मात्रायां धनादिकं नीतवन्तः । नादीरशाहस्य आक्रमणस्य अनन्तरम् अफगान-शासक-अहमदशाह-अब्दालिनः आक्रमणानां पङ्क्तिः एव प्रचलिता आसीत् । सः शासकः तु 1748 तः 1761 पर्यन्तं मध्ये पञ्चवारम् आक्रमणम् अकरोत् तथा च विलुण्ठनं बाहुल्येन अकरोत् ।

देहल्यां नादिरशाहस्य आक्रमणम्

नादिरशाहस्य आक्रमणस्य परिणामतः देहल्यां यः विध्वंसः अभवत्, तस्य वर्णनं समकालीनाः प्रेक्षकाः अकुर्वन् । एतेषु केनचित् मुगलकोषात् धनलुण्ठनं विहितम् आसीत् तस्य वर्णनम् एवं प्रकारेण कृतम् अस्ति - सः षष्टिलक्षरूप्यकाणि सहस्रशः स्वर्णनाणकानि प्रायेण कोटिरूप्यकाणां स्वर्णपात्राणि, पञ्चाशतः कोटिरूप्यकाणाम् आभूषणानि, अन्यानि वस्तूनि च अनयत् । येषु कानिचन तु वस्तूनि एतावन्ति मूल्यवन्ति आसन् यत् विश्वे तत्सदृशः वस्तु न किञ्चित् अपरम् आसीत् । यथा तख्ते हाउस अर्थात् मयूरसिंहासनम् इति ।

अन्यस्मिन् कस्मिंश्चित् वृतान्ते देहल्याम् आक्रमणस्य प्रभावस्य वर्णनं प्राप्यते -

ये कदाचित् स्वामिनः आसन्, अधुना महत्यां दयनीयस्थितौ आसन् । येषां कस्मिंश्चित् काले महान् आदरः यशः च आसीत्, ते अद्य पेयजलम् अपि न प्राप्नुवन्ति स्म । पृथक्तया विद्यमानाः जनाः तेषां कोणेभ्यः आकृष्य बहिः निष्कासिताः । धनिकाः भिक्षुकाः कृताः । ये शृङ्गारप्रियाः जनाः आसन् विविधप्रकारकाणि वस्त्राणि धृत्वा नव्यतां रीतिं वा चालयन्ति स्म ते अधुना नग्नभ्रमणम् आरब्धवन्तः आसन् । तथा च येषां समीपे भूमेः सम्पत्तेः च न्यूनता न आसीत् ते अधुना गृहहीनाः जाताः आसन्...नवीनं नगरम् (शाहजहाँनाबाद) अधुना मृत्तिकाराशिः अभवत् । नादिरशाहेन तदा नगरस्य पुरातनेषु प्रासादेषु आक्रमणं कृतं तथा च तत्रत्यं सम्पूर्णं संसारम् आमूलं नाशितम्.....।

चित्रम् - 1
नादिरशाहस्य 1779 तमस्य एकं चित्रम्

साम्राज्ये सर्वतः अतिभारः तु जायमानः एव आसीत्, अभिजातानां विभिन्नसमूहानां पारस्परिकी प्रतिद्वन्द्विता तम् इतोऽपि दुर्बलम् अकरोत् । एते अभिजाताः विशाल-समूहद्वये विभक्ताः आसन् – ईरानीसमूहः तूरानीसमूहः (तुर्कमूलस्य) । दीर्घकालं यावत् परवर्ती गुगलभूपतिः एषु एकस्य अथवा अपरस्य हस्तस्य काष्ठपुत्तलिकाः एव अतिष्ठन् । अतीव

चित्रम् – 2

अभिजातस्य सभायां स्वागतं कुर्वन् फर्रूखसियरः

अपमानजनिका स्थितिः तदा उत्पन्ना अभवत्, यदा द्वयोः मुगलभूपत्योः फर्रूखसियरस्य तथा च आलमगीरद्वितीयस्य (1754-1759) हत्या अभवत् तथा च अन्यं भूपतिद्वयम् अहमदशाहं (1748-1754) तथा च शाह-आलम-द्वितीयं तयोः अभिजाताः काणम् अकुर्वन्।

नवीन-राज्यानाम् उदयः

मुगल-सम्राजां सत्तायाः पतनेन सह बृहतां प्रान्तानां प्रान्ताधिपतयः भूस्वामिनः च उपमहाद्वीपस्य विभिन्नभागेषु स्वस्य शक्तीः अधिकां प्रबलाम् अकुर्वन्। अष्टादशशताब्दस्य काले मुगलसाम्राज्यं शनैः शनैः अनेकेषु स्वतन्त्रेषु क्षेत्रीयराज्येषु विकीर्णम् आसीत्। स्थूलतया अष्टादश-शताब्दस्य राज्यानि त्रिषु परस्पर-व्यापिसमूहेषु विभक्तुं शक्यन्ये – (1) अत्र अवध-बङ्गाल-हैदराबादसदृशानि च तानि राज्यानि यानि पूर्वं मुगलप्रान्ते आसन्। यद्यपि एतेषां राज्यानां शासकाः अधिकाः शक्तिशालिनः आसन् तथा च अधिकतया स्वतन्त्राः आसन्। ते मुगलभूपतिना सह स्वीयान् औपचारिकान् सम्बन्धान् असमीचीनान् न अकुर्वन्। (2) एतादृशानि राज्यानि यानि मुग्लानां पुरातन-शासनकाले देशस्य अग्रहारिरूपेण स्वतन्त्राः आसन्। एतेषु केचन राजपूतप्रदेशाः अपि सम्मिलिताः आसन् तथा च (3) तृतीयायां श्रेण्यां मराठानां सिक्खानां राजपूतानां च प्रदेशाः आयान्ति स्म। एते विभिन्नानाम् आकाराणाम् आसन् तथा च एतैः कठोरस्य तथा च दीर्घकालिकस्य सशस्त्र-सङ्घर्षस्य अनन्तरं मुगलेभ्यः स्वातन्त्र्यं बलात् आहृतम् आसीत्।

पुरातन-मुगल-प्रान्ताः

पुरातनेभ्यः मुगलप्रान्तेभ्यः येषाम् उत्तराधिकारिणां राज्यानाम् उद्भवः अभवत्, तेषु त्रीणि राज्यानि प्रमुखाणि आसन्। अवध-बङ्गाल-हैदराबादाः च। एतानि त्रीणि एव राज्यानि उच्चैः मुगल-अभिजातैः स्थापिताः आसन्। एतेषां त्रयाणां राज्यानां संस्थापकाः सआदतखानः (अवधतः) मुर्शीद-कुलीखानः (बङ्गालतः), तथा च आसफजाहः (हैदराबादतः) एतादृशाः जनाः आसन्, येषां मुगलराजसभायाम् उच्चस्थानम् आसीत्। मुगलभूपतीनां तेषु विश्वासः आसीत्। आसफजाहः तथा च मुर्शीद-कुली-खानः, अनयोः द्वयोः कृते सप्तसहस्रस्य रूप्यकाणां स्थानं प्राप्तम् आसीत्। यद्यपि सादतखानस्य जात्याः स्थानं षट्सहस्रम् आसीत्।

हैदराबादः

निजाम-उल-मुल्क-आसफ-जाहः यः हैदराबादराज्यस्य स्थापनाम् अकरोत्, मुगल-भूपति-फर्रूखसियरस्य राजसभायाः अत्यन्तं शक्तिशाली सदस्यः आसीत् । तस्मै सर्वप्रथमम् अवधप्रान्तस्य प्रान्ताधिपत्यं प्रदत्तम् आसीत् तत्पश्चात् दक्कनस्य कार्यभारः प्रदत्तः आसीत् । 1720-22 मध्ये एव दक्कनप्रान्तानां प्रान्ताधिपत्य-कारणात् आसफ़जाहस्य पार्श्वे पूर्वम् एव राजनैतिकस्य तथा च वित्तीयप्रशासनस्य पूर्णं नियन्त्रणम् आसीत् । दक्कने भूयमानानाम् उपद्रवाणां तथा च मुगलराजसभायां प्रचल्यमानायाः प्रतिस्पर्धायाः लाभं स्वीकृत्य सः सत्ताम् अधिकृत्य तस्य क्षेत्रस्य वास्तविकः शासकः अभवत्।

आसफ़जाहः स्वस्मै कुशलसैनिकान् तथा च प्रशासकान् उत्तरीभारतात् आनीतवान् आसीत् तथा च ते दक्षिणे नूतनान् अवसरान् प्राप्य प्रसन्नाः आसन्। सः अधिकारिणां नियुक्तिम् अकरोत् तथा च तेभ्यः भूमिं प्रायच्छत्। यद्यपि असौ अधुना अपि मुगलसम्राजः सेवकः आसीत् तथा अपि सः महता स्वातन्त्र्येण शासनं चालयति स्म । न तु सः देहलीतः कञ्चन निर्देशं स्वीकरोति स्म । तथा च न अपि देहली तस्य कार्येषु किञ्चन व्यवधानं जनयति स्म । मुगलभूपतिः तु केवलं निजाम-उल-मुल्क-आसफ-जाहद्वारा पूर्वतः एव स्वीकृतनिर्णयानां पुष्टिं कुर्वन्ति स्म।

हैदराबाद-राज्यं पश्चिमदिशि मराठानां विरुद्धं तथा च पठारीक्षेत्राणां स्वतन्त्र-तेलगु-सेनानायकैः सह युद्धकरणे सर्वदा संलग्नः तिष्ठति स्म। पूर्वदिशायां निजाम-उल-मुल्क-आसफ-जाहः कोरोमण्डलतटे स्थिते वस्त्रोत्पादके धनसम्पन्नक्षेत्रे स्वीयं नियन्त्रणं प्राप्तुं महत्त्वाकाङ्क्षां स्थापयति स्म । परन्तु तस्य महत्त्वाकाङ्क्षायां तस्मिन् क्षेत्रे ब्रिटिशशक्त्याः उपस्थितिकारणेन अवरोधः जातः।

निजामसैन्यम्

हैदराबादस्य निजामस्य निजीसैनिकानां वर्णनम् (1970) :

निजामस्य पार्श्वे 400 गजानाम् आरोहिका अस्ति। तस्य पार्श्वे अनेके अश्वारोहिणः आसन्। एतेषाम् अत्यन्तं कुशलानां तथा च अतिसुन्दराणाम् अलङ्कृतानां अश्वारोहिणां साङ्केतिकं वेतनं शतात् अपि अधिकानि रूप्यकाणि वर्तन्ते.....

अवधम्

बुरहान-उल-मुल्क-सआदत-खानः 1722 तमे वर्षे अवधस्य प्रान्ताधिपतिः नियुक्तः कृतः आसीत् । मुगलसाम्राज्यस्य विघटनेन यानि राज्यानि निर्मितानि जातानि, तेषु एतत् राज्यं सर्वाधिकमहत्त्वपूर्णेषु राज्येषु अन्यतमम् आसीत्। अवधः समृद्धिशाली प्रदेशः आसीत्। यः गङ्गानद्याः उर्वरापूर्णेषु क्षेत्रेषु विस्तीर्णः आसीत्। तथा च उत्तरीभारतस्य तथा च बङ्गालस्य

मध्ये व्यापारस्य मुख्यमार्गः ततः भूत्वा एव गच्छति स्म । बुरहान-उल-मुल्कः अपि अवधस्य प्रान्ताधिपत्यं, दीवानीं सैन्यं च सहैव स्वाधीनम् अकरोत् । तथा च प्रान्तस्य राजनैतिकानां वित्तीयानां सैनिकानां च विषयाणां एकमात्रं प्रमुखः जातः आसीत् ।

स्वीयराज्यस्य सुदृढकरणस्य प्रयत्नेषु मुगल-भूपतिः राजसभाकार्यालये अपि किमर्थं नियन्त्रणं संस्थापयितुम् इच्छन्ति स्म ?

चित्रम् – 3
बुरहान-उल-मुल्कः

बुरहान-उल-मुल्कः अवधक्षेत्रे मुगलप्रभावं न्यूनीकर्तुं क्रियमाणानां प्रयत्नानां काले मुग्लैः नियुक्तानाम् अधिकारिणां सङ्ख्यायां न्यूनता कृता । तेन भूसम्पत्तेः आकारे अपि न्यूनता कृता । तथा च रिक्तस्थानेषु स्वस्य निष्ठावान् सेवकाः नियोजिताः । विश्वासघातं निरोद्धुं भूसम्पत्तीनाम् अधिकारिणाम् अभिलेखानां लेखानां च निरीक्षणं कृतं तथा च नवाबस्य राजसभया नियुक्तैः अधिकारिभिः सर्वेषां जनपदानां राजस्वस्य पुनः निर्धारणं कृतम् । तैः अनेकराजपूतानां भूस्वामिनां रुहेलखण्डस्य अफगानाम् उर्वराकृषिभूमेः स्वराज्ये मेलनं कृतम् ।

राज्यं ऋणं प्राप्तुं स्थानीयानां धनाढ्यानां श्रेष्ठिनां महाजनानां च उपरि आश्रितः तिष्ठति स्म । राज्यस्य राजस्वस्य च पणः सर्वाधिकाय मूल्यप्रदात्रे पणकर्त्रे प्रदीयते स्म । पणकर्ता राज्याय किञ्चन सुनिश्चित-मूल्यस्य प्रदानस्य वचनं प्रयच्छति स्म । स्थानीयाः श्रेष्ठिनः राज्यस्य पणस्य अस्य मूल्यप्रदानस्य प्रामाणिकतां प्रयच्छन्ति स्म । अपरस्मिन् पक्षे पणकर्तृभ्यः करस्य मूल्याङ्कनाय तथा च तम् एकत्रीकरणाय पर्याप्तमात्रायाम् अपकर्षः प्रदीयते स्म । एतेषां परिवर्तनानां परिणामतः पणकर्तृसदृशाः महाजनसदृशाः च अनेके नवीन-सामाजिक-समूहराज्यस्य राजस्वप्रणाल्याः प्रबन्धं प्रभावितं कर्तुं प्रारम्भम् अकुर्वन् । पूर्वम् एतादृशं कदापि न अभवत् ।

बङ्गालः

मुर्शीद-कुली-खानस्य नेतृत्वे बङ्गालः शनैः शनैः मुगलनियन्त्रणात् पृथक् अभवत् । मुर्शीद-कुली-खानः बङ्गालस्य सहायकः आसीत् । अर्थात् प्रान्तस्य प्रान्ताधिपतेः प्रतिनियुक्तः आसीत् । यद्यपि मुर्शीद-कुली-खानः औपचारिकरूपेण प्रान्ताधिपतिः कदापि न अभवत् । तेन शीघ्रम् एव प्रान्ताधिपतेः पदेन सम्बद्धा सर्वा अपि सत्ता स्वहस्ते अधीनीकृता । हैदराबादस्य तथा च अवधशासकस्य च शासकः इव सः अपि राज्यस्य

राजस्वप्रशासने स्वीयं नियन्त्रणम् अस्थापयत् । बङ्गाले मुगलप्रभावं न्यूनं कर्तुं तेन बङ्गालस्य राजस्वस्य बृहत्तरे मानके पुनर्निर्धारणं कर्तुम् आदेशः प्रदत्तः । सर्वेभ्यः भूपतिभ्यः कठोरतापूर्वकं राजस्वं रोकधनरूपेण स्वीक्रियते स्म । परिणामतः बहुभिः भूपतिभिः महाजनेभ्यः पणकर्तृभ्यः च ऋणरूपेण धनं स्वीकरणीयं भवति स्म । ये जनाः राजस्वस्य प्रदानं कर्तुं न शक्नुवन्ति स्म तैः विवशीभूय स्वभूमेः विक्रयणं भूपितभ्यः करणीयं भवति स्म ।

एवं प्रकारेण अष्टादश शताब्द्यां बङ्गालं क्षेत्रीयराज्यम् अभवत् इति कारणेन भूस्वामिषु महत् परिवर्तनं जातम् । राज्यस्य तथा च पणकर्तृणां मध्ये हैदराबादे तथा च अवधे यः घनिष्ठः सम्बन्धः आसीत्, सः अलीवर्दी-खानस्य शासनकाले (1740-1756) बङ्गाले अपि स्पष्टतया दृष्टः । तस्य शासनकाले जगतश्रेष्ठिनः पणकर्तुः गृहम् अत्यन्तं समृद्धशालि अभवत् ।

चित्रम् – 4

अलीवर्दी-खानस्य राजसभा

यदि वयम् एतेषां राज्यानाम् अभिलक्षणेषु विहङ्गम-दृष्टिं कुर्मः, तर्हि वयं तेषु काश्चन सामान्यविशेषताः द्रक्ष्यामः । प्रथमं तु यद्यपि विशालराज्यानि पुरातनमुगलैः अभिजातैः स्थापिताः सन्ति, एते अभिजाताः काञ्चित् प्रशासनिकीं व्यवस्थां प्रति सन्देहास्पदाः आसन् । याः तेभ्यः उत्तराधिकाररूपेण प्राप्ताः आसन् । विशेषतः ते भूसम्पत्ति-व्यवस्थाम् अत्यन्तं सन्देहदृष्ट्या पश्यन्ति स्म । द्वितीयं तेषां करप्राप्तकरणस्य शैली मुगलेभ्यः भिन्ना आसीत् । करसङ्ग्रहाय राज्यस्य अधिकारिषु आश्रितो न भूत्वा त्रिभिः राज्यैः हैदराबादेन अवधेन बङ्गालेन च सह राजस्वं स्वीकर्तुं पणकर्तृभिः सह पणाः कृताः। पणप्रथा या मुगलैः पूर्णतया अस्वीकृता आसीत्, अष्टादशे शताब्दे समग्रे अपि भारते प्रसृता अभवत् ।

तथापि ग्रामस्य तस्य प्रभावे विभिन्नता आसीत् । एतेषु सर्वेषु क्षेत्रीयराज्येषु तृतीयं सामान्यं लक्षणम् एतत् आसीत् यत् तेषु राज्येषु धनिकेषु महाजनेषु वणिजेषु च परस्परं सम्बन्धाः प्रारब्धाः । एते पणकर्तारः महाजनाः शस्यशुल्कं स्वीकर्तृभ्यः पणकर्तृभ्यः ऋणरूपेण धनं प्रयच्छन्ति स्म । विनिमयरूपेण प्रतिभूतिरूपेण भूमिम् अथवा बन्धकरूपेण भूमिं स्थापयन्ति स्म । तथा च तेषां जोत इत्यनेन कर्मचारिणां साहाय्येन करस्वीकरणं कुर्वन्ति स्म । एवं प्रकारेण समस्ते भारते धनाढ्यानां पणकर्तृणां महाजनानां च अस्यां नवीनायां राजनैतिक्यां व्यवस्थायां भागधरता वर्धमाना आसीत् ।

राजपूतानां वतन-भूसम्पत्तिः

बहवः राजपूतवंशीया विशेषेण अम्बरस्य जोधपुरस्य च राजवंशीयाः मुगलव्यवस्थायां विशेषतया मिलित्वा एव सेवारताः आसन् । विनिमयरूपेण तेभ्यः स्वस्य वेतन-भूसम्पत्तौ पर्याप्ततया स्वायत्ततायाः आनन्दं स्वीकर्तुम् अनुमतिः प्राप्ता आसीत् । अधुना अष्टादशशताब्द्याम् एते शासकाः स्वस्य समीपस्थ-क्षेत्रेषु स्वस्य नियन्त्रणस्य विस्तारकरणाय हस्तपादचालनम् आरब्धवन्तः । जोधपुरस्य राजा अजीतसिंहः अपि मुगलराजसभायाः समूहराजनीतौ स्वस्य स्थानं सम्यक् अकरोत् ।

एते प्रभावशालिनः राजपूतवंशीयाः गुजरातस्य मालवायाः च लाभप्रदानां प्रान्ताधिपतीनां प्रस्तावं प्रदत्तवन्तः। जोधपुरस्य राजा अजीतसिंहः गुजरातस्य प्रान्ताधिपतिः तथा च अम्बरस्य सवायी-राजा-जयसिंहः मालवायाः प्रान्ताधिपतिः अभवत् । भूपतिः जहान्दारशाहः 1713 तमे वर्षे एतेषां राज्ञाम् एतेषां पदानां च नवीनीकरणम् अकरोत् । तैः स्वस्य देशानां समीपस्थ-शाहीक्षेत्राणां केषाञ्चित् भागानाम् अधिग्रहणस्य प्रयासाः कृताः । जोधपुरस्य राजवंशीयाः नागौरं जितवन्तः तथा च स्वस्य राज्ये मेलितवन्तः। सवाई-राजा जयसिंहः जयपुरे स्वस्य नूतनां राजधानीम् अस्थापयत् । तथा च तेनतस्मै 1722 तमे वर्षे आगरायाः प्रान्ताधिपतिपदं प्रदत्तम् । 1740 तमे दशके राजस्थाने मराठानाम् अभियानम् एतेषां देशीयराज्यानाम् उपरि महत् अतिभारस्थापनस्य आरम्भम् अकरोत् । येन एतेषां विस्तारः ततः परं न अभवत् ।

जयपुरस्य राजा जयसिंहः

1732 तमे वर्षे एकस्मिन् फारसीवृतान्ते राज्ञः जयसिंहस्य वर्णनम्

राजाजयसिंहः स्वस्य सत्तायाः पूर्णसीमायाम् आसीत् । द्वादशवर्षाणि सः आगरायाः प्रान्ताधिपतिपदे आसीत् तथा च पञ्चवर्षाणि अथवा षड्वर्षाणि यावत् मालवायाः। तेषां पार्श्वे विशाला सेना अग्न्यस्त्राणि अधिकमात्रायां च धनसम्पद् आसीत् । तस्य प्रभावः देहल्याः आरभ्य नर्मदातटं यावत् विस्तीर्णः आसीत् ।

चित्रम् – 5

मेहरानगढम्
किला, जोधपुरम्

स्वातन्त्र्य-प्राप्तिः

सिक्खाः

अष्टमे अध्याये भवद्भिः पठितं यत् सप्तदशशताब्द्याः अवधौ सिक्खाः केनचित् राजनैतिक-समुदायरूपेण गठिताः अभवन् । अनेन पञ्जाबस्य क्षेत्रीय-राज्यनिर्माणेन वर्धनावसरः प्राप्तः । गुरुगोविन्दसिंहः 1699 तमे खालसापन्थस्य स्थापनायाः पूर्वं तथा च तस्य अनन्तरं राजपूतानां मुगलशासकानां च विरुद्धं युद्धम् अकरोत् । 1708 तमे वर्षे गुरुगोविन्दसिंहस्य मृत्योः अनन्तरं बन्दाबहादुरस्य नेतृत्वे खालसा मुगलसत्तायाः विरुद्धं विद्रोहम् अकरोत् । सः बाबागुरुनानकस्य तथा च गुरुगोविन्दसिंहस्य नाम्नां नाणकानि रचयित्वा स्वस्य शासनं सार्वभौमम् इति असूचयत् । सतलुजनद्याः यमुनानद्याः च मध्ये क्षेत्रे तैः स्वस्य प्रशासनस्य व्यवस्था कृता । 1715 तमे वर्षे बन्दाबहादुरस्य बन्धनं कृतं तथा च 1716 तमे वर्षे तस्य मारणं कृतम् ।

अष्टादशशताब्द्यां बहुषु योग्यनेतृत्वेषु सिक्खाः आत्मानं प्रथमतया 'समूहेषु' तथा च अनन्तरं 'समानतायां' सङ्घटितान् अकुर्वन्। एतेषां समूहानां समानतायाः च संयुक्तसेना 'दलखालसा' इति कथ्यते स्म । तेषु दिनेषु दलखालसा वैशाखीपर्वसु तथा च दीपावलीपर्वसु अमृतसरे मिलति स्म। एतेषु उपवेशनेषु ते सामूहिकं निर्णयं स्वीकुर्वन्ति स्म। यः निर्णयः'गुरुमतम् (गुरोः प्रस्तावः)' इति कथ्यते स्म । सिक्खाः रक्षासूत्रव्यवस्थाम् अस्थापयन्।

खालसा इत्यनेन कः अभिप्रायः वर्तते ? किं भवन्तः स्मरन्ति यत् अस्मिन् विषये अष्टमे अध्याये भवद्भिः किं पठितम् ?

यस्य अन्तर्गतं कृषकाः तेषाम् उत्पादनस्य 20 प्रतिशतं कररूपेण स्वीकृत्य विनिमये तान् संरक्षणं प्रयच्छन्ति स्म।

गुरुगोविन्दसिंहः खालसाम् अप्रेरयत् यत् शासनं तेषां भाग्ये वर्तते (शासनं करिष्यति खालसा)। स्वस्य सुनियोजितस्य सङ्घटनस्य कारणेन खालसा प्रथमं मुग्लानां प्रान्ताधिपतीनां विरुद्धं तथा च पुनः अहमदशाह-अब्दालिनः विरुद्धं सफलं विरोधं प्रकटयितुम् अशकत । (अहमदशाह-अब्दाली मुग्लेभ्यः पञ्जाबस्य समृद्धं प्रान्तं तथा च सरहिन्दस्य सर्वकारं स्वाधीनम् अकरोत्) । खालसा 1765 तमे स्वस्य नाम्नां नाणकानि रचयित्वा सार्वभौमशासनस्य घोषणाम् अकारयत्। एतत् महत्त्वपूर्णं यत् नाणकेषु उत्कीर्णाः शब्दाः ते एव आसन्, ये बन्दाबहादुरस्य काले खालसायाः आदेशेषु प्राप्यन्ते।

अष्टादशशताब्द्याः अन्तिमभागे सिक्खक्षेत्राणि सिन्धोः यमुनापर्यन्तं विस्तीर्णानि आसन्। यद्यपि एतानि विभिन्नेषु शासकेषु विभक्तानि आसन् । एतेषु अन्यतमः महाराजः रणजीतसिंहः विभिन्न-सिक्खसमूहेषु पुनः ऐक्यं संस्थाप्य 1799 तमे वर्षे लाहौरं स्वस्य राजधानीम् अकरोत्।

चित्रम् 6

दशमगुरुः गुरुगोविन्दसिंहः



मराठा

मराठाराज्यं किञ्चन अन्यत् शक्तिशालि राज्यम् आसीत् । यत् मुगलशासनस्य निरन्तरं विरोधं कृत्वा उत्पन्नं जातम् आसीत् । शिवाजी (1627-1680) शक्तिशाली योद्धृपरिवाराणां साहाय्येन कस्यचित् स्थायिशक्तिशालिनः राज्यस्य स्थापनाम् अकरोत् । अत्यन्तं गतिशीलाः कृषकाः पशुचारकाः (कुनबी) मराठाणां सेनायाः मुख्याः आधाराः अभवन् । शिवाजीः प्रायद्वीपे मुगलेभ्यः आह्वानं प्रदातुम् अस्य सैन्यबलस्य प्रयोगम् अकरोत् । शिवाजिमहाराजस्य मृत्योः पश्चात् मराठाराज्ये प्रभाविशक्तिः चित्तपावनानां ब्राह्मणानां परिवाराणां हस्ते अतिष्ठत् । ये शिवाजिमहाराजस्य उत्तराधिकारिणां शासनकाले 'पेशवा' अर्थात् प्रधानमन्त्रिरूपेण स्वीयां सेवां प्रयच्छन्तः आसन् । पुणे मराठाराज्यस्य राजधानी अभवत् ।

पेशवानां निरीक्षणे मराठाभिः कस्यचित् अत्यन्तं सफलस्य सङ्घटनस्य विकासः कृतः। तेषां सफलतायाः रहस्यम् आसीत् यत् ते मुगलानां दुर्गपिधानक्षेत्रैः सह वैरं न स्वीकुर्वन् तेषां समीपात् मौनेन निष्क्रम्य नगरेषु उपनगरेषु च आक्रमणं कुर्वन्ति स्म तथा च मुगलसेनायाः सम्मुखागमनम् एतादृशक्षेत्रेषु कुर्वन्ति स्म यत्र अन्नसामग्रीप्राप्तेः सैन्यागमनमार्गाः सरलतया अवरोद्धुं शक्यन्ते स्म ।

1720 तः 1761 तमवर्षाणां मध्ये मराठासाम्राज्यस्य बहुः विस्तारः अभवत् । तेन शनैः शनैः महत्या सफलतया च मुगलसाम्राज्यस्य सत्तायाः क्षतिः कृता । 1720 तमं दशकं यावत् मालवा तथा च गुजरातः मुग्लेभ्यः अपाहृतौ । 1730 तमं दशकं यावत् मराठानरेशः समस्त-दक्कन-प्रायद्वीपस्य अधिपतिरूपेण मान्यतां प्राप्नोत् । तथा च अस्मिन् क्षेत्रे **'चौथ'** इत्यस्य तथा च **'सरदेशमुखी'** इत्यस्य च करस्वीकरणस्य अधिकारः अपि प्राप्तः ।

1737 तमे वर्षे देहल्याम् आक्रमणम् उक्त्वा मराठाप्रभुत्वस्य सीमाः शीघ्रतया वर्धिताः। ते उत्तरक्षेत्रे राजस्थानं तथा च पञ्जाबं यावत्, पूर्वे बङ्गालम् उडीसां च यावत्, तथा च दक्षिणे कर्णाटकं तमिलं तेलुगुप्रदेशं यावत् विस्तीर्णाः आसन् । एतेषां क्षेत्राणाम् औपचारिकरूपेण मराठासाम्राज्ये सम्मेलनं न कृतम् । परन्तु मराठाप्रभुसत्तायाः स्वीकरणस्य विधेः रूपेण तेभ्यः उपायनत्वेन धनस्वीकरणस्य आरम्भः कृतः । साम्राज्यस्य अस्मिन् विस्तारे ते संसाधनानां भण्डारणं तु प्राप्नुवन्, परन्तु तदर्थं तैः तत्मूल्यम् अपि देयम् अभवत् । मराठानां सैन्याभियानानां कारणेन अन्यशासकाः अपि तेषां विरुद्धम् आसन् । परिणामतः मराठाः 1761 तमे वर्षे पानीपतस्य तृतीये युद्धे अन्यशासकेभ्यः किञ्चन अपि साहाय्यं न प्राप्नुवन् ।

चित्रम् – 7

महाराजः
रणजीतसिंहस्य खड्गम्

चित्रम् – 7

महाराजः
रणजीतसिंहस्य खड्गम्

'चौथकरः'
भूपतिभिः स्वीक्रियमाणस्य भूराजस्वस्य 25 प्रतिशतम् । दक्कने एतस्य स्वीकरणं मराठाजनाः कुर्वन्ति ।

सरदेशमुखी
दक्कने मुख्यराजस्वं सङ्ग्रहकर्त्रे प्रदीयमानस्य भूराजस्वस्य 9-10 प्रतिशतभागः ।

अन्तहीनैः सैन्याभियानैः सह मराठाभिः काचिद् प्रभावशालिनी प्रशासनव्यवस्था सज्जीकृता । यदा कस्मिंश्चित् क्षेत्रे एकवारं विजयाभियानं सम्पूर्णं भवति स्म । तथा च मराठानां शासनं सुरक्षितं भवति स्म, तदा तत्र स्थानीयाः परिस्थितीः अवधार्य शनैः शनैः भूराजस्वस्य अभियाचना कृता । कृषेः प्रोत्साहनं कृतम् । व्यापारस्य च पुनर्जीवनं कृतम् । अनेन सिन्धिया, गायकवाडः तथा च भोंसलेसदृशाः मराठासरदाराः शक्तिशालीसेनानां सम्पादनार्थं संसाधनानि प्राप्तुं शक्तवन्तः । 1720 तमे दशके मालवायां मराठाभियानैः तस्मिन् क्षेत्रे स्थितानां नगराणां हानिः नैव कृता । उज्जैनः सिन्धियायाः संरक्षणे तथा च इन्दौरः होल्करस्य आश्रये समृद्धौ जातौ । एतानि नगराणि सर्वविधप्रकारेण विशालानि समृद्धानि च आसन् । तथा च ते महत्त्वपूर्णेन वाणिज्यिककेन्द्ररूपेण सांस्कृतिककेन्द्ररूपेण कार्यं कुर्वन्तः आसन् । मराठाभिः नियन्त्रितेषु क्षेत्रेषु व्यापारस्य नूतनाः मार्गाः उद्घटिताः । चन्देरीक्षेत्रे उत्पादितानां कौशेयवस्त्राणां कृते राजधान्यां पुणेनगरे नूतनविपणिः प्राप्ता । बुरहानपुरं प्रथमम् आगरायाः सूरतस्य च मध्यभागस्य सीमाक्षेत्रे एव स्वस्य व्यापारे संलग्नम् आसीत् । परन्तु अधुना सः स्वस्य वाणिज्यस्य अन्तःक्षेत्रं वर्धयित्वा दक्षिणभागे पुणेनगरं तथा च नागपुरं, पूर्वभागे लखनऊनगरम् इलाहाबादं च सम्मिलितम् अकरोत् ।

जाटाः

अन्यराज्यानाम् इव जाटानाम् अपिसप्तदशे अष्टादशे वा शताब्दे सत्तायाः दृढीकरणम् अभवत् । तैः स्वस्य नेतुः चूडामनस्य नेतृत्वे देहल्याः पश्चिमे स्थितेषु क्षेत्रेषु स्वस्य नियन्त्रणं कृतम् । 1680 तमं दशकं यावत् तेषां प्रभुत्वं देहल्याः आगरायाः च द्वयोः राजकीयनगरयोः मध्यस्थक्षेत्रे प्रारब्धम् । वस्तुतः कस्मैचित् कालाय आगरानगरस्य अभिरक्षकाः एव जाताः ।

जाटजनाः समृद्धाः कृषकाः आसन् तथा च तेषां प्रभुत्वक्षेत्रे पानीपतसदृशं तथा च बल्लभगढसदृशं नगरं महत्त्वपूर्णानि व्यापारिककेन्द्राणि जातानि । सूरजमलस्य शासनकाले भरतपुरं शक्तिशालिराज्यरूपेण प्रसिद्धम् अभवत् । 1739 तमे वर्षे यदा नादिरशाहः देहल्याम् आक्रमणं कृत्वा अलुण्ठयत् तदा देहल्याः अनेकैः प्रतिष्ठितैः व्यक्तिभिः भरतपुरे आश्रयं स्वीकृतम् । नादिरशाहस्य पुत्रः जवाहिरशाहस्य पार्श्वे त्रिंशत्सहस्रं सैनिकाः आसन् । तेन विंशतिसहस्रं सैनिकाः मराठाभ्यः स्वीकृताः, पञ्चदशसहस्रं सैनिकाः सिक्खेभ्यः स्वीकृताः तथा च एतेषां बलेन मुग्लैः सह युद्धम् अकरोत् ।

यत्र भरतपुरस्य दुर्गं महत्यां पारम्परिक्यां शैल्यां निर्मितः आसीत्, तत्र एव दीगे जाटाः अम्बरस्य आगरायाः च शैलीनां समन्वयं कुर्वन्तः विशालस्य बाग-प्रासादस्य निर्माणम् अकारयन् । राजकीया वास्तुकला यानि रूपाणि प्रथमतया शाहजहाँकाले योजितानि आसन्, दीगस्य भित्तयः तेषां रूपाणाम् एव प्रारूपेण निर्मिताः आसन् (पञ्चमाध्यायस्य नवमाध्यायस्य च 12 तमं चित्रं पश्यन्तु)।

चित्रम् – 8

अष्टादशशताब्द्याः दीगस्य राजप्रासादसमूहः । भवनस्य छदौ मुख्यसभाभवनस्य 'बाङ्गला-गुम्मदः' उपरि अवधानं कुर्वन्तु ।

अन्यत्र

फ्रांसीसीक्रान्तिः (1789-1794)

अष्टादशशताब्द्यां भारतस्य विभिन्नराज्यव्यवस्थासु सामान्यजनानां कृते स्वस्य सर्वकारीयेषु कार्येषु कार्यकरणस्य भागग्रहणस्य अवकाशः न आसीत् । ईदृशी स्थितिः पश्चिमसंसारे अष्टादशशताब्दस्य अन्तिमदशकान् यावत् आसीत् । अमेरीकीक्रान्तिः (1776-1781) तथा च फ्रांसीसीक्रान्तिः एतां स्थितिम् अपि च सह एव अभिजातवर्गस्य सामाजिकानां राजनैतिकानां च प्राधिकाराणां कृते आह्वानं प्रदत्तम् ।

फ्रांसीसी-क्रान्तिकाले मध्यवर्गस्य कृषकैः शिल्पकारिभि- पादरीगणैः च अभिजातानां विशेषाधिकाराणां विरुद्धं युद्धं कृतम् । तेषां मन्तव्यम् आसीत् यत् समाजे कस्यापि समूहस्य जन्मसिद्धैः प्राधिकारैः न भवितव्म् । अपितु जनानां सामाजिकस्थितौ योग्यतायां च आश्रिताः करणीयाः। फ्रांसीसीक्रान्त्याः दार्शनिकाः एतत् परामृष्टवन्तः यत् सर्वेषां कृते नियमाः समानावसराः च भवेयुः । तेषाम् एतत् अपि कथनम् आसीत् यत् सर्वकारस्य सत्ता जनैः निर्मिता भवेत् तथा च जनतायाः सर्वकारस्य कार्येषु योगदानं प्रदातुम् अधिकारः भवेत् । फ्रांसीसीक्रान्तिसदृशैः अमरीकीक्रान्तिसदृशैः च आन्दोलनैः शनैः शनैः प्रजानां नागरिकेषु परिवर्तनं कारितम् ।

नागरिकतया राष्ट्रिय-राज्यैः लोकतान्त्रिकानाम् अधिकाराणां च विचारैः भारते नवदशशताब्दस्य अन्तिमदशकेभ्यः आधारस्य दृढीकरणं कृतम् ।

कल्पय

भवन्तः अष्टादशशताब्दस्य शासकाः सन्ति । अधुना वदन्तु यत् भवन्तः स्वस्य प्रान्ते स्वस्य स्थितिं दृढीकर्तुं किं किं करिष्यन्ति तथा च एवं कुर्वन्तः भवतां समक्षे के के विरोधाः समस्याः च उत्पादयितुं शक्यन्ते ।

पुनः स्मरन्तु

1. *निम्नलिखितान् योजयन्तु –*

प्रान्ताधिपतिः	*राजस्व-कृषकः*
सैनिकः	*उच्च-अभिजातः*
पणकर्ता	*प्रान्तीय-प्रान्ताधिपतिः*
मिस्लः	*मराठा-कृषक-योद्धा*
चौथकरः	*मुगल-सैन्य-सेनापतिः*
कुनबी	*सिक्खियोद्धृणां समूहः*
उमरा	*मराठैः स्थापितः करः*

2. *रिक्तस्थानानि पूरयन्तु-*
   - *(क) औरङ्गजेबः.....दीर्घकालिकं युद्धम् अकरोत् ।*
   - *(ख) उमरा तथा च भूपति-मुग्लः.....शक्तिशालिनि अङ्गानि आसन् ।*
   - *(ग) आसफजाहः हैदराबाद-राज्यस्य स्थापना.....कृता ।*
   - *(घ) अवधराज्यस्य संस्थापकः.....आसीत् ।*
3. *समुचितं सूचयन्तु-*
   - *(क) नादिरशाहः बङ्गाले आक्रमणम् अकरोत् ।*
   - *(ख) सवायीराजा जयसिंहः इन्दौरस्य शासकः आसीत् ।*
   - *(ग) गुरुगोविन्दसिंहः सिक्खानां दशमः गुरुः आसीत् ।*
   - *(घ) पुणे अष्टादशे शताब्दे मराठानां राजधानी अभवत् ।*
4. *सादत-खानस्य पार्श्वे कानि कानि पदानि आसन् ?*

आयान्तु विचारयामः

5. *अवधस्य तथा च बङ्गालस्य नवाबाः भूपतिप्रथां वारयितुं किमर्थं प्रयासम् अकुर्वन् ?*
6. *अष्टादशे शताब्दे सिक्खानां सङ्घटनं केन प्रकारेण कृतम् ?*
7. *मराठाशासकाः दक्कनस्य अपरभागे विस्तारं किमर्थं कर्तुम् इच्छन्ति स्म ?*
8. *आसफजाहः स्वस्य स्थितिं दृढीकर्तुं कासां नीतीनाम् अनुपालनम् अकरोत् ?*
9. *किं भवतां विचारेण अद्य महाजनाः बैङ्कराः च तादृशम् एव प्रभावं स्थापयन्ति, यथा अष्टादशे शताब्दे स्थापयन्ति स्म ?*

बीजशब्दाः

प्रान्ताधिपतिः

दलखालसा

मिस्लः

सैन्यम्

पणः

चौथकरः

सरदेशमुखी

10.किम् अध्याये उल्लिखितं किञ्चन अपि राज्यं भवतां स्वीये प्रान्ते विकसितम् आसीत् ? यदि आम् तर्हि भवतां विचारेण अष्टादशशताब्दस्य जनजीवनम् अग्रे एकविंशशताब्दस्य जनजीवनरूपेण भिन्नम् आसीत् ?

आगच्छन्तु कृत्वा पश्यामः

11.अवधे बङ्गाले हैदराबादे च कयाचित् वास्तुकलया नूतनक्षेत्रीयया राजसभया च सह युक्तायाः संस्कृतेः विषये किञ्चिद् ज्ञानं कुर्वन्तु ?

12.राजपूतेषु जाटेषु सिक्खेषु मराठासु च कस्मिंश्चित् एकस्मिन् समूहे शासकानां विषये कासाञ्चित् कथानां ज्ञानं कुर्वन्तु ।

मीर सैयद अली द्वारा बनाया गया एक चित्र। यह चित्र उन्होंने शायद अकबर के लिए बनाया था। फ़रयादी के हाथ में एक चित्र ख़र्रा है जिसमें वह राजा से अपने पुत्र के लिए रोज़गार की फ़रियाद कर रहा है।

761

विद्या ऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

ISBN 81-7450-755-8